अथ षष्ठोऽध्यायः

प्रथमः पादः

[*द्वित्वप्रकरणम्*]

एकाचो द्वे प्रथमस्य ॥६।१।१॥

एकाचः ६।१॥ द्वे १।२॥ प्रथमस्य ६।१॥ *स०*—एकोऽच् यस्मिन् स एकाच्, तस्य एकाचः, बहुव्रीहिः ॥ *अर्थः*—प्रथमस्य एकाचो द्वे भवत इत्यधिकारो वेदितव्यः ॥ *उदा०*—जजागार, पपाच, इयाय, आर ॥

भाषार्थः—[*प्रथमस्य*] प्रथम [*एकाचः*] एक अच् वाले समुदाय को [*द्वे*] द्वित्व हो जाता है। यह अधिकार ६।१।११ सूत्र तक जानना चाहिये ॥ द्वित्व का अभिप्राय है, एक का दो बार उच्चारण करना ॥

अजादेर्द्वितीयस्य ॥६।१।२॥

अजादेः ६।१॥ द्वितीयस्य ६।१॥ *स०*—अच् आदिर्यस्य सः अजादिः, तस्य ....बहुव्रीहिः ॥ *अनु०*—एकाचः, द्वे ॥ *अर्थः*—अजादेर्द्वितीयस्य एकाचो द्वे भवत इत्यधिकारो वेदितव्यः ॥ *उदा०*—अटिटिषति, अशिशिषति, अरिरिषति ॥

भाषार्थः—[*अजादेः*] अच् है आदि में जिसके ऐसे शब्द के [*द्वितीयस्य*] द्वितीय एकाच् समुदाय को द्वित्व होता है ॥ यह अधिकार भी ६।१।११ तक जानना चाहिये ॥

यहाँ 'द्वितीयस्य' ग्रहण सामर्थ्य से 'प्रथमस्य' की अनुवृत्ति का सम्बन्ध नहीं लगता है ॥

न न्द्राः संयोगादयः ॥६।१।३॥

न अ० ॥ न्द्राः १।३॥ संयोगादयः १।३॥ *स०*—नश्च दश्च रश्च न्द्राः, इतरेतरद्वन्द्वः। संयोगस्य आदिः संयोगादिः, ते.....षष्ठीतत्पुरुषः ॥ *अनु०*—अजादेर्द्वितीयस्य, एकाचः, द्वे ॥ *अर्थः*—अजादेर्द्वितीयस्य

एकाचः, संयोगस्याद्यवयवभूता नकारदकाररेफाः न द्विरुच्यन्ते। पूर्वेण प्राप्तं द्वित्वं प्रतिषिध्यते ॥ *उदा०* —उन्दिदिषति, अड्डिडिषति, अर्चिचिषति ॥

भाषार्थः—अजादि के द्वितीय एकाच् समुदाय के [*संयोगादयः*] संयोग के आदि में स्थित जो [*न्द्राः*] न् द् र् इनको द्वित्व [*न*] नहीं होता ॥ पूर्व सूत्र से अजादि के द्वितीय एकाच् को द्वित्व प्राप्त था, यहाँ यदि द्वितीय एकाच् समुदाय के संयोग के आदि वाला अक्षर नकार दकार या रेफ हो तो उसे द्वित्व न हो यह निषेध कर दिया ॥

उन्द् धातु में द्वितीय एकाच् के संयोग का आदि 'न्' है सो उसे द्वित्व न होकर 'दिस् दिस्' द्वित्व होकर उन्दिदिषति (गीला करना चाहता है) बना। अद्ड धातु में भी द् को छोड़कर 'डिस् डिस्' द्वित्व होकर अड्डिडिषति (अभियोग करना चाहता है (बना। ष्टुना ष्टुः (८।४।४०) से द् को ड् हो गया है। अर्च धातु से अर्चिचिषति (पूजा करना चाहता है) में भी इसी प्रकार पूर्व सूत्र से प्राप्त रेफ सहित को द्वित्व न होकर, रेफ को छोड़कर 'चिस् चिस्' द्वित्व हुआ है। सन्नन्त की पूरी सिद्धि परिशिष्ट में दिखा दी है ॥

पूर्वोऽभ्यासः ॥६।१।४॥

पूर्वः १।१॥ अभ्यासः १।१॥ *अनु०*—द्वे ॥ द्वे इति प्रथमान्तमत्र षष्ठ्या विपरिणम्यते। *अर्थः*—ये द्वे विहितेऽस्मिन् प्रकरणे तयोर्यः पूर्वः सोभ्याससंज्ञो भवति ॥ *उदा०*—पपाच, पिपक्षति, पापच्यते, जुहोति, अपीपचत् ॥

भाषार्थः—जो इस प्रकरण में द्वित्व कहा है, उन दोनों में जो [*पूर्वः*] पूर्व है उसकी [*अभ्यासः*] अभ्यास संज्ञा होती है ॥

जुहोति की सिद्धि भाग १ परि० १।१।६० में देखें। अपीपचत् की सिद्धि परि० ६।१।११ में देखें। सर्वत्र अभ्यास संज्ञा होने से तत्तत् निर्दिष्ट अभ्यास कार्य हो जाते हैं ॥

उभे अभ्यस्तम् ॥६।१।५॥

उभे १।२॥ अभ्यस्तम् १।१॥ *अनु०*—द्वे ॥ *अर्थः*—ये द्वे विहिते ते उभे समुदितेऽभ्यस्तसंज्ञे भवतः ॥ *उदा०*—ददति, ददतु, दधतु ॥

भाषार्थः—[*उभे*] जो द्वित्व रूप से कहे गए वे दोनों (द्वित्व किये हुये दोनों) [*अभ्यस्तम्*] अभ्यस्त संज्ञक होते हैं ॥

यहाँ से '*अभ्यस्तम्*' की अनुवृत्ति ६।१।६ तक जायेगी ॥

जक्षित्यादयः षट् ॥६।१।६॥

जक्ष् अविभक्तिकनिर्देशः ॥ इत्यादयः ॥१।३॥ षट् १।१॥ *स०*—इति आदिः येषां ते इत्यादयः बहुव्रीहिः ॥ *अनु०*—अभ्यस्तम् ॥ *अर्थः*—जक्ष इति धातुरादयश्चान्ये षट् धातवोऽभ्यस्तसंज्ञका भवन्ति ॥ *उदा०*—जक्षति, जाग्रति, दरिद्रति, चकासति, शासति, दीध्यते, वेव्यते, दीध्यत् ॥

भाषार्थः—[*जक्ष्*] जक्ष इस धातु की और [*इत्यादयः*] वह आरम्भ में है जिन [*षट्*] छः धातुओं के उनकी अभ्यस्त संज्ञा होती है ॥ आदि शब्द से यहाँ जक्ष से आगे की, छः धातुओं का ग्रहण है, सो जक्ष को लेकर कुल सात धातुओं की अभ्यस्त संज्ञा होगी ॥

पूर्व सूत्र से द्वित्व किये हुये दोनों की ही अभ्यस्त संज्ञा प्राप्त थी, यहाँ बिना द्वित्व किये हुये सामान्य धातुओं की अभ्यस्त संज्ञा की है ॥

तुजादीनां दीर्घोऽभ्यासस्य ॥६।१।७॥

तुजादीनाम् ६।३॥ दीर्घः १।१॥ अभ्यासस्य ६।१॥ *स०*—तुज आदिर्येषां ते तुजादयस्तेषां .... बहुव्रीहिः ॥ आदिशब्दः प्रकारवाची, तुजप्रकारा इत्यर्थः ॥ *अर्थः*—तुजादीनां धातूनाम् अभ्यासस्य दीर्घो भवति ॥ *उदा०*—तूतुजानः । मामहानः । अनड्वान् दाधान । स्वधां मीमाय । दाधार । स तूताव ॥

भाषार्थः—[*तुजादीनाम्*] तुजादि धातुओं के [*अभ्यासस्य*] अभ्यास को [*दीर्घः*] दीर्घ होता है ॥ सूत्र में आदि शब्द प्रकारवाची है, तुज के प्रकार वाली, अर्थात् जिनको दीर्घ कहीं कहा नहीं, पर प्रयोग में देखा जाता है, उनके अभ्यास को दीर्घ होता है ॥

लिटि धातोरनभ्यासस्य ॥६।१।८॥

लिटि ७।१॥ धातोः ६।१॥ अनभ्यासस्य ६।१॥ *स०*—अनभ्यासस्येत्यत्र नञ्तत्पुरुषः ॥ *अनु०*—एकाचो द्वे प्रथमस्य, अजादेर्द्वितीयस्य ॥

रतो धातोरवयवस्यानभ्यासस्य प्रथमस्य एकाचोऽजादे-
थायोगं द्वे भवतः ॥ उदा०—पपाच, पपाठ, प्रोर्णुनाव ॥

[लिटि] लिट् लकार परे रहते [धातोः] धातु का अवयव
अनभ्यास (अर्थात् जिसको पहले किसी और निमित्त
द्वित्व होकर अभ्यास संज्ञा नहीं हुई हो) जो प्रथम एकाच्
गत का अवयव जो द्वितीय एकाच् उसको द्वित्व होता है ॥

पूर्ववत् जानें । ऊर्णुञ् धातु से प्रोर्णुनाव बनेगा ।
'ऊ' को द्वित्व नहीं होगा, तथा न न्द्राः संयो०
ो द्वित्व न होकर नु नाव् द्वित्व होकर प्रोर्णुनाव

धातोरनभ्यासस्य" की अनुवृत्ति ६।१।११ तक जायेगी ॥

सन्यङोः ॥६।१।९॥

६।२॥ स०—सँश्च यङ् च सन्यङौ, तयोः इतरेतरद्वन्द्वः ॥
रनभ्यासस्य, एकाचो द्वे प्रथमस्य, अजादेर्द्वितीयस्य ॥
स्य यङन्तस्य चानभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो-
य वा द्वे भवतः ॥ उदा०—पिपक्षति, पिपतिषति, अरिरि-
ति । यङन्तस्य—पापच्यते, यायज्यते अटाट्यते, अरार्यते,
।

-[सन्यङोः] सन्नन्त और यङन्त धातु के अनभ्यास अवयव
तथा अजादि के द्वितीय एकाच् को द्वित्व होता है ॥

श्लौ ॥६।१।१०॥

श्लौ ७।१॥ अनु०—धातोरनभ्यासस्य, एकाचो द्वे प्रथमस्य, अजादे-
र्द्वितीयस्य ॥ अर्थः—श्लौ परतोऽनभ्यासस्य धातोरवयवस्य प्रथमस्य
एकाचोऽजादेर्द्वितीयस्य वा एकाचो द्वे भवतः ॥ उदा०—जुहोति,
बिभेति, जिह्रेति ॥

भाषार्थः—[श्लौ] श्लु परे रहते धातु के अनभ्यास अवयव प्रथम
एकाच् तथा अजादि के द्वितीय एकाच् को द्वित्व हो जाता है ॥

जुहोति की सिद्धि परि० १।१।६० में देखें। ञिभी भये धातु से इसी प्रकार बिभेति (डरता है) तथा ह्री लज्जायाम् धातु से जिह्रेति (लज्जा करता है) बनता है ॥

चङि ॥६।१।११॥

चङि ७।१॥ अनु०—धातोरनभ्यासस्य, एकाचो द्वे प्रथमस्य, अजादेर्द्वितीयस्य ॥ *अर्थः*—चङि परतोऽनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचोऽजादेर्द्वितीयस्य वा द्वे भवतः ॥ उदा०—अपीपचत्, अपीपठत्, आटिटत्, आशिशत्, आर्दिदत् ॥

भाषार्थः—[चङि] चङ् परे रहते धातु के अनभ्यास प्रथम एकाच् तथा अजादि के द्वितीय एकाच् को द्वित्व होता है ॥

दाश्वान् साह्वान् मीढ्वांश्च ॥६।१।१२॥

दाश्वान् १।१॥ साह्वान् १।१॥ मीढ्वान् १।१॥ च अ० ॥ *अर्थः*—दाश्वान् साह्वान् मीढ्वानित्येते शब्दा निपात्यन्ते छन्दसि भाषायाञ्च सामान्येन ॥ दाश्वानिति—दाशृ दाने इत्येतस्माद् धातोः क्वसुप्रत्ययो भवति, अद्विर्वचनमनिट्त्वञ्च निपात्यते ॥ दाश्वांसो दाशुषः सुतम् ॥ साह्वानिति षह मर्षणे, धातोः क्वसुप्रत्ययः, परस्मैपदमद्विर्वचनमनिट्त्वं धातोरुपधादीर्घत्वञ्च निपात्यते ॥ साह्वान् बलाहकः ॥ मीढ्वानिति मिह सेचने धातोः क्वसुप्रत्ययः, अद्विर्वचनमनिट्त्वं धातोरुपधादीर्घत्वं ढत्वञ्च निपात्यते ॥ मीढ्वस्तोकाय तनयाय मृडय ॥

भाषार्थः—[*दाश्वान्*...*न्*] दाश्वान् साह्वान् [च] तथा मीढ्वान् ये शब्द छन्द तथा भाषा में सामान्य करके निपातन किये जाते हैं ॥

दाश्वान् में दाशृ दाने धातु से लिट् के स्थान में *क्वसुश्च* (३।२।१०७) सूत्र से क्वसु हुआ है। अब क्वसु को स्थानिवद्भाव से लिट् मानकर जो *लिटि धातो०* (६।१।८) से द्वित्व प्राप्त हुआ, उस द्वित्व का निषेध तथा *वस्वेकाजाद्घसाम्* (७।२।६७) से जो इट् प्राप्त था उसका भी निषेध निपातन से किया जाता है ॥ शेष नुम् आगम दीर्घ आदि कार्य चितवान् की सिद्धि के समान जानें ॥ साह्वान् में षह मर्षणे धातु से पूर्ववत् क्वसु होकर परस्मैपदत्व अद्विर्वचन अनिट्त्व एवं धातु की उपधा को दीर्घत्व निपातन किया गया है। यहाँ षह धातु आत्मनेपदी है।

लः परस्मैपदम् (१।४।९८) से (तङ् और आन=को छोड़कर) सब लादेश परस्मैपद होते हैं इस प्रकार लिट् के स्थान में होने से क्वसु लादेश (लकार) है, सो यह परस्मैपद संज्ञक होने से परस्मैपदी धातु से ही होगा, अतः यहाँ धातु को परस्मैपदत्व का निपातन करना पड़ा ॥

मीढ्वान् में मिह सेचने धातु से पूर्ववत् क्वसु करके अद्विर्वचन अनिटत्व, मिह् के उपधा को दीर्घ तथा हकार का ढकार निपातन है। सूत्र निर्दिष्ट प्रकृत उदाहरण में 'मीढ्वस्' सम्बुद्ध्यन्त पद है। मीढ्वन् यहाँ *मतुवसो रु०* (८।३।१) से न् को रु होकर 'मीढ्वर्' विसर्जनीय होकर मीढ्वः तथा उस विसर्जनीय को पुनः तोकाय परे रहते *विसर्जनीयस्य सः* (८।३।३४) से सत्व होकर 'मीढ्वस्तोकाय' बना है ॥ दाश्वान्स् जस्=दाश्वांसः यह बहुवचन का रूप है ॥

[*संप्रसारणप्रकरणम्*]

ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे ॥६।१।१३॥

ष्यङः ६।१॥ सम्प्रसारणम् १।१॥ पुत्रपत्योः ७।२॥ तत्पुरुषे ७।१॥ *स०*—पुत्रश्च पतिश्च पुत्रपती, तयोः''' इतरेतरद्वन्द्वः ॥ *अर्थः*—पुत्र, पति इत्येतयोरुत्तरपदयोः ष्यङः सम्प्रसारणं भवति तत्पुरुषे समासे ॥ *उदा०*—कारीषगन्धीपुत्रः कारीषगन्धीपतिः, कौमुदगन्धीपुत्रः कौमुदगन्धीपतिः ॥

भाषार्थः—[*ष्यङः*] ष्यङ् को [*सम्प्रसारणम्*] सम्प्रसारण होता है, यदि [*पुत्रपत्योः*] पुत्र तथा पति शब्द उत्तरपद में हों तो [*तत्पुरुषे*] तत्पुरुष समास में ॥ यण् के स्थान में इक् करने को (१।१।४४) सम्प्रसारण कहते हैं ॥

कारीषगन्ध्या कौमुदगन्ध्या की सिद्धि परि० ४।१।७४ में दिखा आये हैं, इन शब्दों से आगे कारीषगन्ध्यायाः पुत्रः पतिर्वा, कौमुदगन्ध्यायाः पुत्रः पतिर्वा—ऐसा विग्रह करके षष्ठीतत्पुरुष (२।२।८) समास किया, तब प्रकृत सूत्र से ष्यङ् के 'य' को सम्प्रसारण होकर कारीषगन्धिपुत्रः, बना। *सम्प्रसारणस्य* (६।३।१३७) से दीर्घ होकर कारीषगन्धीपुत्रः कारीषगन्धीपतिः आदि रूप बन गये ॥

यहाँ से 'ष्यङः' की अनुवृत्ति ६।१।१४ तथा '*सम्प्रसारणम्*' की ६।१।२१ तक जायेगी ॥

बन्धुनि बहुव्रीहौ ॥६।१।१४॥

बन्धुनि ७।१॥ बहुव्रीहौ ७।१॥ *अनु०*—ष्यङः, सम्प्रसारणम् ॥ *अर्थः*—बन्धुशब्द उत्तरपदे बहुव्रीहौ समासे ष्यङः सम्प्रसारणं भवति ॥ *उदा०*—कारीषगन्ध्या बन्धुरस्य कारीषगन्धीबन्धुः कौमुदगन्धीबन्धुः॥

भाषार्थः—[*बन्धुनि*] बन्धु शब्द उत्तरपद में हो तो [*बहुव्रीहौ*] बहुव्रीहि समास में ष्यङ् को सम्प्रसारण हो जाता है ॥

सिद्धि पूर्ववत् जानें। *अनेकमन्यपदार्थे* (२।२।२४) से यहाँ समास होगा, यही विशेष है ॥ *उदा०*—कारीषगन्धीबन्धुः (कारीषगन्ध्या नाम की स्त्री जिसकी बन्धु है), कौमुदगन्धीबन्धुः ॥

वचिस्वपियजादीनां किति ॥६।१।१५॥

वचिस्वपियजादीनाम् ६।३॥ किति ७।१॥ *स०*—यज आदिर्येषां ते यजादयः, बहुव्रीहिः। वचिश्च स्वपिश्च यजादयश्च वचिस्वपियजादयस्तेषाम्, इतरेतरद्वन्द्वः ॥ *अनु०*—सम्प्रसारणम् ॥ *अर्थः*—वचिस्वप्योर्यजादीनां च सम्प्रसारणं भवति किति परतः ॥ *उदा०*—वच्—उक्तः, उक्तवान्। स्वप्—सुप्तः, सुप्तवान्। यज्—इष्टः इष्टवान्। वप्—उप्तः, उप्तवान्। वह्—ऊढः, ऊढवान्। वस्—उषितः, उषितवान्। वेञ्—उतः, उतवान्। व्येञ्—संवीतः, संवीतवान्। ह्वेञ्—हूतः, हूतवान्। वद्—उदितः, उदितवान्। टुओश्वि—शूनः, शूनवान् ॥

भाषार्थः—[*वचिस्वपियजादीनाम्*] वच, ञिष्वप् शये तथा यजादि धातुओं को [*किति*] कित् प्रत्यय के परे रहते सम्प्रसारण हो जाता है। वच् से वच परिभाषणे तथा *ब्रुवो वचिः* (२।४।५३) से विहित वच् आदेश दोनों का ग्रहण है। यजादि के अन्तर्गत यज देवपूजासङ्गतिकरणदानेषु से लेकर भ्वादिगण की समाप्तिपर्यन्त धातुओं का ग्रहण है ॥

उक्तः उक्तवान् आदि की सिद्धि परि० १।१।४४ में देखें। ऊढः में वह धातु से क्त प्रत्यय तथा सम्प्रसारण होकर 'उह् त' बना, अब *हो ढः* (८।२।३१) से ह् को 'ढ्' *झषस्तथो०*(८।२।४०) से त् को 'ध' एवं ष्टुत्व

होकर 'उढ् ढ' रहा। *ढो ढे लोपः* (८।३।१३) से एक ढकार का लोप तथा *ढ्रलोपे पूर्वस्य०* (६।३।१०९) से दीर्घ होकर ऊढः बन गया। क्तवतु में ऊढवान् की सिद्धि भी इसी प्रकार जानें। उषितः उषितवान् में *शासिवसि०* (८।३।६०) से षत्व हुआ है। संवीतः हूतः शूनः आदि में *हलः* (६।४।२) से दीर्घ हुआ है। शूनः शूनवान् में *ओदितश्च* (८।२।४५) से निष्ठा को नत्व तथा *आर्धधातुकस्ये०* (७।२।३५) से प्राप्त इट् का *श्वीदितो०* (७।२।१४) से निषेध भी हुआ है॥

यहाँ से *किति'* की अनुवृत्ति ६।१।१६ तक जायेगी॥

ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ॥६।१।१६॥

ग्रहि······भृज्जतीनाम् ६।३॥ ङिति ७।१॥ च अ०॥ स०—ग्रहि० इत्यत्रेतरेतरद्वन्द्वः॥ अनु०—किति, सम्प्रसारणम्॥ *अर्थः*—ग्रह उपादाने, ज्या वयोहानौ, वेञो वयिरिति वयादेशः, व्यध ताडने, वश कान्तौ व्यच व्याजीकरणे, ओव्रश्चू छेदने, प्रच्छ ज्ञीप्सायां, भ्रस्ज पाके, इत्येतेषां धातूनां सम्प्रसारणं भवति, ङिति किति च परतः॥ *उदा०*—ग्रह-गृहीतः, गृहीतवान्, ङिति—गृह्णाति जरीगृह्यते। ज्या—जीनः, जीनवान्, ङिति—जिनाति, जेजीयते। वय—ऊयतुः, ऊयुः। ङिद्भावात् किदेवात्रोदाह्रियते। व्यध—विद्धः, विद्धवान्। ङिति—विध्यति वेविध्यते। वश—उशितः, उशितवान्। ङिति—उष्टः, उशन्ति। व्यच—विचितः, विचितवान्। ङिति—विचति वेविच्यते। ओव्रश्चू—वृक्णः, वृक्णवान्। ङिति—वृश्चति, वरीवृश्च्यते। प्रच्छ—पृष्टः, पृष्टवान्। ङिति—पृच्छति, परीपृच्छ्यते। भ्रस्ज—भृष्टः, भृष्टवान्। ङिति—भृज्जति, बरीभृज्ज्यते॥

भाषार्थः—[*ग्रहिज्या···भृज्जतीनाम्*] ग्रह उपादाने, ज्या वयोहानौ, वय (वेञो वयिः से जो वय आदेश होता है उसका यहाँ ग्रहण है), व्यध ताडने, वश कान्तौ, व्यच व्याजीकरणे, ओव्रश्चू छेदने, प्रच्छ ज्ञीप्सायां, भ्रस्ज पाके, इन-इन धातुओं को सम्प्रसारण हो जाता है, [*ङिति*] ङित् [*च*] तथा कित् प्रत्यय परे रहते॥ वश धातु को यङ् परे रहते सम्प्रसारण का निषेध *न वशः* (६।१।२०) से करेंगे, अतः उसके यङ् का उदाहरण नहीं दिया।

लिट्यभ्यासस्योभयेषाम् ॥६।१।१७॥

लिटि ७।१॥ अभ्यासस्य ६।१॥ उभयेषाम् ६।३॥ *अनु०*—सम्प्रसारणम् ॥ *अर्थः*—उभयेषां=वच्यादीनां ग्रहादीनां च लिटि परतोऽभ्यासस्य सम्प्रसारणं भवति ॥ उदा०—वच्—उवाच, उवचिथ । स्वप्—सुष्वाप, सुष्वपिथ । यज्—इयाज, इयजिथ । टुवप्—उवाप, उवपिथ । ग्रह—जग्राह, जग्रहिथ । ज्या—जिज्यौ, जिज्यिथ । वय—उवाय, उवयिथ । व्यध—विव्याध, विव्यधिथ । वश—उवाश, उवशिथ । व्यच—विव्याच, विव्यचिथ । ओव्रश्चू—वव्रश्च, वव्रश्चिथ । प्रच्छ—पप्रच्छ पप्रच्छिथ । भ्रस्ज—बभ्रज्ज बभ्रज्जिथ । ग्रहिपृच्छतिभृज्ज तीनां सम्प्रसारणासंप्रसारणत्व उभयथाऽपि रूपयोरविशेषः ॥

भाषार्थः—[*उभयेषाम्*] दोनों के अर्थात् वचि, स्वपि, यजादि तथा ग्रहिज्यादियों के [*अभ्यासस्य*] अभ्यास को सम्प्रसारण हो जाता है, [*लिटि*] लिट् परे रहते ॥

विशेषः—लिट् लकार के *असंयोगाल्लिट् कित्* (१।२।५) से कित्वत् होने के कारण, लिट् लकार में अभ्यास को पूर्व दोनों सूत्रों से ही सम्प्रसारण हो सकता था, पुनः इस सूत्र के विधान करने का यह प्रयोजन है कि, जहाँ लिडादेश पित्स्थानी होने के कारण पूर्वोक्त सूत्र से कित्वत् नहीं हो सकता, वहाँ कित् परे न होने पर भी अभ्यास को सम्प्रसारण हो जाय । जैसे णल् तथा थल् तिप् सिप् स्थानी होने से पित् स्थानी हैं, अतः कित्वत् नहीं थे, पुनरपि यहाँ इस सूत्र से सम्प्रसारण हो जाता है ॥

लिट् लकार की सिद्धियाँ बहुत बार दिखा आये हैं, उसी प्रकार यहाँ भी समझें, सम्प्रसारण रूप ही एक कार्य यहाँ विशेष है और कुछ नहीं ॥ द्वित्व करने के पश्चात् *हलादिः शेषः* (७।४।६०) से पहले ही प्रकृत सूत्र से अभ्यास को सम्प्रसारण होता है । ग्रह प्रच्छ तथा भ्रस्ज धातु को द्वित्व तथा सम्प्रसारण होकर 'गृ ग्रह, पृ प्रच्छ, भृ भ्रस्ज' बना । पुनः उरत् (७।४।६६) से अत्व करके 'गर् ग्रह पर् प्रच्छ, भर् भ्रस्ज' बना । हलादि शेष करके जग्राह पप्रच्छ बभ्रज्ज बन गया । बभ्रज्ज यहाँ इतना और विशेष है कि *झलां जश् झशि* (८।४।५२) से भ्रस्ज के स् को द् एवं पुनः द् को श्चुत्व (८।४।३९) होकर ज् हो गया है । यहाँ सम्प्रसारण बिना किये

हलादिः शेषः से अभ्यास के रेफ की निवृत्ति होकर पप्रच्छ बभ्रज्ज रूप बन सकता था, अतः कहा है कि प्रच्छ तथा भ्रस्ज धातु में सम्प्रसारण करने एवं न करने में कोई विशेष नहीं है अर्थात् दोनों में एक जैसा ही रूप बनेगा, सो प्रच्छ, भ्रस्ज से अतिरिक्त धातुओं के लिये ही यह सम्प्रसारण विधान है ॥

स्वापेश्चङि ॥६।१।१८॥

स्वापेः ६।१॥ चङि ७।१॥ *अनु०*—सम्प्रसारणम् ॥ *अर्थः*—स्वापेरिति स्वपधातोर्ण्यन्तस्य ग्रहणम् । तस्य स्वापेः चङि परतः सम्प्रसारणं भवति ॥ *उदा०*—असूषुपत्, असूषुपताम्, असूषुपन् ॥

भाषार्थः—[*स्वापेः*] स्वापि (णिजन्त) धातु को [*चङि*] चङ् परे रहते सम्प्रसारण हो जाता है ॥ स्वप् धातु का स्वापि यह णिजन्त में निर्देश है ॥ परि० ६।१।११ में किये गये अपीपचत् की सिद्धि के समान असूषुपत् की सिद्धि जानें, केवल यहाँ चङ् परे रहते सम्प्रसारण (व को उ) होता है, यही विशेष है । सम्प्रसारण होकर सुप् सुप् द्वित्व होगा शेष सिद्धि परि० ६।१।११ के समान जानें । *आदेशप्रत्यययोः* (८।३।५६) से षत्व हो जायेगा ॥

स्वपिस्यमिव्येञां यङि ॥६।१।१९॥

स्वपिस्यमिव्येञाम् ६।३॥ यङि ७।१॥ *स०*—स्वपि० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—सम्प्रसारणम् ॥ *अर्थः*—ञिष्वप् शये, स्यमु शब्दे, व्येञ् संवरणे इत्येतेषां धातूनां यङि परतः सम्प्रसारणं भवति ॥ *उदा०*—सोषुप्यते, सेसिम्यते, वेवीयते ॥

भाषार्थः—[*स्वपिस्यमिव्येञाम्*] ञिष्वप् स्यमु व्येञ् इन धातुओं को [*यङि*] यङ् परे रहते सम्प्रसारण हो जाता है ॥ परि० ६।१।६ के समान यङ् की सिद्धि जानें । व्येञ् में व् तथा य् दोनों यण् हैं सो दोनों को ही सम्प्रसारण हो सकता है, पर *न सम्प्रसारणे०* (६।१।३६) से संप्रसारण परे होने पर पूर्व यण् को सम्प्रसारण का निषेध करने से विदित होता है कि पहले पर यण् को सम्प्रसारण होता है, तत्पश्चात् पूर्व य को उक्त सूत्र से सम्प्रसारण का निषेध हो जाता है । इस प्रकार

यहाँ पर यण् 'य्' को सम्प्रसारण होता है। *आदेच उपदेशेऽशिति* (६।१।४४) से आत्व यहाँ हो ही जायेगा।

यहाँ से '*यङि*' की अनुवृत्ति ६।१।२१ तक जायेगी॥

न वशः ॥६।१।२०॥

न अ० ॥ वशः ६।१॥ *अनु०*—यङि, सम्प्रसारणम्॥ *अर्थः*—वशेर्धातोर्यङि परतः सम्प्रसारणं न भवति॥ *उदा०*—वावश्यते वावश्येते वावश्यन्ते।

भाषार्थः—[*वशः*] वश धातु को यङ् परे रहते सम्प्रसारण [*न*] नहीं होता॥ *ग्रहिज्यावयि०* (६।१।१६) से यङ् ङित् के परे रहते सम्प्रसारण प्राप्त था, उसका निषेध इस सूत्र से हो जाता है॥

चायः की ॥६।१।२१॥

चायः ६।१॥ की, लुप्तप्रथमान्तनिर्देशः॥ *अनु०*—यङि॥ *अर्थः*—चायृ पूजानिशामनयोरित्येतस्य धातोर्यङि परतः 'की' आदेशो भवति॥ *उदा०*—चेकीयते चेकीयेते चेकीयन्ते॥

भाषार्थः—[*चायः*] चायृ धातु को यङ् परे रहते [*की*] 'की' आदेश होता है॥ इस सूत्र में सम्प्रसारण की अनुवृत्ति का सम्बन्ध नहीं लगता॥

स्फायः स्फी निष्ठायाम् ॥६।१।२२॥

स्फायः ६।१॥ स्फी, लुप्तप्रथमान्तनिर्देशः॥ निष्ठायाम् ७।१॥ *अर्थः*—स्फायी वृद्धौ धातोर्निष्ठायां परतः स्फीत्ययमादेशो भवति॥ *उदा०*—स्फीतः, स्फीतवान्॥

भाषार्थः—[*स्फायः*] स्फायी धातु को [*निष्ठायाम्*] निष्ठा परे रहते [*स्फी*] स्फी यह आदेश हो जाता है॥ इस सूत्र में भी सम्प्रसारणम् की अनुवृत्ति का सम्बन्ध नहीं होता॥

यहाँ से '*निष्ठायाम्*' की अनुवृत्ति ६।१।२८ तक जायेगी॥

स्त्यः प्रपूर्वस्य ॥६।१।२३॥

स्त्यः ६।१॥ प्रपूर्वस्य ६।१॥ *स०*—प्र पूर्वो यस्य स प्रपूर्वस्तस्य ''बहुव्रीहिः॥ *अनु०*—निष्ठायाम्, सम्प्रसारणम्॥ *अर्थः*—प्रपूर्वस्य स्त्याधातोर्निष्ठायां परतः सम्प्रसारणं भवति॥ *उदा०*—प्रस्तीतः, प्रस्तीतवान्। प्रस्तीमः, प्रस्तीमवान्॥

भाषार्थः—[*प्रपूर्वस्य*] प्र पूर्व में है, जिस [*स्त्यः*] स्त्या (स्त्यै) धातु के, उसको निष्ठा परे रहते सम्प्रसारण हो जाता है ॥ स्त्यै को *आदेच उपदेशे०* (६।१।४४) से आत्व होकर प्र स्त्या त प्रस्तित: = *हलः* (६।४।२) से दीर्घ होकर प्रस्तीतः प्रस्तीतवान् बन गया। प्रस्तीमः, प्रस्तीमवान् में निष्ठा के त को म *प्रस्त्योऽन्यतरस्याम्* (८।२।५४) से विकल्प से हुआ है ॥

द्रवमूर्तिस्पर्शयोः श्यः ॥६।१।२४॥

द्रवमूर्त्तिस्पर्शयोः ७।२॥ श्यः ६।१॥ *स०*—द्रवस्य मूर्त्तिः काठिन्यं, द्रवमूर्त्तिः, षष्ठीतत्पुरुषः, द्रवमूर्त्तिश्च स्पर्शश्च द्रवमूर्त्तिस्पर्शौ तयोः''''इतरेतरद्वन्द्वः ॥*अनु०*— निष्ठायाम्, सम्प्रसारणम् ॥ *अर्थः*— द्रवमूर्त्तौ = द्रवकाठिन्ये स्पर्शे च वर्त्तमानस्य श्यैङ् गतौ इत्येतस्य धातोः सम्प्रसारणं भवति निष्ठायां परतः ॥ *उदा०*—द्रवमूर्त्तौ—शीनं घृतं, शीना वसा, शीनं मेदः । द्रवावस्थायाः काठिन्यं गतम् इत्यर्थः । स्पर्शे—शीतं वर्त्तते, शीतो वायुः, शीतमुदकम् ॥

भाषार्थः— [*द्रवमू''''योः*] द्रवमूर्त्ति अर्थात् तरल पदार्थ के काठिन्य में वर्त्तमान तथा स्पर्श अर्थ में वर्त्तमान [*श्यः*] श्यैङ् धातु को सम्प्रसारण हो जाता है निष्ठा के परे रहते ॥

श्योऽस्पर्शे (८।२।४७) से अस्पर्श विषय में निष्ठा के त को 'न' हुआ है। शेष आत्व (६।१।४४) दीर्घत्वादि (६।४।२) सब पूर्ववत् ही जानें ॥ *उदा०*—शीनं घृतम् (कठोर जमा हुआ घी)। शीना वसा (जमी हुई चर्बी)। शीतं वर्त्तते (शीतल स्पर्श), शीतो वायुः (शीतल स्पर्श युक्त वायु)॥

यहाँ से '*श्यः*' की अनुवृत्ति ६।१।२६ तक जायेगी ॥

प्रतेश्च ॥६।१।२५॥

प्रतेः ५।१॥ च अ०॥ *अनु०*—श्यः, निष्ठायाम्, सम्प्रसारणम् ॥ *अर्थः*—प्रतेरुत्तरस्य श्याधातोर्निष्ठायां परतः सम्प्रसारणं भवति ॥ *उदा०*—प्रतिशीनः, प्रतिशीनवान् ॥

भाषार्थः—[*प्रतेः*] प्रति से उत्तर [*च*] भी श्या धातु को निष्ठा परे रहते, सम्प्रसारण हो जाता है ॥ पूर्व सूत्र से ही सम्प्रसारण प्राप्त था, यहाँ द्रवमूर्त्ति तथा स्पर्श विषय से अन्यत्र भी सम्प्रसारण हो जाये,

इसलिये यह वचन है ॥ सिद्धि पूर्ववत् ही जानें ॥ उदा०—प्रतिशीनः (पिघला हुआ द्रव्य) प्रतिशीनवान् ॥

विभाषाऽभ्यवपूर्वस्य ॥६।१।२६॥

विभाषा १।१॥ अभ्यवपूर्वस्य ६।१॥ स०—अभिश्च अवश्च, अभ्यवौ, अभ्यवौ पूर्वौ यस्य स अभ्यवपूर्वस्तस्य' 'द्वन्द्वगर्भो बहुव्रीहिः ॥ अनु०-श्यः, निष्ठायाम्, सम्प्रसारणम् ॥ *अर्थः*—अभि, अव इत्येवं पूर्वस्य श्याधातोर्निष्ठायां परतो विभाषा सम्प्रसारणं भवति ॥ उदा०—अभिशीनम्, पक्षे—अभिश्यानम् । अवशीनम्, पक्षे—अवश्यानम् ॥ उभयत्र विभाषेयम्, तेन *द्रवमूर्तिस्पर्शयोरपि* सम्प्रसारणं विकल्प्यते ।

भाषार्थः— [*अभ्यवपूर्वस्य*] अभि अव पूर्वक श्या धातु को निष्ठा परे रहते [*विभाषा*] विकल्प से सम्प्रसारण होता है ॥ पक्ष में सम्प्रसारण नहीं भी होगा ॥ सिद्धि पूर्ववत् समझें ॥

यह उभयत्र विभाषा है, अतः अभि अव पूर्वक श्या धातु को इस सूत्र से द्रवमूर्त्तिस्पर्श विवक्षा में भी विकल्प होता है, ऐसा समझना चाहिये ॥

यहाँ से '*विभाषा*' की अनुवृत्ति ६।१।२८ तक जायेगी ॥

शृतं पाके ॥६।१।२७॥

शृतम् १।१॥ पाके ७।१॥ *अनु०*—विभाषा, निष्ठायाम् ॥ *अर्थः*—पाके वाच्ये शृतमिति निपात्यते श्रा पाके इत्येतस्य धातोर्ण्यन्तस्याण्यन्तस्य च क्तप्रत्यये परतः पाकेऽभिधेये शृभावो विभाषा निपात्यते ॥ शृतं क्षीरम्, शृतं हविः ॥ व्यवस्थितविभाषा चेयं तेन क्षीरहविषोर्नित्यं शृभावो भवति अन्यत्र न भवति, यथा—श्राणा यवागूः, श्रपिता यवागूः ॥

भाषार्थः—[*शृतम्*] शृतम् यह शब्द [*पाके*] पाक अभिधेय होने पर निपातन किया जाता है । श्रा पाके धातु चाहे वह ण्यन्त हो या अण्यन्त उसको क्त प्रत्यय के परे रहते विकल्प से पाक अभिधेय होने पर शृभाव निपातन किया जाता है ॥ इस सूत्र में कही विभाषा व्यवस्थित विभाषा है, ऐसा समझना चाहिये ।

व्यवस्थित विभाषा उदाहरण विशेष में विधि, एवं उदाहरण विशेष में ही निषेध करती है, इसलिये यहाँ भी क्षीर तथा हवि विषय में ही

शृ आदेश की विधि तथा अन्यत्र निषेध (शृ आदेश का अभाव) होता है। श्राणा, श्रपिता का प्रयोग क्षीर हवि विषयक पाक से अन्यत्र होता है।

श्राणा में निष्ठा के तकार को नकार *संयोगादेरातो०* (८।२।४३) से हुआ है। ४।१।४ से टाप् हो जायगा। श्रपिता णिजन्त के श्रा धातु से निष्ठा प्रत्यय होकर बना है। *अर्त्तिह्रीव्लीरी०* (७।३।३६) से पुक् आगम हो ही जायगा। *घटादयो मितः* इस धातुपाठ के सूत्र से 'श्रा' के मित् माने जाने से *मितां ह्रस्वः* (६।४।९२) से ह्रस्व भी हो जाता है। श्रा पुक् णिच् त टाप् = श्रापूइ त आ ह्रस्व होकर श्रपिता बन गया ॥

प्यायः पी ॥६।१।२८॥

प्यायः ६।१॥ पी, लुप्तप्रथमान्तनिर्देशः॥ *अनु०*—विभाषा, निष्ठायाम्॥ *अर्थः*—ओप्यायी वृद्धौ इत्येतस्य धातोर्निष्ठायां परतो विभाषा 'पी' इत्ययमादेशो भवति ॥ *उदा०*—पीनं मुखम्, पीनौ बाहू, पीनमुरः। पक्षे न च भवति—आप्यानश्चन्द्रमाः। व्यवस्थितविभाषात्वाद् अनुपसर्गस्य नित्यमादेशः, सोपसर्गस्य तदभावो ज्ञेयः ॥

भाषार्थः—[*प्यायः*] ओप्यायी धातु को निष्ठा परे रहते विकल्प से [*पी*] पी आदेश होता है ॥ यह भी व्यवस्थित विभाषा है, अतः अनुपसर्ग प्या धातु को नित्य 'पी' आदेश होता है, तथा सोपसर्ग को नहीं होता ॥ *ओदितश्च* (८।२।४५) से निष्ठा के त को 'न' पीनं आदि में हुआ है ॥

यहाँ से '*प्यायः पी*' की अनुवृत्ति ६।१।२९ तक जायेगी ॥

लिड्यङोश्च ॥६।१।२९॥

लिड्यङोः ७।२॥ च अ० ॥ *स०*—लिड्यङोरित्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—प्यायः पी॥ *अर्थः*—लिटि यङि च परतः प्यायः 'पी' इत्ययमादेशो भवति ॥ *उदा०*—आपिप्ये, आपिप्याते, आपिप्यिरे। यङि—आपेपीयते, आपेपीयेते, आपेपीयन्ते ॥

भाषार्थः—[*लिड्यङोः*] लिट् तथा यङ् परे रहते [*च*] भी ओप्यायी धातु को पी आदेश होता है ॥

आपिप्ये में द्वित्वादि सब कार्य लिट् लकार में की गई सिद्धियों के सामान हैं, यहाँ केवल 'त' को *लिटस्तझयोरेशिरेच्* (३।४।८१) से एश्

हो जाता है। आपेपीयते भी यङ् की सिद्धि के समान जानें। *गुणो-यङ्लुकोः* (७।४।८२) से अभ्यास को गुण हो ही जायेगा ॥

यहाँ से '*लिड्यङोः*' की अनुवृत्ति ६।१।३० तक जायेगी ॥

विभाषा श्वेः ॥६।१।३०॥

विभाषा १।१॥ श्वेः ६।१॥ *अनु०*—लिड्यङोः, सम्प्रसारणम् ॥ *अर्थः*—लिटि यङि च परतः श्विधातोः सम्प्रसारणं भवति विकल्पेन ॥ *उदा०*—लिटि—शुशाव शिश्वाय, शुशुवतुः शिश्वियतुः। यङि—शोशूयते शेश्वीयते ॥

भाषार्थः—लिट् तथा यङ् परे रहते [*श्वेः*] टुओश्वि धातु को [*विभाषा*] विकल्प से सम्प्रसारण हो जाता है ॥ सिद्धियाँ परि० १।१।४३ में देखें ॥

इस सूत्र में उभयत्र विभाषा है। लिट् लकार में कित् प्रत्यय (द्विवचन बहुवचन) परे रहते *वचिस्वपि०* (६।१।१५) से श्वि धातु को नित्य संप्रसारण प्राप्त था और अकित् प्रत्यय (एकवचन) परे रहते सम्प्रसारण नहीं प्राप्त था। यङ् परे रहते भी श्वि को सम्प्रसारण की प्राप्ति नहीं थी। उभयत्र विभाषा में न वा अर्थों में से प्रथम न का अर्थ प्रवृत्त होता है। तदनुसार श्वि को लिट् तथा यङ् परे सम्प्रसारण नहीं होता इस अर्थ द्वारा श्वि को जहाँ कहीं भी (कित् परे रहते धातु को, प्राप्त सम्प्रसारण का निषेध हो गया। (यङ् में तो प्राप्त ही नहीं था अतः यङ् विषय में न की प्रवृत्ति नहीं होती)। तदनन्तर 'वा' के अर्थ की प्रवृत्ति हुई—श्वि धातु को लिट् और यङ् परे विकल्प से सम्प्रसारण होता है ॥

यहाँ से '*विभाषा श्वेः*' की अनुवृत्ति ६।१।३१ तक जायेगी ॥

णौ च संश्चङोः ॥६।१।३१॥

णौ ७।१॥ च अ०॥ संश्चङोः ७।२॥ *स०*—संश्चङोरित्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—विभाषा श्वेः, सम्प्रसारणम् ॥ *अर्थः*—सन्परे चङ्परे च णौ परतः श्वीत्येतस्य धातोर्विभाषा सम्प्रसारणं भवति ॥ *उदा०*—सन्परे—शुशावयिषति, शिश्वाययिषति। चङ्परे—अशूशवत् अशिश्वयत् ॥

भाषार्थः—[*संश्चङोः*] सन् परे हो, या चङ्परे हो जिस [*णौ*] णिच् के ऐसे णि के परे रहते [च] भी टुओश्वि धातु को विकल्प से सम्प्रसारण हो जाता है ॥

यहाँ से '*णौ च संश्चङोः*' की अनुवृत्ति ६।१।३२ तक जायेगी ॥

ह्वः सम्प्रसारणमभ्यस्तस्य च ॥६।१।३२॥

ह्वः ६।१॥ सम्प्रसारणम् १।१॥ अभ्यस्तस्य ६।१॥ च अ०॥ *अनु०*—णौ च संश्चङोः ॥ *अर्थः*—सन्परे चङ्परे च णौ परतो ह्वः सम्प्रसारणं भवति, अभ्यस्तस्य निमित्तं यो ह्वयतिस्तस्य च सम्प्रसारणं भवति ॥ *उदा०*—जुहावयिषति जुहावयिषतः जुहावयिषन्ति। चङ्परे—अजूहवत्, अजूहवताम्, अजूहवन्। अभ्यस्तस्य—जुहाव जोहूयते, जुहूषति ॥

भाषार्थः—सन्परक चङ्परक णि के परे रहते [*ह्वः*] ह्वेञ् धातु को [*सम्प्रसारणम्*] सम्प्रसारण हो जाता है, तथा [*अभ्यस्तस्य*] अभ्यस्त का निमित्त जो ह्वेञ् धातु उसको [च] भी सम्प्रसारण हो जाता है ॥

विशेषः—'अभ्यस्तस्य च' इस अंश के अर्थ में च से 'ह्वः' का संनियोग होता है, 'अभ्यस्तस्य' तथा 'ह्वः' दोनों षष्ठ्यन्त पद हैं, सो इनका अर्थ "अभ्यस्त के ह्वेञ् धातु को सम्प्रसारण होता है" यह होगा। अब प्रश्न यह है कि अभ्यस्त का ह्वेञ् धातु क्या है, अर्थात् इनका परस्पर क्या सम्बन्ध है सो उसको बताने के लिये अर्थ में निमित्त शब्द जोड़ा गया है, "अभ्यस्त का निमित्त = कारण जो ह्वेञ्" उसे सम्प्रसारण होता है। ऐसा अर्थ करने से यह लाभ होगा, कि जिस ह्वेञ् धातु में अभ्यस्त बनने का अर्थात् द्वित्व करने का निमित्तमात्र (लिट्, सन्, यङ्, आदि) हो उसको अभ्यस्त बनने से (द्वित्व होने से) पूर्व ही सम्प्रसारण हो जाता है ॥

सिद्धि परि० ६।१।३१ के समान ही जानें। ह्वेञ् को आत्व *आदेच उपदेशे०* (६।१।४४) से हो ही जायेगा॥ जुहाव (लिट्) जोहूयते (यङ्) तथा जुहूषति (सन्) सबमें सिद्धि पूर्ववत् जानें॥

यहाँ से 'ह्वः' की अनुवृत्ति ६।१।३३ तक तथा '*सम्प्रसारणम्*' की ६।१।३६ तक जायेगी ॥

बहुलं छन्दसि ॥६।१।३३॥

बहुलम् १।१॥ छन्दसि ७।१॥ *अनु०*—ह्वः सम्प्रसारणम् ॥ *अर्थः*—छन्दसि विषये ह्वेञ्धातोर्बहुलं सम्प्रसारणं भवति ॥ *उदा०*—इन्द्राग्नी हुवे । देवीं सरस्वतीं हुवे । बहुलग्रहणात् न च भवति—ह्वयामि मरुतः शिवान् । ह्वयामि विश्वान् देवान् ॥

भाषार्थः—[*छन्दसि*] वेद विषय में ह्वेञ् धातु को [*बहुलम्*] बहुल करके सम्प्रसारण होता है ॥

हुवे लट् लकार आत्मनेपद का रूप है । 'ह्वे शप् इट्' यहाँ *बहुलं छन्दसि* (२।४।७३) से शप् का लुक् होकर तथा प्रकृत सूत्र से सम्प्रसारण होकर हु ए इ रहा *सम्प्रसारणाच्च* (६।१।१०४) से पूर्वरूप होकर 'हु इ' रहा । (६।४।७७) से 'हु' के 'उ' को उवङ् होकर 'हुव् इ' रहा । पश्चात् *टित आत्मने०* (३।४।७९) से एत्व होकर हुवे बन गया ॥

यहाँ से '*बहुलम्*' की अनुवृत्ति ६।१।३४ तक तथा '*छन्दसि*' की ६।१।३५ तक जायेगी ॥

चायः की ॥६।१।३४॥

चायः ६।१॥ की लुप्तप्रथमान्तनिर्देशः ॥ *अनु०*—बहुलं छन्दसि ॥ *अर्थः*—चायृधातोः छन्दसि विषये बहुलं कीत्ययमादेशो भवति ॥ *उदा०*—विधुना निचिक्युः, नान्यं चिक्युर्न निचिक्युरन्यम् । न च भवति—अग्नेर्ज्योतिर्निचाय्य (य० १।१।१) ॥

भाषार्थः—[*चायः*] चायृ धातु को वेद विषय में बहुल करके [*की*] 'की' आदेश हो जाता है ॥

निचिक्युः यह नि पूर्वक चायृ धातु के लिट् लकार के 'उस्' का रूप है । निचाय्य यहाँ बहुल कहने के कारण 'की' आदेश नहीं होता । निचाय्य रूप क्त्वा को ल्यप् आदेश होकर बना है । नि चाय् क्त्वा = निचाय् ल्यप् = निचाय्य ॥

अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताः श्रितमाशीराशीर्त्ताः ॥६।१।३५॥

अपस्पृधेथाम् तिङ् ॥ आनृचुः तिङ् ॥ आनृहुः तिङ् ॥ चिच्युषे तिङ् ॥ तित्याज तिङ् ॥ श्राताः १।३॥ श्रितम् १।१॥ आशीर् १।१॥

आशीर्त्ताः ११३॥ अनु०—छन्दसि, सम्प्रसारणम्॥ अर्थः—छन्दसि विषये एते शब्दा निपात्यन्ते ॥ अपस्पृधेथाम् इत्यत्र स्पर्धधातोर्लङि आथामि द्विर्वचनं रेफस्य सम्प्रसारणम् अकारलोपश्च निपातनात् भवति॥ अपर आह—अपपूर्वस्य स्पर्धेः लङि, आथामि, सम्प्रसारणमकारलोपश्च निपातनात्। *बहुलं छन्दस्यमाङ्योगेऽपि* (६।४।७५) इत्यडागमो न भवति। अस्मिन् पक्षे द्वित्वस्य नास्त्यावश्यकता॥ इन्द्रश्च विष्णो यदपस्पृधेथाम्। पूर्वस्मिन् पक्षे भाषायाम् अस्पर्धेथाम्, अपरस्मिन् पक्षे अपास्पर्धेथाम् इति भवति। आनृचुः आनृहुरित्यत्र, अर्च पूजायाम्, अर्ह पूजायामित्यनयोः धात्वोः लिटि उसि परतः सम्प्रसारणमकारलोपश्च निपातनाद् भवति॥ य इमा अर्कमानृचुः (ऋ० १।१६।४)। न वसून्यानृहुः। आनर्चुः आनर्हुरिति भाषायाम्॥ चिच्युषे, इत्यत्र च्युङ्गतावित्यस्य धातोः लिटि 'से' (*थासः से* ३।४।८०) परतोऽभ्यासस्य सम्प्रसारणमनिट्त्वञ्च निपातनाद् भवति। चुच्युविषे इति भाषायाम्। तित्याजेत्यत्र त्यजधातोः लिटि परतोऽभ्यासस्य सम्प्रसारणं निपात्यते। तित्याज। तत्याजेति भाषायाम्॥ श्राता इत्यत्र श्रीञ् धातोर्निष्ठायां परतः श्राभावो निपात्यते॥ श्रातास्त इन्द्रसोमाः॥ श्रितमित्यत्र तस्यैव श्रीञ्धातोः निष्ठायां परतो ह्रस्वत्वं निपात्यते॥ सोमो गौरी अधिश्रितः॥ आशीरित्यत्रापि तस्यैव आङ्पूर्वस्य श्रीञ्धातोः क्विपि परतः शीरादेशो निपात्यते॥ तामाशीरा दुहन्ति॥ आशीर्त्ता इत्यत्रापि आङ्पूर्वस्य श्रीञ्धातोः निष्ठायां परतः शीर्भावो निष्ठायाश्च *रदाभ्यां नि०* (८।२।४२) इत्यनेन नत्वे प्राप्तेऽभावो निपात्यते॥ क्षीरैर्मध्यत आशीर्त्तः॥

भाषार्थः—वेद विषय में [*अपस्पृ······शीर्त्ताः*] अपस्पृधेथाम् आदि शब्द निपातन किये जाते हैं॥ अपस्पृधेथाम् यहाँ स्पर्ध धातु से लङ् लकार में आथाम् होकर स्पर्ध को द्विर्वचन तथा रेफ को सम्प्रसारण, एवं धातु के 'प्' से उत्तरवर्ती 'अ' का लोप भी निपातन से होता है॥ स्पर्ध अ आथाम्, द्वित्व होकर, स्पर्ध् स्पर्ध् अ आथाम् रहा, *शर्पूर्वाः खयः* (७।४।६१) लगकर एवं सम्प्रसारण तथा 'प' के 'अ' का लोप होकर प स्प् ऋध् अ आथाम् रहा। *आतो ङितः* (७।२।८१) से 'आ' को इय् एवं *आद् गुणः* (६।१।८४) से गुण एकादेश तथा *लोपो व्योर्वलि* (६।१।६४) से य् का लोप और अडागम होकर अपस्पृधेथाम् बना॥ कई लोगों का मत है कि अप पूर्वक स्पर्ध धातु से लङ् लकार में आथाम् परे रहते

सम्प्रसारण तथा अकार लोप ही निपातन है। इस पक्ष में स्पर्ध को द्वित्व करने की आवश्यकता नहीं पड़ती। *बहुलं छन्दस्यमाङ्योगेऽपि* (६।४।७५) से इस पक्ष में अट् आगम का अभाव भी हो जायेगा।। शेष पहले के समान ही सिद्धि जानें।। भाषा में द्वित्व सम्प्रसारण तथा अकार लोप निपातन से नहीं होगा, अतः प्रथम पक्ष में 'अस्पर्धेथाम्' और द्वितीय पक्ष में 'अपास्पर्धेथाम्' रूप बनेगा। आनृचुः आनृहुः में अर्च पूजायाम् अर्ह पूजायाम् धातु से लिट् लकार के उस् परे रहते रेफ को सम्प्रसारण तथा अकार लोप निपातन से किया जाता है।। अर्च् लिट् = अर्च् झि = अर्च उस् = ६।१।८ से द्वित्व होकर अर्च् अर्च् उस् = अ अर्च् उस् रहा। *अत आदेः* (७।४।७०) से अभ्यास को दीर्घ तथा *तस्मान्नुड् द्विहलः* (७।४।७१) से नुट् आगम होकर आ नुट् अर्च् उस् = आन् अर्च् उस् रहा। निपातन से अर्च् के अ का लोप तथा सम्प्रसारण होकर आन् ऋच् उस् = आनृचुः बन गया। इसी प्रकार आनृहुः में जानें।। भाषा में सम्प्रसारण तथा अकारलोप नहीं होगा तो आनर्चुः आनर्हुः बनेगा।।

चिच्युषे में च्युङ् गतौ धातु से लिट् लकार के 'से' (*थासः से*) परे रहते अभ्यास को सम्प्रसारण तथा अनिट्त्व निपातन किया जाता है।। च्यु च्यु से = निपातन से सम्प्रसारण होकर च् इ उ च्यु से = चि च्यु से = चिच्युषे बन गया। *आर्धधातुकस्येड्०* (७।२।३५) से इट् आगम प्राप्त था निपातन से अनिट्त्व भी कर दिया गया। भाषा में चुच्युविषे बनेगा।।

तित्याज में त्यज हानौ धातु से लिट् के णल् परे रहते अभ्यास को सम्प्रसारण निपातन किया गया है।। भाषा में तत्याज ही बनेगा।। श्राता यहाँ श्रीञ् धातु को निष्ठा (क्त) परे रहते श्रा भाव निपातन है।। श्रातास्त इन्द्रसोमाः।।

श्रितम् यहाँ श्रीञ् धातु को निष्ठा परे रहते ह्रस्वत्व निपातन है। श्रिता नो गृहाः।।

आशीर् में आङ् पूर्वक श्रीञ् धातु को क्विप् परे रहते शीर् आदेश निपातन है। तामाशीरा दुहन्ति।।

आशीर्त्ता यहाँ भी आङ् पूर्वक श्रीञ् धातु को निष्ठा परे रहते शीर् भाव तथा *रदाभ्यां निष्ठातो०* (८।२।४२) से प्राप्त निष्ठा के त को न का अभाव निपातन किया गया है। त्रीरैमध्यत आशीर्त्तः (ऋ०.८।२।९)।।

न सम्प्रसारणे सम्प्रसारणम् ॥६।१।३६॥

न अ० ॥ सम्प्रसारणे ७।१॥ सम्प्रसारणम् १।१॥ *अर्थः*—सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न भवति ॥ *उदा०*—व्यध—विद्धः । व्यच—विचितः । व्येञ्—संवीतः ॥

भाषार्थः—[*सम्प्रसारणे*] सम्प्रसारण परे रहते [*सम्प्रसारणम्*] सम्प्रसारण [*न*] नहीं होता ॥ वाक्य तथा वर्ण दोनों की सम्प्रसारण संज्ञा होती है, यह बात *इग्यणः०* (१।१।४४) सूत्र में कही गई है। जहाँ सम्प्रसारण कहा हो वहाँ यदि दो यण् हों तो दोनों को सम्प्रसारण होना चाहिये पर इष्ट ऐसा है नहीं, अतः सम्प्रसारणसंज्ञक इक् के परे रहते पूर्व यण् को सम्प्रसारण नहीं होता, अर्थात् पहले पर वाले यण् को इक् होगा उसके परे रहने पर पूर्व को निषेध हो जायेगा। व्यध व्यच आदि में व् य् दोनों सम्प्रसारण भावी यण् थे, सो प्रकृत सूत्र से पूर्व यण् को सम्प्रसारण का निषेध होता है। पर यण् (य) को सम्प्रसारण ६।१।१६ से हो गया ॥

व्यध क्त = विध् त = *झषस्तथो०* (८।२।४०) लगकर विध् ध् रहा। *झलां जश् झशि* (८।४।५२) से ध् को द् होकर विद्धः बन गया है ॥

यहाँ से '*न सम्प्रसारणम्*' की अनुवृत्ति ६।१।४३ तक जायेगी।

लिटि वयो यः ॥६।१।३७॥

लिटि ७।१॥ वयः ६।१॥ यः ६।१॥ *अनु०*—न सम्प्रसारणम् ॥ *अर्थः*—लिटि परतो वयो यकारस्य सम्प्रसारणं न भवति ॥ *उदा०*—उवाय, ऊयतुः, ऊयुः ॥

भाषार्थः—[*लिटि*] लिट् लकार परे रहते [*वयः*] वय् के [*यः*] यकार को सम्प्रसारण नहीं होता ॥ *लिट्य०* (६।१।१७) *ग्रहिज्या०* (६।१।१६) से सम्प्रसारण प्राप्त था, जिसमें पूर्व सूत्र के ज्ञापन से प्रथम पर यण् को (य् को) सम्प्रसारण प्राप्त हुआ, उसका यह निषेध सूत्र है। यकार को सम्प्रसारण का निषेध

---

१. सम्प्रसारण परे रहते पूर्व यण् को सम्प्रसारण के निषेध से ज्ञापन होता है कि जहाँ सम्प्रसारणभावी एक से अधिक यण् होते हैं, वहाँ प्रथम पर यण् को सम्प्रसारण होता है।

हो जाने पर 'व्' को सम्प्रसारण होता है। सिद्धि परि० २।४।४१ में देखें ॥

यहाँ से '*वयो यः*' की अनुवृत्ति ६।१।३८ तक तथा '*लिटि*' की ६।१।३९ तक जायेगी ॥

वश्चास्यान्यतरस्यां किति ॥६।१।३८॥

वः १।१॥ च अ० ॥ अस्य ६।१॥ अन्यतरस्याम् ७।१॥ किति ७।१॥ *अनु०*—लिटि वयो यः ॥ *अर्थः*—अस्य वयो यकारस्य किति लिटि परतो विकल्पेन वकारादेशो भवति ॥ *उदा०*—ऊवतुः, ऊवुः, ऊयतुः, ऊयुः ॥

भाषार्थः—[*अस्य*] इस वय् के यकार को [*किति*] कित् लिट् परे रहते [*वः*] वकारादेश [*च*] भी [*अन्यतरस्याम्*] विकल्प करके हो जाता है ॥ *असंयोगाल्लिट् कित्* (१।२।५) से अतुस् उस् कित्वत् हैं ही, सो ऊवतुः ऊवुः ऊयतुः ऊयुः दो रूप बनें ॥ सूत्र में 'अस्य' निर्देश पूर्व सूत्र द्वारा जिस यकार को सम्प्रसारण का निषेध किया है उसका है अतः निषेध किये हुए सम्प्रसारण वाले यकार के स्थान पर होने वाले वकार को भी सम्प्रसारण नहीं होता ॥ सिद्धि परि० २।४।४१ में देख लें ॥

वेञः ॥६।१।३९॥

वेञः ६।१॥ *अनु०*—लिटि, न सम्प्रसारणम् ॥ *अर्थः*—वेञ् तन्तु-सन्ताने, इत्यस्य धातोर्लिटि परतः सम्प्रसारणं न भवति ॥ *उदा०*—ववौ, ववतुः, ववुः ॥

भाषार्थः—[*वेञः*] वेञ् धातु को लिट् परे रहते सम्प्रसारण नहीं होता ॥ *वचिस्वपियजा०* (६।१।१५) से कित् परे रहते सम्प्रसारण प्राप्त था, तथा पित् स्थानी णल् थल् में भी *लिट्यभ्यासस्यो०* (६।१।१७) से सम्प्रसारण प्राप्त था, उन दोनों का यह निषेध सूत्र है ॥

यहाँ से '*वेञः*' की अनुवृत्ति ६।१।४० तक जायेगी ॥

ल्यपि च ॥६।१।४०॥

ल्यपि ७।१॥ च अ० ॥ *अनु०*—वेञः, न सम्प्रसारणम् ॥ *अर्थः*—ल्यपि च परतो वेञः सम्प्रसारणं न भवति ॥ *उदा०*—प्रवाय, उपवाय ॥

भाषार्थः—[*ल्यपि*] ल्यप् परे रहते [*च*] भी वेञ् को सम्प्रसारण नहीं होता ॥ स्थानिवत् से ल्यप् कित् माना गया, सो कित् परे होने से

वचिस्वपियजा० (६।१।१५) से सम्प्रसारण प्राप्त था, उसका निषेध हो गया। *आदेच उप०* (६।१।४४) से वेञ् को आत्व हो ही जायेगा ॥

यहाँ से '*ल्यपि*' की अनुवृत्ति ६।१।४३ तक जायेगी ॥

ज्यश्च ॥६।१।४१॥

ज्यः ६।१॥ च अ० ॥ *अनु०*—ल्यपि, न सम्प्रसारणम् ॥ *अर्थः*—ज्याधातोर्ल्यपि परतः सम्प्रसारणं न भवति ॥ *उदा०*—प्रज्याय, उपज्याय ॥

भाषार्थः—ल्यप् परे रहते [*ज्यः*] ज्या धातु को [च] भी सम्प्रसारण नहीं होता ॥ *ग्रहिज्या०* (६।१।१६) से सम्प्रसारण प्राप्त था, निषेध कर दिया ॥

व्यश्च ॥६।१।४२॥

व्यः ६।१॥ च अ० ॥ *अनु०*—ल्यपि, न सम्प्रसारणम् ॥ *अर्थः*—व्येञ्धातोर्ल्यपि परतः सम्प्रसारणं न भवति ॥ *उदा०*—प्रव्याय ॥

भाषार्थः—[*व्यः*] व्येञ् धातु को [च] भी ल्यप् परे रहते सम्प्रसारण नहीं होता ॥ व्येञ् को आत्व ६।१।४४ से हो ही जायेगा ॥ पूर्ववत् सम्प्रसारण प्राप्त था निषेध कर दिया ॥

यहाँ से '*व्यः*' की अनुवृत्ति ६।१।४३ तक जायेगी ॥

विभाषा परेः ॥६।१।४३॥

विभाषा १।१॥ परेः ५।१॥ अनु०—व्यः, ल्यपि, न सम्प्रसारणम् ॥ *अर्थः*—परेरुत्तरस्य व्येञ्धातोर्ल्यपि परतो विभाषा सम्प्रसारणं न भवति ॥ *उदा०*—परिवीय यूपम् । पक्षे—परिव्याय ॥

भाषार्थः—[*परेः*] परि उपसर्ग से उत्तर व्येञ् धातु को [*विभाषा*] विकल्प करके सम्प्रसारण नहीं होता ॥ परि व्या ल्यप् = *न सम्प्रसारणे०* (६।१।३६) के नियम से 'य्' को सम्प्रसारण ६।१।१५ से हुआ। परि व् इ आ य = परिविय = *हलः* (६।४।२) से दीर्घ होकर परिवीय बन गया ॥

[*आत्वप्रकरणम्*]

आदेच उपदेशेऽशिति ॥६।१।४४॥

आत् ५।१॥ एचः ६।१॥ उपदेशे ७।१॥ अशिति ७।१॥ *स०*—श् इत् यस्य स शित्, न शित् अशित् तस्मिन्.....बहुव्रीहिगर्भनञ्-तत्पुरुषः ॥ *अर्थः*—उपदेशावस्थायां य एजन्तो धातुस्तस्याकारादेशो भवति शिति प्रत्यये परतस्तु न भवति । *उदा०*—ग्लै—ग्लाता, ग्लातुम्, ग्लातव्यम् । शो—निशाता, निशातुम्, निशातव्यम् ॥

भाषार्थः—[*उपदेशे*] उपदेश अवस्था में जो [*एचः*] एजन्त धातु उसको [*आत्*] आकारादेश हो जाता है, [*अशिति*] शित् प्रत्यय परे हो तो नहीं होता ॥ *अलोऽन्त्यस्य* (१।१।५१) से अन्तिम अल् एच् को ही आत्व होता है ॥ यहाँ *लिटि धातो०* (६।१।८) से धातोः की अनुवृत्ति मण्डूकप्लुति से जाननी चाहिये ॥

यहाँ से '*आदेचः*' की अनुवृत्ति ६।१।५६ तक तथा '*उपदेशे*' की ६।१।६३ तक जायेगी ॥

न व्यो लिटि ॥६।१।४५॥

न अ० ॥ व्यः ६।१॥ लिटि ७।१॥ *अनु०*—आदेच उपदेशे ॥ *अर्थः*—व्येञ्धातोरेचः स्थाने लिटि परत आकारादेशो न भवति ॥ *उदा०*—संविव्याय, संविव्ययिथ ॥

भाषार्थः—उपदेश में एजन्त जो [*व्यः*] व्येञ् धातु उसको [*लिटि*] लिट् परे रहते आकारादेश [*न*] नहीं होता ॥ पूर्ववत् द्वित्वादि होकर 'व्ये व्ये णल्' रहा । *लिट्यभ्यासस्यो०* (६।१।१७) एवं *न सम्प्रसारणे०* (६।१।३६) के नियम से अभ्यास के पर यण् य् को सम्प्रसारण होकर 'वि व्ये अ' रहा । णल् को मानकर ए को ऐ वृद्धि तथा आयादेश होकर संविव्याय बना । संविव्ययिथ में *इडत्यर्त्तिव्ययतीनाम्* (७।२।६६) से इट् आगम हो जाता है ॥

स्फुरतिस्फुलत्योर्घञि ॥६।१।४६॥

स्फुरतिस्फुलत्योः ६।२॥ घञि ७।१॥ *स०*—स्फुरति० इत्यत्रेतरेतर-द्वन्द्वः ॥ *अनु०*—आदेचः ॥ *अर्थः*—स्फुर स्फुल संचलने इत्येतयोः धात्वो-

रेचः स्थान आकारादेशो भवति घञि परतः ।। उदा०—विस्फार विस्फालः । विष्फारः विष्फालः ।।

भाषार्थः—[*स्फुरतिस्फुलत्योः*] स्फुर तथा स्फुल धातुओं के एच् के स्थान में [*घञि*] घञ् परे रहते आकारादेश हो जाता है ।। स्फुर स्फुल को गुण कर लेने पर जो एच् होता है उसको आत्व इस सूत्र से होता है क्योंकि उपदेशावस्था में तो एच् है नहीं, अतः उपदेश की अनुवृत्ति यहाँ एवं इसी प्रकार अन्यत्र जहाँ उपदेश में एच् न हो सम्बद्ध नहीं होती । उदाहरणों में विकल्प से षत्व *स्फुरतिस्फुलत्योर्निर्निविभ्यः* (८।३।७६) से होता है ।।

क्रीङ्जीनां णौ ।।६।१।४७।।

क्रीङ्जीनाम् ६।३।। णौ ७।१।। *स०*-क्री च इङ् च जिश्च क्रीङ्जयस्तेषां इतरेतरद्वन्द्वः ।। *अनु०*—आदेचः ।। *अर्थः*—डुक्रीञ् इङ् जि इत्येतेषां धातूनामेचः स्थान आकारादेशो भवति णौ परतः ।। *उदा०*—क्रापयति अध्यापयति, जापयति ।।

भाषार्थः—[*क्रीङ्जीनाम्*] डुक्रीञ् द्रव्यविनिमये, इङ् अध्ययने, जि जये इन धातुओं के एच् के स्थान में [*णौ*] णिच् परे रहते आकारादेश हो जाता है ।। भाग १ परि० ३।३।१६६ के अध्यापय के समान ही अध्यापयति की सिद्धि में 'अध्यापि' धातु बनाकर शप् तिप् लाकर सिद्धि जानें ।। शेष क्री तथा जि को भी गुण होकर प्रकृत सूत्र से आत्व करके पुक् आगम करके पूर्ववत् सिद्धि जानें ।।

यहाँ से '*णौ*' की अनुवृत्ति ६।१।४८ तक जायेगी ।।

सिध्यतेरपारलौकिके ।।६।१।४८।।

सिध्यतेः ६।१।। अपारलौकिके ७।१।। परलोकः प्रयोजनमस्येति पारलौकिकः । *प्रयोजनम्* (५।१।१०८) इति ठञ्, अनुशतिकादित्वाच्च (७।३।२०) उभयपदवृद्धिः ।। *स०*—अपारलौ० इत्यत्र नञ्तत्पुरुषः । *अनु०*—णौ, आदेचः ।। *अर्थः*—अपारलौकिकेऽर्थे वर्त्तमानस्य षिधु धातोरेचः स्थाने णौ परत आकारादेशो भवति ।। *उदा०*—अन्नं साधयति, ग्रामं साधयति ।।

भाषार्थः—[*सिध्यतेः*] 'षिधु हिंसासंराध्योः' धातु यदि [*अपारलौकिके*] अपारलौकिक अर्थ में वर्त्तमान हो तो उसके एच् के स्थान में णिच् परे रहते आकारादेश हो जाता है ॥ अन्नं साधयति (अन्न को पकाता है) यहाँ उदाहरणों में परलोक को सिद्ध करना अर्थ नहीं है, अतः आत्व हो गया है। सिध् को सेध् गुण करके आत्व होता है ॥

मीनातिमिनोतिदीङां ल्यपि च ॥६।१।४९॥

मीनातिमिनोतिदीङाम् ६।३॥ ल्यपि ७।१॥ च अ० ॥ *स०*—मीनातीत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—आदेच उपदेशे ॥ *अर्थः*—मीञ् हिंसायाम्, डुमिञ् प्रक्षेपणे, दीङ् क्षये इत्येतेषां धातूनां ल्यपि विषये चकारादेचश्च विषय उपदेश एवाकारादेशो भवति ॥ *उदा०*—प्रमाता प्रमातुं प्रमातव्यम्। ल्यपि—प्रमाय। डुमिञ्—निमाता निमातुं निमातव्यम्। ल्यपि—निमाय। दीङ्—उपदाता उपदातुम् उपदातव्यम्। ल्यपि—उपदाय।

भाषार्थः—[*मीनातिमिनोतिदीङाम्*] मीञ् डुमिञ् तथा दीङ् धातुओं को [*ल्यपि*] ल्यप् परे रहते [च] तथा एच् के विषय में भी उपदेश अवस्था में ही आत्व हो जाता है ॥ एच् विषय में ही अर्थात् एच् बनने की सम्भावना होने पर ही आत्व विधान करने से *अलोन्त्यस्य* (१।१।५१) से अन्तिम अल् को आत्व एच् बनने से पूर्व ही हो जाता है[1]। तृच् तुमुन् तव्य प्रत्यय के परे रहते गुण सम्भव है, अतः ये एच् विषयक हैं सो इनका विषय उपस्थित होगा यह मानकर पूर्व ही आत्व हो जाता है। ल्यप् स्थानिवत् से कित् है अतः यहाँ गुण सम्भव नहीं सो ल्यप् का पृथक् ग्रहण है ॥

यहाँ से '*ल्यपि*' की अनुवृत्ति ६।१।५० तक जायेगी ॥

विभाषा लीयतेः ॥६।१।५०॥

विभाषा १।१॥ लीयतेः ६।१॥ अनु०—ल्यपि, आदेच उपदेशे ॥

---

१. इसका फल यह है कि 'उपदायो वर्तते' में इकारान्तलक्षण (३।३।५६) अच् नहीं होता, घञ् होता है 'ईषदुपदानम्' में *आतो युच्* (३।३।१२८) से आकारान्त लक्षण युच् हो जाता है ॥

अर्थः—लीङ् श्लेषणे ली श्लेषणे इति द्वयोरपि ग्रहणम्। लीयतेर्धातोर्ल्यपि च, एचश्च विषय उपदेश एव विभाषाऽऽकारादेशो भवति॥ *उदा०*—विलाता, विलातुम्, विलातव्यम्। ल्यपि—विलाय। पक्षे—विलेता, विलेतुम्, विलेतव्यम्। ल्यपि—विलीय॥

भाषार्थः—लीङ् श्लेषणे तथा ली श्लेषणे दोनों धातुओं का यहाँ ग्रहण है। [*लीयतेः*] ली धातु को ल्यप् परे रहते तथा एच् विषय में [*विभाषा*] विकल्प से उपदेश अवस्था में ही आत्व हो जाता है॥ पूर्व सूत्र के समान यहाँ भी एच् विषय में *अलोऽन्त्यस्य* से आत्व होगा ऐसा जानें॥

यहाँ से '*विभाषा*' की अनुवृत्ति ६।१।५५ तक जायेगी॥

खिदेश्छन्दसि ॥६।१।५१॥

खिदेः ६।१॥ छन्दसि ७।१॥ *अनु०*—विभाषा, आदेचः॥ *अर्थः*—खिद दैन्ये धातोरेचः स्थाने छन्दसि विषये विकल्पेन आकारादेशो भवति॥ *उदा०*—चित्तं चखाद, चित्तं चिखेद॥

भाषार्थः—[*खिदेः*] खिद धातु के एच् के स्थान में [*छन्दसि*] वेद विषय में विकल्प से आत्व होता है॥ प्रथम खिद धातु को लिट् में गुण होकर प्रकृत सूत्र से आत्व करने पर द्वित्व एवं अभ्यास कार्य करके चखाद बन गया, पक्ष में चिखेद रहा॥

अपगुरो णमुलि ॥६।१।५२॥

अपगुरः ६।१॥ णमुलि ७।१॥ *स०*—अपात् गुर् अपगुर् तस्मात्... पञ्चमीतत्पुरुषः॥ *अनु०*—विभाषा, आदेचः॥ *अर्थः*—अपपूर्वस्य गुरी उद्यमने धातोर्णमुलि परत एचः स्थाने विभाषा आकारादेशो भवति॥ *उदा०*—अपगारमपगारम्। अपगोरमपगोरम्॥

भाषार्थः—[*अपगुरः*] अप पूर्वक गुरी उद्यमने धातु के एच् के स्थान में [*णमुलि*] णमुल् परे रहते विकल्प से आत्व हो जाता है॥ उदाहरण में *आभीक्ष्ण्ये णमुल्च* (३।४।२२) से णमुल् प्रत्यय तथा *आभीक्ष्ण्ये द्वे भवतः* (*वा०*८।१।१२) वार्त्तिक से 'अपगारम्' को द्वित्व हुआ है॥

चिस्फुरोर्णौ ॥६।१।५३॥

चिस्फुरोः ६।२॥ णौ ७।१॥ *स०*—चिश्च स्फुर् च चिस्फुरौ तयोः··· इतरेतरद्वन्द्वः ॥ *अनु०*—विभाषा आदेचः ॥ *अर्थः*—चि स्फुर इत्येतयोः धात्वोरेचः स्थाने णौ परत विकल्पेनाकारादेशो भवति ॥ *उदा०*—चापयति, चाययति । स्फारयति, स्फोरयति ॥

भाषार्थः—[*चिस्फुरोः*] चि तथा स्फुर धातुओं के एच् के स्थान में [*णौ*] णिच् परे रहते विकल्प से आत्व हो जाता है ॥ आत्व पक्ष में 'चापयति' में *अर्त्तिह्रीव्ली०* (७।३।३६) से पुक् आगम तथा अनात्व पक्ष में चि को चै वृद्धि एवं आयादेश होकर 'चायि अ ति' रहा । पश्चात् गुण एवं अयादेश होकर चाययति बना ॥

यहाँ से '*णौ*' की अनुवृत्ति ६।१।५६ तक जायेगी ॥

प्रजने वीयतेः ॥६।१।५४॥

प्रजने ७।१॥ वीयतेः ६।१॥ *अनु०*—णौ, विभाषा, आदेचः ॥ *अर्थः*—प्रजनेऽर्थे वर्त्तमानस्य 'वी' इत्यस्य धातोर्णौ परत विकल्पेनाकारादेशो भवति ॥ *उदा०*—पुरो वातो गाः प्रवापयति । प्रवाययति ॥

भाषार्थः—[*प्रजने*] प्रजन अर्थ में वर्त्तमान [*वीयतेः*] वी धातु के एच् के स्थान में विकल्प से आकारादेश हो जाता है, णिच् परे रहते ॥ पूर्ववत् आत्व पक्ष में पुक् आगम तथा अनात्व पक्ष में वृद्धि आदि कार्य जानें ॥ *उदा०*—पुरो वातो गाः प्रवापयति (पूर्व दिशा का वायु गौओं को गर्भ धारण कराता है) । प्रवाययति ॥

बिभेतेर्हेतुभये ॥६।१।५५॥

बिभेतेः ६।१॥ हेतुभये ७।१॥ *स०*—हेतोर्भयम् हेतुभयम्, तस्मिन् पञ्चमीतत्पुरुषः ॥ *अनु०*—णौ, विभाषा, आदेचः ॥ *अर्थः*—हेतुभयेऽर्थे वर्त्तमानस्य 'ञिभी भये' इत्यस्य धातोरेचः स्थाने णौ परतो विकल्पेनाकारादेशो भवति । स्वतन्त्रस्य कर्त्तुः प्रयोजकः (१।४।५५) हेतुरिह गृह्यते ॥ *उदा०*—मुण्डो भापयते, मुण्डो भीषयते । जटिलो भापयते, जटिलो भीषयते ॥

भाषार्थः—स्वतन्त्र कर्त्ता का जो प्रयोजक वह 'हेतु' शब्द से यहाँ लिया गया है, ऐसा साक्षात् हेतु जहाँ भय का कारण बन रहा हो उस

अर्थ में अर्थात् [*हेतुभये*] हेतु से भय अर्थ में वर्त्तमान [*बिभेतेः*] ञिभी धातु के एच् के स्थान में णिच् परे रहते विकल्प से आत्व होता है ॥ भीषयते की सिद्धि भाग १ पृ० ७१५ में देखें। यह अनात्व पक्ष का रूप है, आत्व पक्ष में पुक् आगम होगा, शेष भीषयते के समान जानें ॥

यहाँ से '*हेतुभये*' की अनुवृत्ति ६।१।५६ तक जायेगी ॥

नित्यं स्मयतेः ॥६।१।५६॥

नित्यम् १।१॥ स्मयतेः ६।१॥ *अनु०*—हेतुभये, णौ, आदेचः ॥ *अर्थः*—हेतुभयेऽर्थे स्मिङ् ईषद्धसने इत्यस्य धातोरेचः स्थाने णौ परतो नित्यमात्वं भवति ॥ *उदा०*—मुण्डो विस्मापयते, जटिलो विस्मापयते ॥

भाषार्थः—हेतुभय अर्थ में वर्त्तमान [*स्मयतेः*] स्मिङ् धातु के एच् के स्थान में णिच् परे रहते [*नित्यम्*] नित्य ही आत्व हो जाता है ॥ यहाँ भी हेतु शब्द का पूर्ववत् अर्थ समझें ॥ विस्मापयते में *भीस्म्योर्हेतुभये* (१।३।६८) से आत्मनेपद तथा पूर्ववत् पुक् का आगम होता है ॥

सृजिदृशोर्झल्यमकिति ॥६।१।५७॥

सृजिदृशोः ६।२॥ झलि ७।१॥ अम् १।१॥ अकिति ७।१॥ *स०*—सृजि० इत्यत्रेतरेतरद्वन्द्वः। अकितीत्यत्र नञ्तत्पुरुषः॥ *अर्थः*—सृज विसर्गे, दृशिर् प्रेक्षणे, इत्येतयोः धात्वोरमागमो भवति झलादावकिति प्रत्यये परतः ॥ *उदा०*—स्रष्टा, स्रष्टुम्, स्रष्टव्यम्। द्रष्टा, द्रष्टुम्, द्रष्टव्यम् ॥

भाषार्थः—[*सृजिदृशोः*] सृज और दृशिर् धातु को [*अकिति*] कित् भिन्न [*झलि*] झलादि प्रत्यय परे हो तो [*अम्*] अम् आगम होता है ॥ दृश् तृच् यहाँ अम् आगम *मिदचो०* (१।१।४६) से अन्त्य अच् से परे होकर सृ अम् ज् तृ रहा यणादेश तथा *व्रश्चभ्रस्ज०* (८।२।३६) से षत्व एवं ष्टुत्व होकर 'स्र ष्टृ' रहा। शेष कार्य तृजन्त की सिद्धि के समान होकर स्रष्टा (बनाने वाला) बना। इसी प्रकार अन्यत्र भी जानें ॥

यहाँ से '*झल्यमकिति*' की अनुवृत्ति ६।१।५८ तक जायेगी ॥

अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् ॥६।१।५८॥

अनुदात्तस्य ६।१॥ च अ० ॥ ऋदुपधस्य ६।१॥ अन्यतरस्याम् ७।१॥ स०—ऋकार उपधा यस्य स ऋदुपधस्तस्य......बहुव्रीहिः ॥ *अनु०*—झल्यमकिति, उपदेशे ॥ *अर्थः*—उपदेशेऽनुदात्तस्य ऋकारोपधस्य धातोर्झलादावकिति प्रत्यये परतो विकल्पेनामागमो भवति ॥ *उदा०*—त्रप्ता, तर्पिता, तर्प्ता । द्रप्ता, दर्पिता दर्प्ता ॥

भाषार्थः—उपदेश में जो [*अनुदात्तस्य*] अनुदात्त [*च*] तथा [*ऋदुपधस्य*] ऋकार उपधा वाली धातु उसको अम् आगम [*अन्यतरस्याम्*] विकल्प से अकित् झलादि प्रत्यय परे रहते हो जाता है ॥ तृप दृप धातु को *रधादिभ्यश्च* (७।२।४५) से इट् भी विकल्प से होता है सो पक्ष में तर्पिता, दर्पिता रूप बनेगा। जब अम् आगम होगा तो त्रप्ता द्रप्ता तथा जब पक्ष में अम् तथा इट् नहीं होगा तो गुण होकर तर्प्ता दर्प्ता बनेगा। तृप् दृप् धातुएं ऋकारोपध तथा अनिट् हैं।

शीर्षश्छन्दसि ॥६।१।५९॥

शीर्षन् १।१॥ छन्दसि ७।१॥ *अर्थः*—शीर्षन् इति निपात्यते छन्दसि विषये। न पुनरयमादेशः शिरःशब्दस्य, किन्तु शिरःशब्देन समानार्थको भिन्नोऽयं शब्दः ॥[1] *उदा०*—शीर्ष्णा हि तत्र सोमं क्रीतं हरन्ति। यत्ते शीर्ष्णो दौर्भाग्यम् ॥

भाषार्थः—[*शीर्षन्*] शीर्षन् शब्द [*छन्दसि*] वेद विषय में निपातन किया जाता है ॥ शिरस् शब्द का पर्यायवाची यह शीर्षन् शब्द पृथक् निपातित है, न कि शिरस् को शीर्षन् आदेश निपातित किया है ॥ शीर्ष्णा यह तृतीयान्त तथा शीर्ष्णः षष्ठ्यन्त का रूप है। *अल्लोपोऽनः* (६।४।१३४) से यहाँ अकार लोप हुआ है ॥

यहाँ से '*शीर्षन्*' की अनुवृत्ति ६।१।६० तक जायेगी ॥

ये च तद्धिते ॥६।१।६०॥

ये ७।१॥ च अ० ॥ तद्धिते ७।१॥ *अनु०*—शीर्षन् ॥ *अर्थः*—यका-

---

१. आदेशनिपातने वेदे शिरसः प्रयोगो न स्यात्। दृश्यते च तस्यापि प्रयोग इति कृत्वा प्रकृत्यन्तरं निपात्यते।

रादौ तद्धिते परतः शिरःशब्दस्य शीर्षन्नादेशो भवति । आदेशोऽयमिष्यते शिरःशब्दस्य[1] ॥ उदा०—शीर्षण्यो हि मुख्यो भवति । शीर्षण्यः स्वरः ॥

भाषार्थः—[*ये*] यकारादि [*तद्धिते*] तद्धित के परे रहते [*च*] भी शिरस् को शीर्षन् आदेश हो जाता है ॥ इस सूत्र में शीर्षन् भिन्न शब्द इष्ट नहीं किन्तु शिरस् को शीर्षन् आदेश इष्ट है ॥ शिरसि भवः शीर्षण्यः यहाँ *शरीरावयवाच्च* (४।३।५५) से यत् तद्धित प्रत्यय हुआ है । *नस्तद्धिते* से यहाँ टिलोप *ये चाभावकर्मणोः* (६।४।१६८) से प्रकृतिभाव होने के कारण नहीं होता ॥

पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ॥६।१।६१॥

पद्दन्नो……सन्, सर्वे पृथक् पृथक् लुप्तप्रथमान्तनिर्दिष्टाः ॥ शस्प्रभृतिषु ७।३॥ *स०*—शस् प्रभृतयः = प्रकाराः येषां ते शस्प्रभृतयस्तेषु… बहुव्रीहिः ॥ *अनु०*—मण्डूकप्लुतगत्या 'छन्दसि' इत्यनुवर्त्तते ॥ *अर्थः*—पाद, दन्त, नासिका, मास, हृदय, निशा, असृज्, यूष, दोष, यकृत्, शकृत् उदक आस्य इत्येतेषां स्थाने यथासङ्ख्यं पद्, दत्, नस्, मास्, हृत्, निश्, असन्, यूषन्, दोषन्, यकन्, शकन्, उदन्, आसन् इत्येते आदेशा भवन्ति, छन्दसि विषये शस्प्रभृतिषु प्रत्ययेषु परतः ॥ आदेशानुरूपप्रकृत्याक्षेपात् स्थानिनः परिज्ञानं भवति ॥ *उदा०*—पद्—निपद्श्चतुरो जहि । पदा वर्त्तय गोदुहम् । दत्—या दतो धावति तस्यै श्यावदन् । नस्—सूकरस्त्वखनन्नसा । मास्—मासि त्वा पश्यामि चक्षुषा । हृत—हृदा पूतेन मनसा जातवेदसम् । निश्—अमावास्यायां निशि यजेत । असन्—असिक्तोऽस्नावरोहति । यूषन्—या पात्राणि यूष्ण आसेचनानि । दोषन्—यत्ते दोष्णो दौर्भाग्यम् । यकन्—यक्नोऽवद्यति । शकन्—शक्नोऽवद्यति । उदन्—उद्नो दिव्यस्य नावा ते । आस्य—आसनि किं लभे मधूनि ॥

भाषार्थः—यहाँ स्थानी का निर्देश नहीं किया गया, केवल आदेश गिनाये हैं, सो अर्थ के अनुसार आदेश के अनुरूप स्थानी का आक्षेप कर

---

१. आदेशविधानात् 'शिरस्यः' इति प्रयोगो न भवति । केशेषु तु 'वा केशेषु' इति वार्त्तिकेन शीर्षण्यः शिरस्य इत्युभयं भवति ।

लिया जायेगा, अतः सूत्रार्थ होगा—पाद, दन्त, नासिका, मास, हृदय, निशा, असृज्, यूष, दोष, यकृत्, शकृत्, उदक, आस्य इन के स्थान में यथासङ्ख्य करके [पद्दन्नो...सन्] पद्, दत्, नस्, मास्, हृत्, निश्, असन्, यूषन्, दोषन्, यकन्, शकन्, उदन्, आसन्, ये आदेश [शस्प्रभृतिषु] शस् प्रकार वाले अर्थात् शस् से आगे के प्रत्ययों के परे रहते वेद विषय में हो जाते हैं ॥ यूष्णः, दोष्णः, यक्नः शक्नः उद्नः ये षष्ठ्यन्त पद हैं, *अल्लोपोनः* (६।४।१३४) से यहाँ अकार लोप हुआ है। णत्वादि कार्य पूर्ववत् जान लें। अस्ना (३।१) यहाँ *अल्लोपोनः* से लोप जानें। आसनि (७।१) यहाँ *विभाषा ङिश्योः* (६।४।१३६) से पक्ष में अकार लोप नहीं हुआ है। शेष पद षष्ठ्यन्त तृतीयान्त एवं सप्तम्यन्त हैं, सो सुस्पष्ट ही हैं ॥

धात्वादेः षः सः ॥६।१।६२॥

धात्वादेः ६।१॥ षः ६।१॥ सः १।१॥ *स०*—धातोरादिः धात्वादिस्तस्य ... षष्ठीतत्पुरुषः ॥ *अनु०*—उपदेशे ॥ *अर्थः*—धात्वादेः षकारस्य स्थाने उपदेशावस्थायां सकारादेशो भवति ॥ *उदा०*—षह—सहते। षिच—सिञ्चति ॥

भाषार्थः—[*धात्वादेः*] धातु के आदि के [*षः*] षकार के स्थान में उपदेश अवस्था में [*सः*] सकार आदेश होता है ॥ सिञ्चति में *शे मुचादीनाम्* (७।१।५९) से नुम् आगम होता है, पश्चात् श्चुत्व होकर सिञ्चति बनता है ॥

यहाँ से '*धात्वादेः*' की अनुवृत्ति ६।१।६३ तक जायेगी ॥

णो नः ॥६।१।६३॥

णः ६।१॥ नः १।१॥ *अनु०*—धात्वादेः उपदेशे ॥ *अर्थः*—धात्वादेर्णकारस्य स्थाने उपदेशावस्थायां नकार आदेशो भवति ॥ *उदा०*—णीञ्—नयति। णम—नमति। णह—नह्यति।

भाषार्थः—धातु के आदि के [*णः*] णकार के स्थान में उपदेश में [*नः*] नकार आदेश होता है ॥ णह दिवादिगण की धातु है ॥

लोपो व्योर्वलि ॥६।१।६४॥

लोपः १।१॥ व्योः ६।२॥ वलि ७।१॥ *स०*—वश्च यश्च व्यौ तयोः ...

थाथघञ्क्ताजबित्रकाणाम् ॥६।२।१४४॥

थाथघञ्क्ताजबित्रकाणाम् ६।३॥ *स०*—थाथ० इत्यत्रेतरेतरद्वन्द्वः॥
अनु०—अन्तः, उत्तरपदस्य, उदात्तः। *गतिकारकोपपदात् कृत्* इत्यतः
'गतिकारकोपपदात्' इत्यप्यनुवर्त्तते मण्डूकप्लुतगत्या॥ *अर्थः*—गतिकार-
कोपपदात्परेषां थ, अथ, घञ्, क्त, अच्, अप्, इत्र, क इत्येवमन्ता-
नामुत्तरपदानामन्त उदात्तो भवति॥ *उदा०*—थ—सुनीथः, अवभृथः।
अथ—आवसथः, उपवसथः। घञ्—प्रभेदः, काष्ठभेदः, रज्जुभेदः।
क्त—दूरादागतः, विशुष्कः, आतपशुष्कः। अच्—प्रक्षयः, प्रजयः।
अप्—प्रलवः, प्रसवः। इत्र—प्र वित्रम्, प्रसवित्रम्। क—गोवृषः, खरी-
वृषः, प्रवृषः, प्रहृषः॥

---

१. 'उत्तरपदादिः' इस समस्त पद से केवल 'उत्तरपद' की अनुवृत्ति आ रही है। 'उत्तरपदस्य आदिः' ऐसा विग्रह करने पर 'उत्तरपदस्य' षष्ठ्यन्त पद ही बन जाता है, अतः हमने उत्तरपद न रख कर सर्वत्र 'उत्तरपदस्य' ऐसा ही अनुवृत्ति में प्रदर्शित किया है, क्योंकि अविभक्तिक पद का प्रयोग साधु नहीं॥

भाषार्थः—गति कारक और उपपद से उत्तर [*थाथघञ्क्ताजबित्र-काणाम्*] थ, अथ, घञ्, क्त, अच्, अप्, इत्र तथा क प्रत्ययान्त शब्दों को अन्तोदात्त होता है ॥

हनिकुषिनीरमिकाशिभ्यः क्थन् (*उणा०* २।२) से सुनीथः शब्द क्थन् प्रत्ययान्त है, एवं अवभृथः शब्द भी *अवे भृञः* (*उणा०* २।३) से क्थन् प्रत्ययान्त है, अतः *गतिकार०* (६।२।१३८) से उत्तरपद प्रकृति-स्वरत्व (नित्स्वर से आद्युदात्तत्व) प्राप्त था ॥ आवसथः, उपवसथः यहाँ *उपसर्गे वसेः* (*उणा०* ३।११६) से अथ प्रत्यय हुआ है ॥ यहाँ भी एवं घञन्त काष्ठभेदः आदि में भी पूर्ववत् *गतिकार०* (६।२।१३८) की प्राप्ति जानें ॥ दूरादागतः यहाँ *स्तोकान्तिक०* (२।१।३८) से समास तथा *पञ्चम्याः स्तो०* (६।३।२) से पञ्चमी का अलुक् हुआ है ॥ विशुष्कः यहाँ निष्ठा के 'त' को *शुषः कः* (८।२।५१) से क आदेश हुआ है। यहाँ दोनों स्थलों में *गतिरनन्तरः* (६।२।४९) की प्राप्ति थी ॥ आतपशुष्कः में *सिद्धशुष्कपक्कबन्धैश्च* (२।१।४१) से समास हुआ है तथा कृत्स्वर का अपवाद *सप्तमी सिद्धशुष्कपक्कबन्धेष्व०* (६।१।३२) से पूर्वपद प्रकृतिस्वरत्व प्राप्त था। प्रक्षयः, प्रजयः में क्षय जय शब्द अच् प्रत्ययान्त हैं, जिन को *गतिकारकोपपदात्०* (६।२।१३८) से प्रकृतिस्वर होकर क्रमशः *क्षयो निवासे* (६।१।१९५) *जयः करणम्* (६।१।१९६) से आद्युदात्तत्व प्राप्त था तदपवाद अन्तोदात्तत्व कह दिया ॥ शेष प्रलवः, प्रलवित्रम् इत्यादि में भी *गतिकारको०* (६।२।१३८) की प्राप्ति थी तदपवाद कह दिया। प्रलवित्रम् में *अर्तिलूधू०* (३।२।१८४) से इत्र प्रत्यय एवं प्रलवः में *ऋदोरप्* (३।३।५७) से अप् हुआ है ॥ गोवृषः, खरीवृषः यहाँ *कप्रकरणे मूलविभुजादि०* (वा० ३।२।५) इस वार्त्तिक से क प्रत्यय हुआ है। प्रवृषः, प्रहृषः में *इगुपधज्ञा०* (३।१।१३५) से क प्रत्यय हुआ है। *गतिकारकोपपदात्०* से प्रकृतिस्वर होने से वृष शब्द को *वृषादीनां च* (६।१।१९७) से आद्यु-दात्तत्व प्राप्त था तदपवाद कह दिया ॥

यह सूत्र भिन्न-भिन्न प्रयोगों के प्राप्त होने पर जिन-जिन सूत्रों का अपवाद बनता है, उनको हमने ऊपर दिखा ही दिया है। स्वर विषय का यह मुख्य सूत्र है ॥

सूपमानात् क्तः ॥६।२।१४५॥

सूपमानात् ५।१॥ क्तः १।१॥ स०—सुश्च उपमानञ्च सूपमाः तस्मात्'''''समाहारद्वन्द्वः ॥ *अनु०*—अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः* सोः उपमानाच्च परं क्तान्तमुत्तरपदमन्तोदात्तं भवति ॥ *उदा०*—सुकृतम् सुभुक्तम्, सुपीतम्, ऋतस्य योनौ सुकृतस्य (ऋ० १०।८५।२४)। उपम नात्—वृकैरिवावलुप्तम् वृकावलुप्तम्, शशप्लुतम्, सिंहविनर्दितम्

भाषार्थः—[*सूपमानात्*] सु तथा उपमानवाची से उत्तर [क्तः क्तान्त उत्तरपदको अन्तोदात्त होता है ॥ सुकृतम् आदि में *गतिरनन्तर* (६।२।४९) की प्राप्ति थी, एवं वृकावलुप्तम् आदि में *तृतीया कर्मणि* (६।२।४८) की प्राप्ति थी, तदपवाद कह दिया। सर्वत्र *कर्तृकरणे कृता०* (२।१।३१) से समास हुआ है। लुप्लृ छेदने से अवलुप्तम् एवं प्लुङ गतौ से प्लुतम् तथा नर्द शब्दे से विनर्दितम् बना है ॥

यहाँ से 'क्तः' की अनुवृत्ति ६।२।१४९ तक जायेगी ॥

संज्ञायामनाचितादीनाम् ॥६।२।१४६॥

संज्ञायाम् ७।१॥ अनाचितादीनाम् ६।३॥ स०—आचित आदिर्येषां ते आचितादयः, न आचितादयोऽनाचितादयस्तेषां......बहुव्रीहि-गर्भनञ्तत्पुरुषः ॥ *अनु०*—क्तः, अन्तः, उत्तरपदस्य, उदात्तः। गतिकार-कोपपदात् इत्यप्यनुवर्तते ॥ *अर्थः*—गतिकारकोपपदात् परं क्तान्तमुत्तर-पदमन्तोदात्तं भवति संज्ञायां विषय आचितादीन् वर्जयित्वा ॥ *उदा०*—संभूतो रामायणः, उपहूतः शाकल्यः, परिजग्धः कौण्डिन्यः। कारकादु-पपदाच्च—धनुर्भिः खाता धनुष्खाता नदी, कुद्दालखातं नगरम्, हस्तिमृदिता भूमिः ॥

भाषार्थः—गति, कारक तथा उपपद से उत्तर क्तान्त उत्तरपद को अन्तोदात्त होता है [*संज्ञायाम्*] संज्ञा विषय में [*अनाचितादीनाम्*] आचितादि शब्दों को छोड़कर ॥ संभूतः आदि में कर्म में क्त हुआ है, अतः *गतिरनन्तरः* (६।२।४९) की प्राप्ति थी तदपवाद है ॥ संभूतः आदि शब्द रामायण इत्यादि की संज्ञायें हैं। धनुष्खाता आदि में *कर्तृकरणे कृता०* (२।१।३१) से समास हुआ है। *जनसनखन०* (६।४।४२)

से खन् को आत्व हुआ है। *तृतीया कर्मणि* (६।२।४८) से इन तीनों उदाहरणों में पूर्वपद को प्रकृति स्वर प्राप्त था, तदपवाद यह अन्तोदात्त विधान है ॥

यहाँ से '*संज्ञायाम्*' की अनुवृत्ति ६।२।१४८ तक जाती है ॥

प्रवृद्धादीनां च ॥६।२।१४७॥

प्रवृद्धादीनाम् ६।३॥ च अ०॥ *स०*—प्रवृद्ध आदिर्येषां ते प्रवृद्धादयस्तेषां···बहुव्रीहिः ॥ *अनु०*—क्तः, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—प्रवृद्धादीनां च क्तान्तमुत्तरपदमन्तोदात्तं भवति ॥ *उदा०*—प्रवृद्धं यानम्, प्रवृद्धो वृषलः, प्रयुक्ताः सक्तवः ॥

भाषार्थः—[*प्रवृद्धादीनाम्*] प्रवृद्धादियों के क्तान्त उत्तरपद को [च] भी अन्तोदात्त होता है। पूर्व सूत्र में संज्ञा विषय में कहा है, यहाँ असंज्ञा में भी होगा। पूर्ववत् *गतिरनन्तरः* की प्राप्ति थी तदपवाद है ॥

कारकाद्दत्तश्रुतयोरेवाशिषि ॥६।२।१४८॥

कारकात् ५।१॥ दत्तश्रुतयोः ६।२॥ एव अ०॥ आशिषि ७।१॥ *स०*—दत्त० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—संज्ञायाम्, क्तः, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—आशिषि गम्यमानायां संज्ञायां विषये कारकादुत्तरयोर्दत्तश्रुतयोरेव क्तान्तयोरन्त उदात्तो भवति ॥ *उदा०*—देवा एनं देयासुः = प्रार्थितैर्देवैर्दत्तः = देवदत्तः। विष्णुरेनं श्रूयाद् विष्णुश्रुतः ॥

भाषार्थः—संज्ञा विषय में [*आशिषि*] आशीर्वाद गम्यमान हो तो [*कारकात्*] कारक से उत्तर [*दत्तश्रुतयोः*] दत्त तथा श्रुत क्तान्त शब्दों को [*एव*] ही अन्त उदात्त होता है ॥ *संज्ञायामनाचि०* (६।२।१४५) से सभी क्तान्तों को अन्तोदात्तत्व प्राप्त था, उसी का यहाँ नियम कर दिया कि 'यदि कारक से उत्तर हो तो दत्त एवं श्रुत को ही हो'। दत्त, श्रुत से अन्यत्र *तृतीया कर्मणि* (६।२।४८) से पूर्वपद प्रकृतिस्वरत्व ही होगा ॥ इस प्रकार कारक का नियम कर दिया ॥ *क्तिच्क्तौ च संज्ञा०* (३।३।१७४) से आशीः विषय में उदाहरणों में क्त प्रत्यय हुआ है। *दो दद् घोः* (७।४।४६) से दा को दद् आदेश होता है। किसी व्यक्ति विशेष की ये संज्ञायें हैं ॥

यहाँ से '*कारकात्*' की अनुवृत्ति ६।२।१५१ तक जायेगी ॥

इत्थम्भूतेन कृतमिति च ॥६।२।१४९॥

इत्थम्भूतेन ३।१॥ कृतम् १।१॥ इति अ० ॥ च अ० ॥ इमं प्रकारमापन्नः इत्थम्भूतस्तेन ...... ॥ *अनु०*—कारकात्, क्तः, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—इत्थम्भूतेन कृतमित्येतस्मिन्नर्थे यः समासो वर्त्तते तत्र क्तान्तमुत्तरपदं कारकात् परमन्तोदात्तं भवति ॥ *उदा०*—सुप्तप्रलपितम्, उन्मत्तप्रलपितम्, प्रमत्तगीतम्, विपन्नश्रुतम् ॥

भाषार्थः—[*इत्थम्भूतेन*] इस प्रकार को प्राप्त हुए के द्वारा [*कृतम्*] किया गया [*इति*] इस अर्थ में जो समास वहाँ [*च*] भी क्तान्त उत्तरपद को कारक से परे अन्तोदात्त होता है ॥ सुप्तत्व प्रकार को प्राप्त हुआ हुआ यह इत्थम्भूत है, तथा उस सुप्त के द्वारा प्रलाप किया गया यह 'कृतम्' है, इस प्रकार सुप्तप्रलपितम् में 'इत्थम्भूतेन कृतम्' अर्थ में समास है । इसी प्रकार सबमें जानें ॥ *तृतीया कर्मणि* (६।२।४८) का अपवाद यह सूत्र भी है ॥

अनो भावकर्मवचनः ॥६।२।१५०॥

अनः १।१॥ भावकर्मवचनः १।१॥ *स०*—भावश्च कर्म च भावकर्मणी, तयोर्वचनः भावकर्मवचनः द्वन्द्वगर्भषष्ठीतत्पुरुषः ॥ *अनु०*—कारकात्, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—कारकात् परं भाववचनं कर्मवचनं चानप्रत्ययान्तमुत्तरपदमन्तोदात्तं भवति ॥ *उदा०*—ओदनभोजनं सुखम्, पयःपानं सुखम्, चन्दनप्रियङ्गुकालेपनं सुखम् । कर्मवचनम्—राजभोजनाः शालयः, राजाच्छादनानि वासांसि ॥

भाषार्थः—[*भावकर्मवचनः*] भाव तथा कर्मवाची [*अनः*] अनप्रत्ययान्त उत्तरपद को कारक से उत्तर अन्तोदात्तत्व होता है ॥ 'भोजन' आदि शब्द अन (यु को अन होकर) प्रत्ययान्त हैं । सर्वत्र कर्म में षष्ठी होकर समास हुआ है ॥ *गतिकारकोपपदात्०* (६।२।१३८) का अपवाद यह सूत्र है ॥

मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः ॥६।२।१५१॥

मन्क्ति...क्रीताः १।३॥ स०—याजक आदिर्येषां ते याजकादयः, बहुव्रीहिः। मन् च क्तिन् च व्याख्यानञ्च शयनञ्च आसनञ्च स्थानञ्च याजकादयश्च क्रीतश्च मन्क्ति...क्रीताः, इतरेतरद्वन्द्वः॥ अनु०—कारकात्, अन्तः, उत्तरपदस्य, उदात्तः॥ अर्थः-कारकात्परं मन्नन्तं क्तिन्नन्तं, व्याख्यान, शयन, आसन, स्थान इत्येतानि याजकादयः क्रीतशब्दश्चोत्तरपदमन्तोदात्तं भवति॥ उदा०—मन्—रथस्य वर्त्म रथवर्त्म, शकटवर्त्म। क्तिन्—पाणिनिकृतिः, आपिशलिकृतिः। व्याख्यान-ऋगयनव्याख्यानम्, छन्दोव्याख्यानम्। शयन—राजशयनम्, ब्राह्मणशयनम्। आसन—राजासनम्, ब्राह्मणासनम्। स्थान—गोस्थानम्, अश्वस्थानम्। याजकादि—ब्राह्मणयाजकः, क्षत्रिययाजकः, ब्राह्मणपूजकः, क्षत्रियपूजकः। क्रीत—गवा क्रीतः = गोक्रीतः, अश्वक्रीतः॥

भाषार्थः—कारक से उत्तर [*मन्क्ति...क्रीताः*] मन्प्रत्ययान्त, क्तिन्प्रत्ययान्त, एवं व्याख्यान, शयन, आसन, स्थान तथा याजकादिगण पठित शब्द एवं क्रीत शब्द उत्तरपद को अन्तोदात्त होता है॥ सर्वत्र षष्ठी समास हुआ है। ब्राह्मणयाजकः आदि में *याजकादिभिश्च* (२।२।९) से समास हुआ है। *गतिकारकोपपदात्*[1]० (६।२।१३८) का अपवाद यह सूत्र है। गोक्रीतः अश्वक्रीतः में तृतीया समास है, अतः यहाँ *तृतीया कर्मणि* (६।२।४८) की प्राप्ति थी तदपवाद है॥ व्याख्यान में करण में, तथा शयन आसन स्थान में अधिकरण में ल्युट् हुआ है भाव एवं कर्म में ल्युट् नहीं हुआ है अतः पूर्व सूत्र से प्राप्त नहीं था, कह दिया॥

सप्तम्याः पुण्यम् ॥६।२।१५२॥

सप्तम्याः ५।१॥ पुण्यम् १।१॥ अनु०—अन्तः, उत्तरपदस्य, उदात्तः॥ *अर्थः*—सप्तम्यन्तात् परं पुण्यमित्येतदुत्तरपदमन्तोदात्तं भवति॥ *उदा०*—अध्ययने पुण्यम् = अध्ययनपुण्यम्, वेदे पुण्यम् = वेदपुण्यम्॥

---

१ रथवर्त्म आदि उदाहरणों में कर्तृकर्मणोः कृति से कर्म में षष्ठी होने से कारक से उत्तरवर्त्मादि कृदन्त होता है।

भाषार्थः—[*सप्तम्याः*] सप्तम्यन्त से परे [*पुण्यम्*] पुण्य उत्तरप शब्द को अन्तोदात्त होता है ॥ *तत्पुरुषे तुल्यार्थ०* (६।२।२) से पूर्वपद प्रकृतिस्वरत्व प्राप्त था, तदपवाद है ॥

ऊनार्थकलहं तृतीयायाः ॥६।२।१५३॥

ऊनार्थकलहम् १।१॥ तृतीयायाः ५।१॥ *स०*—ऊनोऽर्थो यस्य स ऊनार्थः, बहुव्रीहिः। ऊनार्थश्च कलहश्च ऊनार्थकलहम्, समाहारो द्वन्द्वः। अनु०—अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—तृतीयान्तात् पराण्यूनार्थान्युत्तरपदानि कलहशब्दश्चान्तोदात्तानि भवन्ति ॥ *उदा०*—माषोनम्, कार्षापणोनम्, माषविकलम्, कार्षापणविकलम् । असिकलहः, वाक्कलहः ॥

भाषार्थः—[*तृतीयायाः*] तृतीयान्त शब्द से परे [*ऊनार्थकलहम्*] ऊनार्थवाची एवं कलह शब्द उत्तरपद को अन्तोदात्त होता है ॥ ऊन कम का वाचक है ॥ उदाहरणों में *पूर्वसदृशसमो०* (२।१।३०) से समास हुआ है ॥ यहाँ भी *तत्पुरुषे तुल्यार्थतृतीया०* (६।२।२) से पूर्वपद प्रकृतिस्वरत्व प्राप्त था, तदपवाद है ॥

यहाँ से '*तृतीयायाः*' की अनुवृत्ति ६।२।१५४ तक जायेगी ॥

मिश्रं चानुपसर्गमसन्धौ ॥६।२।१५४॥

मिश्रम् १।१॥ च अ०॥ अनुपसर्गम् १।१॥ असन्धौ ७।१॥ *स०*—अनुप०, असन्धौ उभयत्र नञ्तत्पुरुषः ॥ अनु०—तृतीयायाः, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—तृतीयान्तात्परं मिश्र इत्येतदनुपसर्गमुत्तरपदमन्तोदात्तं भवति, असन्धौ गम्यमाने ॥ *उदा०*—गुडमिश्राः, तिलमिश्राः, सर्पिर्मिश्राः ॥

भाषार्थः—तृतीयान्त से परे [*अनुपसर्गम्*] अनुपसर्ग [*मिश्रम्*] मिश्र शब्द उत्तरपद को [*च*] भी अन्तोदात्त होता है [*असन्धौ*] असन्धि गम्यमान हो तो ॥ उदाहरणों में *पूर्वसदृश०* (२।१।३०) से समास हुआ है ॥ यह सूत्र भी *तत्पुरुषे तुल्यार्थ०* (६।२।२) का अपवाद है ॥ सन्धि पणबन्ध को कहते हैं । उदाहरणों में असन्धि अर्थात् पणबन्ध का अभाव है, क्योंकि 'गुड़ मिला हुआ, तिल मिला हुआ' ऐसा उदाहरणों का अर्थ है ॥

नञो गुणप्रतिषेधे संपाद्यर्हहितालमर्थास्तद्धिताः ॥६।२।१५५॥

नञः ५।१॥ गुणप्रतिषेधे ७।१॥ संपाद्यर्हहितालमर्थाः १।३॥ तद्धिताः १।३॥ *स०*—गुणस्य प्रतिषेधः, गुणप्रतिषेधस्तस्मिन्''षष्ठीतत्पुरुषः। सम्पादी च अर्हश्च हितञ्च अलञ्च सम्पाद्यर्हहितालम्, इत्येतान्यर्थाः येषां तद्धितानां ते संपा''र्थाः, द्वन्द्वगर्भबहुव्रीहिः॥ *अनु०*—अन्तः, उत्तरपदस्य, उदात्तः॥ *अर्थः*—सम्पदादि, अर्ह, हित, अलम् इत्येवमर्था ये तद्धितास्तदन्तान्युत्तरपदानि गुणप्रतिषेधे वर्त्तमानात् नञः पराण्यन्तोदात्तानि भवन्ति॥ *उदा०*—कर्णवेष्टकाभ्यां सम्पादि मुखं=कार्णवेष्टकिकम्, न कार्णवेष्टकिकम्, अकार्णवेष्टकिकम्। अर्ह—छेदमर्हति छैदिकः, न छैदिकः, अच्छैदिकः। हित—वत्सेभ्यो हितो वत्सीयः, न वत्सीयः अवत्सीयः॥ अलम्—सन्तापाय प्रभवति सान्तापिकः, न सान्तापिकः असान्तापिकः॥

भाषार्थः—[*गुणप्रतिषेधे*] गुण के प्रतिषेध अर्थ में वर्त्तमान [*नञः*] नञ् से उत्तर [*संपाद्यर्हहितालमर्थाः*] संपादि, अर्ह, हित, अलम् अर्थ हैं जिन [*तद्धिताः*] तद्धितों के तदन्त (तद्धित प्रत्ययान्त) उत्तरपद को अन्तोदात्त होता है॥ यह सूत्र भी *तत्पुरुषे तुल्यार्थ०* (६।२।२) का अपवाद है॥ कार्णवेष्टकिकम् यहाँ *सम्पादिनि* (५।१।९८) से सम्पादि अर्थ में ठञ् तद्धित प्रत्यय हुआ है। उस सम्पादि गुण का प्रतिषेध नञ् से होता है, अतः गुणप्रतिषेध अर्थ में वर्त्तमान नञ् है ही। इसी प्रकार अन्य उदाहरणों में जिस हित आदि अर्थ में तद्धित प्रत्यय हुआ है, उसी गुण का प्रतिषेध नञ् से हो रहा है, ऐसा जानें॥ छैदिकः में *आर्हादगो०*[1] (५।१।१९) से ठक् हुआ है। वत्सीयः में *प्राक् क्रीताच्छः* (५।१।१) से छ तथा सान्तापिकः में *तस्मै प्रभवति०* (५।१।१००) से ठञ् तद्धित हुआ है। पश्चात् नञ् समास हो ही जायेगा॥

यहाँ से '*नञः*' की अनुवृत्ति ६।२।१६१ तक तथा '*गुणप्रतिषेधे तद्धिताः*' की ६।२।१५६ तक जायेगी॥

---

१. आ अर्हात् यहाँ अभिविधि में आङ् है अतः अर्ह अर्थ में भी ठक् प्रत्यय ही होता है।

ययतोश्चातदर्थे ॥६।२।१५६॥

ययतोः ६।२॥ च अ० ॥ अतदर्थे ७।१॥ स०—यश्च यत् च ययतौ तयोः "इतरेतरद्वन्द्वः । तस्मै इदं तदर्थम्, चतुर्थीतत्पुरुषः न तदर्थम् अतदर्थं तस्मिन् "नञ्तत्पुरुषः ॥ अनु०—नञः गुणप्रतिषेधे तद्धिताः, अन्तः, उत्तरपदस्य, उदात्तः ॥ अर्थः—गुणप्रतिषेधे वर्त्तमानात् नञः परौ य, यत् इत्येतौ यौ तद्धितावतदर्थे वर्त्तेते तदन्तस्योत्तरपदस्यान्त उदात्तो भवति ॥ उदा०—य—पाशानां समूहः पाश्या, न पाश्या अपाश्या, अतृण्या । यत्—दन्तेषु भवं दन्त्यं, न दन्त्यम् अदन्त्यम्, अकर्ण्यम् ।

भाषार्थः—गुणप्रतिषेध अर्थ में जो नञ् उससे उत्तर [*अतदर्थे*] अतदर्थ में वर्त्तमान जो [*ययतोः*] य तथा यत् तद्धित प्रत्यय तदन्त उत्तरपद को [*च*] भी अन्त उदात्त होता है ॥ पूर्ववत् *तत्पुरुषे तुल्यार्थ०* का अपवाद है तथा उदाहरणों में गुणप्रतिषेधादि भी पूर्व कहे अनुसार जानें । उदाहरणों में य यत् प्रत्यय 'पाश के लिये, या दन्त के लिये' इन अर्थों में नहीं हुये हैं, अतः अतदर्थ हैं ॥ *पाशादिभ्यो यः* (४।२।४८) से 'य' तथा *शरीरावयवाच्च* (४।३।५५) से 'यत्' प्रत्यय हुआ है ॥

अच्कावशक्तौ ॥६।२।१५७॥

अच्कौ १।२॥ अशक्तौ ७।१॥ स०—अच् च कश्च अच्कौ, इतरेतरद्वन्द्वः । न शक्तिरशक्तिस्तस्याम् "नञ्तत्पुरुषः ॥ अनु०—नञः, अन्तः, उत्तरपदस्य, उदात्तः ॥ अर्थः—नञः परमच्प्रत्ययान्तं कप्रत्ययान्तं चोत्तरपदमशक्तौ गम्यमानायामन्तोदात्तं भवति ॥ उदा०—अपचः, अजयः । कः—अविक्षिपः, अविलिखः ॥

भाषार्थः—नञ् से उत्तर [*अच्कौ*] अच्प्रत्ययान्त तथा कप्रत्ययान्त उत्तरपद को [*अशक्तौ*] अशक्ति गम्यमान हो तो अन्तोदात्त होता है ॥ अपचः (जो पकाने में असमर्थ है) में पचाद्यच् हुआ है, तथा अविलिखः में *इगुपधज्ञा०* (३।१।१३५) से क प्रत्यय हुआ है ॥ 'नञ्' अव्यय है, अतः इस नञ् के अधिकार में सर्वत्र *तत्पुरुषे तुल्यार्थ०* की प्राप्ति थी, तदपवाद ये सूत्र हैं ॥

यहाँ से '*अच्कौ*' की अनुवृत्ति ६।१।१५८ तक जायेगी ॥

आक्रोशे च ॥६।२।१५८॥

आक्रोशे ७।१॥ च अ० ॥ *अनु०*—अच्कौ, नञः, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—नञः परमच्प्रत्ययान्तं कप्रत्ययान्तञ्चोत्तरपदमाक्रोशे गम्यमानेऽन्तोदात्तं भवति ॥ *उदा०*—अपचोऽयं जाल्मः, अपठोऽयं जाल्मः । कः—अविक्षिपः, अविलिखः ॥

भाषार्थः—नञ् से उत्तर [*आक्रोशे*] आक्रोश गम्यमान होने पर [च] भी अच्प्रत्ययान्त तथा कप्रत्ययान्त उत्तरपद को अन्तोदात्त होता है ॥ अपचः अपठः में आक्रोश यही है, कि वह पकाने एवं पढ़ने में शक्त = समर्थ है तो भी किसी कारण से पका नहीं सकता, पढ़ नहीं सकता अतः उसकी 'अपचोऽयं जाल्मः' कहकर भर्त्सना की जा रही है । इसी प्रकार अन्यों में समझें ॥ शक्ति गम्यमान होने पर भी हो जावे अतः यह सूत्र है ॥

यहाँ से '*आक्रोशे*' की अनुवृत्ति ६।२।१५९ तक जायेगी ॥

संज्ञायाम् ॥६।२।१५९॥

संज्ञायाम् ७।१॥ *अनु०*—आक्रोशे, नञः, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—नञः परमाक्रोशे गम्यमाने संज्ञायां वर्त्तमानमुत्तरपदमन्तोदात्तं भवति ॥ *उदा०*—अदेवदत्तः, अयज्ञदत्तः, अविष्णुमित्रः ॥

भाषार्थः—नञ् से परे आक्रोश गम्यमान हो तो [*संज्ञायाम्*] संज्ञा विषय में वर्त्तमान उत्तरपद को अन्तोदात्त होता है ॥ जो देवदत्त नामधारी होते हुये भी तदनुकूल कार्य नहीं करता उसके प्रति अदेवदत्तः कहकर आक्रोश प्रकट किया जाता है ॥

कृत्योकेष्णुच्चार्वादयश्च ॥६।२।१६०॥

कृत्यो···दयः १।३॥ च अ० ॥ *स०*—चारु आदिर्येषां ते चार्वादयः, बहुव्रीहिः । कृत्यश्च उकश्च इष्णुच् च चार्वादयश्च कृत्यो···दयः, इतरेतरद्वन्द्वः ॥ *अनु०*—नञः, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—नञ उत्तरे कृत्य, उक, इष्णुच् इत्येवमन्ताश्चार्वादयश्चान्तोदात्ता भवन्ति ॥ *उदा०*—कृत्य—अकर्त्तव्यम्, अकरणीयम् । उक—अनागामुकम्,

अनपलाषुकम् । इष्णुच्—अनलङ्करिष्णुः, अनिराकरिष्णुः, अनाढ्यम्भविष्णुः, असुभगम्भविष्णुः । चार्वादयः—अचारुः, असाधुः, अयौधिक अवदान्यः ॥

भाषार्थः—नञ् से उत्तर [कृत्यो...दयः] कृत्य संज्ञक एवं उक, इष्णुच् प्रत्ययान्त तथा चार्वादि गणपठित उत्तरपद शब्दों को [च] भी अन्तोदात्त होता है ॥ *लषपतपद०* (३।२।१५४) से उकञ् (उक) प्रत्यय तथा *अलंकृञ्०* (३।२।१३६) से इष्णुच् प्रत्यय होता है । इष्णुच् से खिष्णुच् का भी ग्रहण है, जो कि *आढ्यसुभग०* (३।२।५६) से अनाढ्यम्भविष्णुः आदि में हुआ है । कृत्य से कृत्यसंज्ञक अनीयर् आदि प्रत्यय लिये गये हैं ॥

विभाषा तृन्नन्नतीक्ष्णशुचिषु ॥६।२।१६१॥

विभाषा १।१॥ तृन्नन्नतीक्ष्णशुचिषु ७।३॥ *स०*—तृन्नन्न० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—नञः, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—नञ उत्तरेषु तृन्नन्त, अन्न, तीक्ष्ण, शुचि इत्येतेषूत्तरपदेषु विभाषाऽन्त उदात्तो भवति ॥ *उदा०*—अकर्त्ता, अकर्त्ता । अनन्नम्, अनन्नम् । अतीक्ष्णम्, अतीक्ष्णम् । अशुचिः, अशुचिः ॥

भाषार्थः—नञ् से उत्तर [*तृन्नन्नतीक्ष्णशुचिषु*] तृन् प्रत्ययान्त एवं अन्न, तीक्ष्ण तथा शुचि उत्तरपद शब्दों को [*विभाषा*] विकल्प से अन्तोदात्त होता है ॥ पक्ष में *तत्पुरुषे तुल्यार्थ०* (६।२।२) से अव्यय पूर्वपद को प्रकृतिस्वरत्व अर्थात् *निपाता आद्युदात्ताः* (*फिट्० ८०*) से आद्युदात्तत्व होता है ॥ अकर्त्ता में तच्छील अर्थ में तृन् प्रत्यय हुआ है ॥

बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने ॥६।२।१६२॥

बहुव्रीहौ ७।१॥ इदमेतत्तद्भ्यः ५।३॥ प्रथमपूरणयोः ६।२॥ क्रियागणने ७।१॥ *स०*—इदम् च एतद् च तद् च इदमेतत्तदस्तेभ्यः... इतरेतरद्वन्द्वः । प्रथमश्च पूरणश्च प्रथमपूरणे, तयोः.....इतरेतरद्वन्द्वः ।

क्रियायाः गणनं क्रियागणनम्, तस्मिन्······षष्ठीतत्पुरुषः ॥ अनु०—अन्तः, उत्तरपदस्य, उदात्तः ॥ अर्थः—बहुव्रीहौ समासे इदम्, एतद्, तद् इत्येतेभ्य उत्तरस्य क्रियागणने वर्त्तमानस्य प्रथमशब्दस्य पूरणप्रत्ययान्तस्य च शब्दस्यान्तोदात्तो भवति ॥ उदा०—इदं प्रथमं गमनं भोजनं वा यस्य स इदंप्रथमः । इदंद्वितीयः, इदंतृतीयः । एतत्प्रथमः । एतद्द्वितीयः एतत्तृतीयः । तत्प्रथमः । तद्द्वितीयः, तत्तृतीयः ॥

भाषार्थः—[*बहुव्रीहौ*] बहुव्रीहि समास में [*इदमेतत्तद्भ्यः*] इदम्, एतत्, तद् इनसे उत्तर [*क्रियागणने*] क्रिया के गणन में वर्त्तमान [*प्रथमपूरणयोः*] प्रथम तथा पूरण प्रत्ययान्त शब्दों को अन्तोदात्त होता है ॥ प्रथम शब्द का यहाँ स्वरूप से ग्रहण है, तथा पूरण से *द्वेस्तीयः*, *त्रेः संप्रसारणं च* (५।२।५५) से विहित जो पूरण अर्थ में प्रत्यय तदन्त शब्द लिये गये हैं ॥ यह उसका प्रथम गमन है अथवा द्वितीय तृतीय गमन है, यहाँ स्पष्ट क्रियागणन है ही ॥

बहुव्रीहौ प्रकृत्या० (६।२।१) से पूर्वपद प्रकृतिस्वरत्व प्राप्त था तदपवाद है । यहाँ से आगे जहाँ तक 'बहुव्रीहौ' का अधिकार है, वहाँ तक के सभी सूत्र '*बहुव्रीहौ प्रकृत्या पूर्वपदम्*' के अपवाद होंगे, ऐसा जानें ॥

यहाँ से '*बहुव्रीहौ*' की अनुवृत्ति ६।२।१७७ तक जायेगी ॥

संख्यायाः स्तनः ॥६।२।१६३॥

संख्यायाः ५।१॥ स्तनः १।१॥ अनु०—बहुव्रीहौ, अन्तः, उत्तरपदस्य उदात्तः ॥ *अर्थः*—संख्यायाः परः स्तनशब्दो बहुव्रीहौ समासेऽन्तोदात्तो भवति ॥ उदा०—द्विस्तना, त्रिस्तना, चतुःस्तना ॥

भाषार्थः—[*संख्यायाः*] संख्या शब्द से उत्तर [*स्तनः*] स्तन शब्द को बहुव्रीहि समास में अन्तोदात्त होता है ॥ उदा०—द्विस्तना (दो स्तनों वाली) ॥

यहाँ से '*संख्यायाः स्तनः*' की अनुवृत्ति ६।२।१६४ तक जायेगी ॥

विभाषा छन्दसि ॥६।२।१६४॥

विभाषा १।१॥ छन्दसि ७।१॥ *अनु०*—संख्यायाः स्तनः, बहुव्रीहौ, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—छन्दसि विषये बहुव्रीहौ समासे संख्यायाः परः स्तनशब्दो विकल्पेनान्तोदात्तो भवति ॥ *उदा०*—द्विस्तनां कुर्याद् वामदेवः। द्विस्तनां करोति द्यावापृथिव्योर्दोहाय चतुःस्तनां करोति पशूनां दोहाय (तै० सं० ५।१।६।४)। चतुःस्तनां करोति ॥

भाषार्थः—[*छन्दसि*] वेद विषय में संख्या शब्द से परे स्तन शब्द को बहुव्रीहि समास में [*विभाषा*] विकल्प से अन्तोदात्त होता है ॥ पक्ष में द्वि (फिट्० १) चतुर् (उणा० ५।५८) शब्द प्रकृतिस्वर होने से आद्युदात्त हैं ॥

संज्ञायां मित्राजिनयोः ॥६।२।१६५॥

संज्ञायाम् ७।१॥ मित्राजिनयोः ६।२॥ *स०*—मित्रा० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—बहुव्रीहौ, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—संज्ञायां विषये बहुव्रीहौ समासे मित्र, अजिन इत्येतयोरुत्तरपदयोरन्त उदात्तो भवति ॥ *उदा०*—देवमित्रः, ब्रह्ममित्रः। वृकाजिनः, कूलाजिनः, कृष्णाजिनः ॥

भाषार्थः—[*संज्ञायाम्*] संज्ञा विषय में [*मित्राजिनयोः*] मित्र तथा अजिन उत्तरपद को बहुव्रीहि समास में अन्तोदात्त होता है ॥ देवमित्र आदि किन्हीं की संज्ञाएँ हैं ॥

व्यवायिनोऽन्तरम् ॥६।२।१६६॥

व्यवायिनः ५।१॥ अन्तरम् १।१॥ *अनु०*—बहुव्रीहौ, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—व्यवायी = व्यवधाता। व्यवधातृवाचिनः परमन्तरमुत्तरपदमन्तोदात्तं भवति बहुव्रीहौ समासे ॥ *उदा०*—वस्त्रमन्तरं व्यवधायकं यस्य स वस्त्रान्तरः, पटान्तरः, कम्बलान्तरः ॥

भाषार्थः—[*व्यवायिनः*] व्यवधायकवाची शब्द से उत्तर [*अन्तरम्*] अन्तर उत्तरपद शब्द को बहुव्रीहि समास में अन्तोदात्त होता है ॥ वस्त्र तथा पट आदि शब्द व्यवधायकवाची हैं ॥ *उदा०*—वस्त्रान्तरः (वस्त्र है व्यवधायक जिसका), पटान्तरः ॥

मुखं स्वाङ्गम् ॥६।२।१६७॥

मुखम् १।१॥ स्वाङ्गम् १।१॥ *अनु०*—बहुव्रीहौ, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—स्वाङ्गवाचि मुखमुत्तरपदं बहुव्रीहौ समासेऽन्तोदात्तं भवति ॥ स्वमङ्गं स्वाङ्गम् ॥ उदा०—गौरमुखः, भद्रमुखः ॥

भाषार्थः—[*स्वाङ्गम्*] स्वाङ्ग (अपना अङ्ग) वाची [*मुखम्*] मुख शब्द उत्तरपद को बहुव्रीहि समास में अन्तोदात्त होता है ॥ उदा०— गौरमुखः (गोरे मुख वाला) ॥

यहाँ से सम्पूर्ण सूत्र की अनुवृत्ति ६।२।१६९ तक जायेगी ॥

नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः ॥६।२।१६८॥

न अ० ॥ अव्यय.....त्सेभ्यः ५।३॥ *स०*—दिशां शब्दाः दिक्शब्दाः, षष्ठीतत्पुरुषः । अव्यय० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—मुखं स्वाङ्गम्, बहुव्रीहौ, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—अव्यय, दिक्शब्द, गो, महत्, स्थूल, मुष्टि, पृथु, वत्स इत्येतेभ्यः परं स्वाङ्गवाचि मुखमुत्तरपदं बहुव्रीहौ समासे नान्तोदात्तं भवति ॥ उदा०—अव्यय— उच्चैर्मुखः, नीचैर्मुखः । दिक्शब्द—प्राङ्मुखः, प्रत्यङ्मुखः । गोमुखः । महामुखः । स्थूलमुखः । मुष्टिमुखः । पृथुमुखः । वत्समुखः ॥

भाषार्थः—बहुव्रीहि समास में [*अव्यय.....त्सेभ्यः*] अव्यय, दिक्शब्द, गो, महत्, स्थूल, मुष्टि, पृथु, वत्स इनसे उत्तर स्वाङ्गवाची मुख शब्द उत्तरपद को अन्तोदात्त [न] नहीं होता ॥ पूर्व सूत्र से प्राप्ति थी, प्रतिषेध कर दिया, अतः *बहुव्रीहौ प्रकृत्या०* (६।२।१) से सर्वत्र पूर्वपद प्रकृतिस्वरत्व ही होता है, जो इस प्रकार है—उच्चैः नीचैः शब्द स्वरादि गण में अन्तोदात्त निपातन पढ़े हुये हैं । प्राङ् तथा प्रत्यङ् शब्द को *अनिगन्तोञ्चतौ०* (६।२।५२) से पूर्वपद प्रकृतिस्वरत्व की प्राप्ति थी, सो वहीं इसकी सिद्धि की है । गो की सिद्धि सूत्र ६।२।४ में तथा महत् की ६।२।३८ में देखें । स्थूल शब्द से पचाद्यच् होता है, अतः प्रत्यय स्वर से अन्तोदात्त होता है । मुष धातु से क्तिच् प्रत्ययान्त मुष्टि शब्द बनता है, अतः अन्तोदात्त है । पृथु शब्द *प्रथिम्रदि०* (उणा० १।२८) से कु

प्रत्ययान्त है, अतः अन्तोदात्त है। वत्स शब्द *वृतृवदिवचिवसि०* (*उणा०* ३।६२) से स प्रत्ययान्त है, अतः अन्तोदात्त है ॥

निष्ठोपमानादन्यतरस्याम् ॥६।२।१६९॥

निष्ठोपमानात् ५।१॥ अन्यतरस्याम् ७।१॥ *स०*—निष्ठा च उपमानञ्च निष्ठोपमानं, तस्मात् ''समाहारद्वन्द्वः ॥ *अनु०*—मुखं स्वाङ्गम्, बहुव्रीहौ, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—बहुव्रीहौ समासे निष्ठान्तादुपमानवाचिनश्च स्वाङ्गं मुखमुत्तरपदं विकल्पेनान्तोदात्तं भवति ॥ *उदा०*—प्रक्षालितमुखः, प्रक्षालितमुखः प्रक्षालितमुखः। उपमानात्—सिंहमुखः, सिंहमुखः। व्याघ्रमुखः, व्याघ्रमुखः ॥

भाषार्थः—बहुव्रीहि समास में [*निष्ठोपमानात्*] निष्ठान्त तथा उपमानवाची से उत्तर स्वाङ्ग मुख शब्द उत्तरपद को [*अन्यतरस्याम्*] विकल्प से अन्तोदात्त होता है ॥ *मुखं स्वाङ्गम्* (६।२।१६७) से नित्य अन्तोदात्तत्व की प्राप्ति थी, विकल्प कह दिया, अतः पक्ष में *बहुव्रीहौ०* (६।२।१) से प्रकृतिस्वरत्व होने से *निष्ठोपसर्ग०* (६।२।११०) से पूर्वपद अन्तोदात्तत्व होगा। वहाँ पर भी विकल्प कहा है, अतः पक्ष में *गतिरनन्तरः* (६।२।४९) से 'प्र' उदात्त होगा। ६।२।११० में मुख शब्द से स्वाङ्ग और अस्वाङ्ग दोनों लिये जाते हैं, अतः स्वाङ्गवाची से जब विकल्प से यह स्वर न होगा तब ६।२।११० से विकल्प से पूर्वपद प्रकृति स्वर होकर अन्तोदात्त होगा, और जो विकल्पांश बचा उसमें गतिस्वर भी हो जाता है। इस प्रकार तीन स्वर प्रक्षालितमुखः में होंगे ॥ सिंह शब्द भी पचाद्यच् प्रत्ययान्त है, अतः पक्ष में प्रत्यय स्वर से अन्तोदात्त होगा। हिंस धातु का *पृषोदरादीनि०* (६।३।१०७) से वर्णविपर्यय होकर सिंह हो जावेगा। वि आङ् पूर्वक घ्रा धातु से *आतश्चोपसर्गे* (३।१।१३६) से क प्रत्यय होकर व्याघ्र शब्द बनता है, अतः प्रत्ययस्वर से अन्तोदात्तत्व पक्ष में होगा ॥

जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः ॥६।२।१७०॥

जातिकालसुखादिभ्यः ५।३॥ अनाच्छादनात् ५।१॥ क्तः १।१॥ अकृतमितप्रतिपन्नाः १।३॥ *स०*—सुख आदिर्येषां ते सुखादयः, बहुव्रीहिः। जातिश्च

कालश्च सुखादयश्च जाति''दयस्तेभ्यः'' 'इतरेतरद्वन्द्वः । न आच्छाद-नमनाच्छादनं तस्मात्'''नञ्तत्पुरुषः । कृतश्च मितश्च प्रतिपन्नश्च कृत-मितप्रतिपन्नाः, न कृतमितप्रतिपन्नाः अकृतमितप्रतिपन्नाः, द्वन्द्वगर्भनञ्-तत्पुरुषः ॥ अनु०—बहुव्रीहौ, अन्तः, उत्तरपदस्य, उदात्तः ॥ अर्थः—बहुव्रीहौ समासे आच्छादनवर्जितात् जातिवाचिनः कालवाचिनः सुखा-दिभ्यश्च परं क्तान्तमुत्तरपदं कृतमितप्रतिपन्नान् वर्जयित्वाऽन्तोदात्तं भवति ॥ उदा०—जाति—सारङ्गः (चातकः) जग्धो येन सः = सारङ्गजग्धः, पलाण्डुभक्षितः । काल—मासः जातो यस्य सः = मास-जातः, संवत्सरजातः, द्व्यहजातः, त्र्यहजातः । सुखादिभ्यः—सुखं जातं यस्य स = सुखजातः, दुःखजातः, तृप्रजातः ॥

भाषार्थः—[*अनाच्छादनात्*] आच्छादनवाची शब्द को छोड़कर जो [*जातिकालसुखादिभ्यः*] जातिवाची शब्द, तथा कालवाची एवं सुखादि शब्द उनसे उत्तर [*क्तः*] क्तान्त उत्तरपद को [*अकृतमितप्रतिपन्नाः*] कृत, मित, तथा प्रतिपन्न शब्दों को छोड़कर अन्तोदात्त होता है, बहुव्रीहि समास में ॥ कृत मित आदि भी क्तान्त हैं, अतः इस सूत्र से प्राप्त था निषेध कर दिया ॥ पूर्ववत् यहाँ भी (६।२।१) पूर्वपद प्रकृतिस्वरत्व प्राप्त था ॥ *सुखादि* से ३।१।१८ में पठित गण लिया जाता है ॥

यहाँ से '*जातिकालसुखादिभ्यः*' की अनुवृत्ति ६।२।१७१ तक जायेगी ॥

वा जाते ॥६।२।१७१॥

वा अ० ॥ जाते ७।१॥ *अनु०*—जातिकालसुखादिभ्यः, बहुव्रीहौ, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—जातिकालसुखादिभ्यः परं जात-शब्द उत्तरपदं विकल्पेनान्तोदात्तं भवति बहुव्रीहौ समासे ॥ उदा०—जाति—दन्तजातः, दन्तजातः । स्तनजातः, स्तनजातः । काल—मास-जातः, मासजातः । संवत्सरजातः, संवत्सरजातः । सुखादिभ्यः—सुख-जातः, सुखजातः । दुःखजातः, दुःखजातः ॥

भाषार्थः—जातिवाची, कालवाची तथा सुखादियों से उत्तर [*वा*] विकल्प से [*जाते*] जात शब्द उत्तरपद को अन्तोदात्त होता है, बहुव्रीहि समास में ॥ पक्ष में पूर्वपद प्रकृतिस्वरत्व होगा, जो इस प्रकार होगा—दन्त

शब्द दम धातु से *हसिमृग्रिण्वामि०* (*उणा० ३।८६*) से तन् प्रत्ययान्त बना है, अतः नित्स्वर से आद्युदात्त है। स्तन धातु चुरादिगण में अदन्त पढ़ा है, उस से घञ् प्रत्यय होकर स्तन शब्द बनता है। *अतो लोपः* (६।४।४८) से अकार लोप हो ही जायेगा। घञ् के ञित् होने से स्तनशब्द भी *ञ्नित्या०* (६।१।१९१) से आद्युदात्त है। मास शब्द भी घञन्त है अतः आद्युदात्त है। संवत्सर शब्द *सम्पूर्वाच्चित्* (*उणा० ३।७२*) से सरन् प्रत्ययान्त है, चित्वत् माना जाने से *चितः* (६।१।१५७) से अन्तोदात्त है। सुपूर्वक खन धातु से *अन्येष्वपि दृश्यते* (३।२।१०१) से 'ड' प्रत्यय होकर, तथा डित् होने से टिभाग का लोप होकर सुख शब्द बनता है, जो कि प्रत्ययस्वर से अन्तोदात्त है। इसी प्रकार दुःख शब्द में समझें ॥

नञ्सुभ्याम् ॥६।२।१७२॥

नञ्सुभ्याम् ५।२॥ *स०*—नञ् च सुश्च, नञ्सू, ताभ्याम्''इतरेतरद्वन्द्वः॥ *अनु०*—बहुव्रीहौ, अन्तः, उत्तरपदस्य, उदात्तः॥ *अर्थः*—बहुव्रीहौ समासे नञ्सुभ्यां परमुत्तरपदमन्तोदात्तं भवति ॥ *उदा०*—न विद्यन्ते यवा यस्मिन् सः = अयवो देशः, अव्रीहिः, अमाषः । सुयवः, सुव्रीहिः, सुमाषः ॥

भाषार्थः—बहुव्रीहि समास में [*नञ्सुभ्याम्*] नञ् तथा सु से परे उत्तरपद को अन्तोदात्त होता है ॥

यहाँ से '*नञ्सुभ्याम्*' की अनुवृत्ति ६।२।१७४ तक जायेगी ॥

कपि पूर्वम् ॥६।२।१७३॥

कपि ७।१॥ पूर्वम् १।१॥ *अनु०*—नञ्सुभ्याम्, बहुव्रीहौ, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—नञ्सुभ्यां कपि परतः पूर्वमन्तोदात्तं भवति बहुव्रीहौ समासे॥ *उदा०*—अकुमारीको देशः, अब्रह्मबन्धूकः, सुकुमारीकः, सुब्रह्मबन्धूकः ॥

भाषार्थः—नञ् तथा सु से उत्तर उत्तरपद के [*कपि*] कप् के परे रहते उससे (कप् से) [*पूर्वम्*] पूर्व को उदात्त होता है॥ *शेषाद्विभाषा* (५।४।१५४) से समासान्त कप् होता है। पूर्व सूत्र से कप् को ही अन्तोदात्तत्व प्राप्त था, कप् से पूर्व को कह दिया ॥

यहाँ से '*कपि*' की अनुवृत्ति ६।२।१७४ तक जायेगी ॥

ह्रस्वान्तेऽन्त्यात् पूर्वम् ॥६।२।१७४॥

ह्रस्वान्ते ७।१॥ अन्त्यात् ५।१॥ पूर्वम् १।१॥ *स०*—ह्रस्वोऽन्तो यस्य उत्तरपदस्य तद् ह्रस्वान्तम् तस्मिन्'''बहुव्रीहिः ॥ अन्ते भवम् अन्त्यम् ॥ *अनु०*—कपि, नञ्सुभ्याम्, बहुव्रीहौ, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—बहुव्रीहौ समासे नञ्सुभ्यां परे ह्रस्वान्त उत्तरपदेऽन्त्यात्पूर्वमुदात्तं भवति कपि परतः ॥ *उदा०*—अयवंको देशः, अव्रीहिंकः अमाषंकः। सुयवंकः सुव्रीहिंकः, सुमाषंकः ॥

भाषार्थः—नञ् तथा सु से उत्तर बहुव्रीहि समास में [*ह्रस्वान्ते*] ह्रस्वान्त उत्तरपद में [*अन्त्यात्*] अन्त्य से [*पूर्वम्*] पूर्व को उदात्त होता है, कप् परे रहते ॥ अयवकः यहाँ यव ह्रस्वान्त शब्द उत्तरपद है, अतः उससे पूर्व 'य' को उदात्त होता है। यव शब्द से परे कप् है ही। इसी प्रकार अन्य उदाहरणों में भी जानें। पूर्व सूत्र से कप् से पूर्व उदात्त प्राप्त था, यहाँ ह्रस्वान्त उत्तरपद से पूर्व को कहा है ॥

बहोर्नञ्वदुत्तरपदभूम्नि ॥६।२।१७५॥

बहोः ५।१॥ नञ्वत् अ०॥ उत्तरपदभूम्नि ७।१॥ *स०*—उत्तरपदस्य भूमा (बहुत्वं) उत्तरपदभूमा तस्मिन्'''षष्ठीतत्पुरुषः ॥ नञ इव नञ्वत् ॥ *अनु०*—बहुव्रीहौ, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—उत्तरपदार्थस्य बहुत्वे यो बहुशब्दो वर्त्तते तस्मात् नञ्वत् स्वरो भवति ॥ *उदा०*—नञ्सुभ्यामित्युक्तं बहोरपि तथा भवति—बहुयवो देशः, बहुव्रीहिः, बहुतिलः। कपि पूर्वमित्युक्तं बहोरपि तथा भवति—बहुकुमारींकः, बहुब्रह्मबन्धूकः। ह्रस्वान्तेऽन्त्यात् पूर्वमित्युक्तं बहोरपि तथा भवति—बहुयवंको देशः, बहुव्रीहिंकः, बहुमाषंकः,। नञो जरमरमित्रमृता इत्युक्तं बहोरपि तथा भवति—बहुजरंः, बहुमरंः, बहुमित्रंः, बहुमृतंः ॥

भाषार्थः—[*उत्तरपदभूम्नि*] उत्तरपदार्थ के भूम्नि = बहुत्व को कहने में वर्त्तमान जो [*बहोः*] बहु शब्द उससे [*नञ्वत्*] नञ् के समान स्वर होता है, अर्थात् *नञ्सुभ्याम्* आदि सूत्रों से नञ् से उत्तर जो भी स्वरविधान किया है, वह स्वर बहु से उत्तर भी हो जावे। *नञ्सुभ्याम्* से उत्तरपद को अन्तोदात्त कहा है, अतः वह अन्तोदात्तत्व बहु से उत्तर

भी हो जायेगा। इसी प्रकार अन्य उदाहरणों में भी जान लें, ऊपर स्व
दर्शा ही दिया है॥

यहाँ से 'बहोः' की अनुवृत्ति ६।२।१७६ तक जायेगी॥

न गुणादयोऽवयवाः ॥६।२।१७६॥

न अ०॥ गुणादयः १।३॥ अवयवाः १।३॥ *स०*—गुण आदिर्येषा
ते गुणादयः, बहुव्रीहिः॥ *अनु०*—बहोः, बहुव्रीहौ, अन्तः, उत्तरपदस्
उदात्तः॥ *अर्थः*—बहोरुत्तरे बहुव्रीहौ समासेऽवयववाचिनो गुणाद
नान्तोदात्ता भवन्ति॥ *उदा०*—बहुगुणा रज्जुः, बह्वक्षरं पदम्, बहुच्छन्द
मानम्, बहुसूक्तः, बह्वध्यायः॥

भाषार्थः—बहु से उत्तर, बहुव्रीहि समास में [*अवयवाः*] अवयववा
[*गुणादयः*] गुणादि गण पठित शब्दों को अन्तोदात्त [*न*] नहीं होता
पूर्व सूत्र के अतिदेश से प्राप्ति थी निषेध कर दिया, अतः *बहुव्रीहौ प्रकृत्या*
(६।२।१) से पूर्वपद प्रकृतिस्वरत्व ही होता है। *लङ्घिबंह्योर्नलोप*
(*उणा०* १।२९) से बहु शब्द कु प्रत्ययान्त होने से प्रत्ययस्वर
अन्तोदात्त है। बह्वक्षरम् एवं बह्वध्यायः यहाँ उदात्त 'उ' के स्थान
जो यण् हुआ है उससे परे अनुदात्त अकार को *उदात्तस्वरितयोर्यणः*
(८।२।४) से स्वरित होता है॥ बहुगुणा रज्जुः का अर्थ है, बहुत अवय
= लड़ वाली रस्सी। इसी प्रकार अन्य उदाहरणों में भी गुणादि श
अवयव अर्थों में हैं॥

उपसर्गात् स्वाङ्गं ध्रुवमपर्शु ॥६।२।१७७॥

उपसर्गात् ५।१॥ स्वाङ्गम् १।१॥ ध्रुवम् १।१॥ अपर्शु १।१॥ *स०*-
न पर्शु अपर्शु नञ्तत्पुरुषः॥ *अनु०*—बहुव्रीहौ, अन्तः, उत्तरपदस्
उदात्तः॥ *अर्थः*—बहुव्रीहौ समासे उपसर्गादुत्तरं पर्शुवर्जितं स्वाङ्गं ध्रु
मन्तोदात्तं भवति॥ *उदा०*—सततं यस्य प्रगतं पृष्ठं भवति स प्रपृ
प्रोदरः, प्रललाटः॥

भाषार्थः—बहुव्रीहि समास में [*उपसर्गात्*] उपसर्ग से उत्तर [*अपर्*
पर्शु वर्जित [*ध्रुवम्*] ध्रुव [*स्वाङ्गम्*] स्वाङ्ग को अन्तोदात्त होता है

ध्रुव कहते हैं, एकरूपता से सदैव रहने को। पीठ उदर आदि ध्रुव स्वाङ्ग हैं। पर्शु पसली की हड्डी को कहते हैं, अतः स्वाङ्ग होने से प्राप्ति थी निषेध कर दिया ॥

यहाँ से '*उपसर्गात्*' की अनुवृत्ति ६।२।१९५ तक जायेगी।

वनं समासे ॥६।२।१७८॥

वनम् १।१॥ समासे ७।१॥ *अनु०*—उपसर्गात्, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—समासमात्र उपसर्गादुत्तरं वनमित्येतदुत्तरपदमन्तोदात्तं भवति ॥ *उदा०*—प्रवणे यष्टव्यम्। निर्वणे प्रणिधीयते ॥

भाषार्थः—[*समासे*] समास मात्र में उपसर्ग से उत्तर [वनम्] वन उत्तरपद शब्द को अन्तोदात्त होता है ॥ प्रकृष्टं वनं प्रवणं तस्मिन् प्रवणे, निर्गतो वनादिति निर्वणं तस्मिन् निर्वणे यहाँ *प्रनिरन्तःशरे०* (८।४।५) से णत्व होता है ॥ 'प्रकृष्टं वनम्' आदि व्युत्पत्ति मात्र है, प्रवण का अर्थ एक ओर नीची भूमि है। यज्ञ-वेदिका प्राक्प्रवण = पूर्वदिशा में नीची बनाने का विधान है। इसी प्रकार 'निर्वण' का अर्थ है चारों ओर सम भूमि ॥

यहाँ से '*वनम्*' की अनुवृत्ति ६।२।१७९ तक जायेगी ॥

अन्तः ॥६।२।१७९॥

अन्तः अ० ॥ *अनु०*—वनम्, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—अन्तश्शब्दादुत्तरं वनमन्तोदात्तं भवति ॥ *उदा०*—अन्तर् वनं यस्मिन् अन्तर्वणो देशः ॥

भाषार्थः—[*अन्तः*] अन्तर् शब्द से उत्तर वन शब्द को अन्तोदात्त होता है ॥ 'अन्तर्' अव्यय शब्द स्वरादिगण (१।१।३६) में पढ़ा है ॥ पूर्ववत् *प्रनिरन्तः शरे०* (८।४।५) से यहाँ भी णत्व जानें ॥ जिस देश के मध्य में वन हो वह देश अन्तर्वण कहाता है, यहाँ बहुव्रीहि समास है ॥

अन्तश्च ॥६।२।१८०॥

अन्तः १।१॥ च अ० ॥ *अनु०*—उपसर्गात्, अन्तः, उत्तरपदस्य उदात्तः ॥ *अर्थः*—उपसर्गात् परश्चान्तशब्दोऽन्तोदात्तो भवति ॥ *उदा०*—प्रान्तः, पर्यन्तः ॥

भाषार्थः—उपसर्ग से उत्तर [*अन्तः*] अन्त शब्द को [*च*] भी अन्तोदात्त होता है। उदाहरणों में बहुव्रीहि अथवा प्रादि समास भी हो सकता है ॥

यहाँ से '*अन्तः*' की अनुवृत्ति ६।२।१८१ तक जायेगी ॥

न निविभ्याम् ॥६।२।१८१॥

न अ० ॥ निविभ्याम् ५।२॥ *स०*—निवि० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—अन्तः, उपसर्गात्, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—नि, वि इत्येताभ्यामुपसर्गाभ्यां परोऽन्तशब्दो नान्तोदात्तो भवति ॥ पूर्वेण प्राप्तिः प्रतिषिध्यते ॥ *उदा०*—न्यन्तः, व्यन्तः ॥

भाषार्थः—[*निविभ्याम्*] नि तथा वि उपसर्ग से उत्तर अन्त शब्द को अन्तोदात्त [*न*] नहीं होता ॥ उपसर्ग से उत्तर कहने से पूर्व सूत्र से प्राप्ति थी, प्रतिषेध कर दिया ॥ *बहुव्रीहौ प्रकृत्या०* (६।२।१) से पूर्वपद प्रकृतिस्वरत्व होकर नि, वि *उपसर्गाश्चा०* (*फिट्०* ८०) से आद्युदात्त हैं, पश्चात् यणादेश करने पर *उदात्तस्वरि०* (८।२।४) से 'अ' को स्वरितत्व हो जायेगा। जब न्यन्तः, व्यन्तः में प्रादि तत्पुरुष समास मानें तब भी *तत्पुरुषे तुल्यार्थ०* (६।२।२) से पूर्वपद प्रकृतिस्वर होकर यही स्वर रहेगा ॥

परेरभितोभावि मण्डलम् ॥६।२।१८२॥

परेः ५।१॥ अभितोभावि १।१॥ मण्डलम् १।१॥ *अनु०*—उपसर्गात्, अन्तः, उत्तरपदस्य, उदात्तः ॥ अभितः = उभयतो भावो = भवनमस्यास्तीति = अभितोभावि, मत्वर्थे इनिप्रत्ययः ॥ *अर्थः*—परेरुपसर्गादुत्तरमभितोभाविवचनं मण्डलश्चोत्तरपदमन्तोदात्तं भवति ॥ *उदा०*—अभितोभावि—परिकूलम्, परितीरम्। मण्डलम्—परिमण्डलम् ॥

भाषार्थः—[*परेः*] परि उपसर्ग से उत्तर [*अभितोभावि*] अभितोभाविवाची तथा [*मण्डलम्*] मण्डल शब्द को अन्तोदात्त होता है ॥ अभितोभावि अर्थात् दोनों ओर से भावि = होना जिसका स्वभाव है, इस अर्थ को कथन करने वाले शब्द को अन्तोदात्त होता है। यथा कूल, तीर शब्द दोनों ओर होने के स्वभाव वाले होते हैं, अर्थात् दोनों ओर

ही होते हैं। मण्डल शब्द अभितोभाविवचन नहीं है, अतः पृथक् कह दिया॥ उदाहरणों में बहुव्रीहि या तत्पुरुष मानने पर पूर्ववत् पूर्वपद-प्रकृतिस्वरत्व प्राप्त था तदपवाद है। यदि अव्ययीभाव समास मानें तो भी *परिप्रत्युपापा०* (६।२।३३) से पूर्वपदप्रकृतिस्वरत्व की प्राप्ति में यह विधान है॥ अभितोभावि में नपुंसकलिङ्ग निर्देश है॥

प्रादस्वाङ्गं संज्ञायाम् ॥६।२।१८३॥

प्रात् ५।१॥ अस्वाङ्गम् १।१॥ संज्ञायाम् ७।१॥ *स०*—अस्वा० इत्यत्र नञ्तत्पुरुषः॥ *अनु०*—उपसर्गात्, अन्तः, उत्तरपदस्य, उदात्तः॥ *अर्थः*—प्रादुत्तरमस्वाङ्गवाच्युत्तरपदमन्तोदात्तं भवति संज्ञायां विषये॥ *उदा०*—प्रकोष्ठम्, प्रगृहम्, प्रद्वारम्॥

भाषार्थः—[*प्रात्*] प्र उपसर्ग से उत्तर [*अस्वाङ्गम्*] अस्वाङ्गवाची उत्तरपद को [*संज्ञायाम्*] संज्ञा विषय में अन्तोदात्त होता है॥ *उदा०*—प्रकोष्ठम् (कमरा), प्रगृहम् (घर के पीछे का खुला स्थान), प्रद्वारम् (घर के सामने का स्थान)॥

निरुदकादीनि च॥६।२।१८४॥

निरुदकादीनि १।३॥ च अ०॥ *स०*—निरुदक आदिर्येषाम् तानि······बहुव्रीहिः॥ *अनु०*—अन्तः, उत्तरपदस्य, उदात्तः॥ *अर्थः*—निरुदकादीनि च शब्दरूपाण्यन्तोदात्तानि भवन्ति॥ *उदा०*—निष्क्रान्त-मुदकमस्मात् निष्क्रान्तमुदकादिति वा = निरुदकम्, निरुपलम्॥

भाषार्थः—[*निरुदकादीनि*] निरुदकादि गण पठित शब्दों को [*च*] भी अन्तोदात्त होता है॥ उदाहरणों में बहुव्रीहि समास अथवा (प्रादि) तत्पुरुष समास है, अतः पूर्ववत् प्रकृतिस्वर की प्राप्ति थी, तदपवाद है॥

अभेर्मुखम् ॥६।२।१८५॥

अभेः ५।१॥ मुखम् १।१॥ *अनु०*—उपसर्गात्, अन्तः, उत्तरपदस्य उदात्तः॥ *अर्थः*—अभेरुत्तरं मुखमित्येतदुत्तरपदमन्तोदात्तं भवति॥ *उदा०*—अभिमुखः॥

भाषार्थः—[*अभेः*] अभि उपसर्ग से उत्तर [*मुखम्*] मुख उत्तरपद स्थित शब्द को अन्तोदात्त होता है॥ पूर्ववत् प्रादि अथवा बहुव्रीहि

समास अभिमुख (सामने) शब्द में जानें ॥ *उपसर्गात् स्वाङ्ग*० (६।२।१७६) से ही सिद्ध था पुनर्वचन बहुव्रीहि से भिन्न समास, स्वाङ्गवाची मुख शब्द जहां न हो, यथा-अभिमुखा शाला, तथा अध्रुव अर्थ के लिए है ॥

यहाँ से '*मुखम्*' की अनुवृत्ति ६।२।१८६ तक जायेगी ॥

अपाच्च ॥६।२।१८६॥

अपात् ५।१॥ च अ० ॥ *अनु०*—मुखम्, उपसर्गात्, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—अपाच्चोत्तरं मुखमुत्तरपदमन्तोदात्तं भवति ॥ *उदा०*—अपगतं मुखमस्मात् अपगतं मुखादिति वा = अपमुखः । अपमुखम् ॥

भाषार्थः—[*अपात्*] अप उपसर्ग से उत्तर [च] भी मुख उत्तरपद शब्द को अन्तोदात्त होता है ॥ पूर्ववत् बहुव्रीहि एवं प्रादि तत्पुरुष समास अपमुखः में जानें। अव्ययीभाव समास भी अप मुखात् = अपमुखम् यहाँ *अपपरिबहिरञ्चवः*० (२।१।११) से हो सकता है, इस पक्ष में भी *परिप्रत्युपापा*० (६।२।३३) से पूर्वपद प्रकृतिस्वरत्व प्राप्त था तदपवाद यह होगा ॥

यहाँ से '*अपात्*' की अनुवृत्ति ६।२।१८७ तक जायेगी ॥

स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनामनाम च ॥६।२।१८७॥

स्फिगपूत······नाम १।१॥ च अ० ॥ *स०*—सीरस्य नाम सीरनाम षष्ठीतत्पुरुषः । स्फिगश्च पूतश्च वीणा च अञ्जस् च अध्वा च कुक्षिश्च सीरनाम च नाम च स्फिग······नाम, समाहारो द्वन्द्वः ॥ *अनु०*—अपात्, उपसर्गात्, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—अपादुत्तराणि स्फिग, पूत, वीणा, अञ्जस्, अध्वन्, कुक्षि इत्येतानि सीरनामानि नामन् शब्दश्चोत्तरपदान्यन्तोदात्तानि भवन्ति ॥ *उदा०*—अपस्फिगम्, अपपूतम्, अपवीणम्, अपाञ्जः, अपाध्वा, अपकुक्षिः, अपसीरः, अपहलम्, अपलाङ्गलम्, अपनाम ॥

भाषार्थः—अप उपसर्ग से उत्तर [*स्फिग*···*नाम*] स्फिग, पूत, वीणा, अञ्जस्, अध्वन्, कुक्षि तथा सीरनाम = हल के वाची शब्दों को एवं नाम

शब्द को [च] भी अन्तोदात्त होता है ॥ सीर हल को कहते हैं ॥ पूर्ववत् तत्पुरुष बहुव्रीहि या अव्ययीभाव समास उदाहरणों में जानें ॥ अपाध्वा में जब उपसर्गादध्वनः (५।४।८५) से समासान्त अच् प्रत्यय नहीं होगा, तब इस सूत्र का उदाहरण बनेगा, अन्यथा अच् प्रत्यय के चित् होने से चित्स्वर से ही अन्तोदात्तत्व हो जाता। समासान्त प्रत्यय इसी ज्ञापक से विकल्प से होते हैं ॥

अधेरुपरिस्थम् ॥६।२।१८८॥

अधेः ५।१॥ उपरिस्थम् १।१॥ *अनु०*—उपसर्गात्, अन्तः, उत्तरपदस्य, उदात्तः ॥ उपरि तिष्ठतीति उपरिस्थः ॥ *अर्थः*—अधेरुत्तरमुपरिस्थवाचि शब्दरूपमन्तोदात्तं भवति ॥ *उदा०*—अधिदन्तः, अधिकर्णः, अधिकेशः ॥

भाषार्थ—[अधेः] अधि उपसर्ग से उत्तर [*उपरिस्थम्*] उपरिस्थवाची उत्तरपद को अन्तोदात्त होता है ॥ ऊपर बैठने वाला उपरिस्थ कहाता है, जैसे दाँत के ऊपर जो दाँत निकल आता है उसे अधिदन्त कहते हैं क्योंकि वह उपरिस्थ है। इसी प्रकार कान के ऊपर जो निकला हुआ कान वह अधिकर्ण, एवं केश के ऊपर जो केश (अर्थात् एक रोम से निकले दो केशों में एक) अधिकेश कहाता है ॥

अनोरप्रधानकनीयसी ॥६।२।१८९॥

अनोः ५।१॥ अप्रधानकनीयसी १।२॥ *स०*—अप्रधानञ्च कनीयश्च अप्रधानकनीयसी, इतरेतरद्वन्द्वः ॥ *अनु०*—उपसर्गात्, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—अनोः परमप्रधानवाच्युत्तरपदं कनीयश्शब्दश्चान्तोदात्तो भवति ॥ *उदा०*—अनुगतो ज्येष्ठमनुज्येष्ठः, अनुमध्यमः। कनीयस्—अनुगतः कनीयाननुकनीयान् ॥

भाषार्थः—[*अनोः*] अनु उपसर्ग से उत्तर [*अप्रधानकनीयसी*] अप्रधानवाची उत्तरपद को तथा कनीयस् शब्द को अन्तोदात्त होता है ॥ अनुज्येष्ठः (ज्येष्ठ के पीछे चलने वाला) यहाँ उत्तरपद ज्येष्ठ शब्द समासार्थ में अप्रधान है, तथा उसके पीछे चलनेवाला पूर्वपद जो 'अनुगत' शब्द वह प्रधान है, अतः यहाँ अप्रधानवाची उत्तरपद है। इसी प्रकार

अनुमध्यमः में जानें। अनुकनीयान् = (पीछे चलने वाला छोटा भाई) यहाँ उत्तरपद कनीयान् प्रधान है, अप्रधान नहीं, अतः कनीयान् का पृथक् ग्रहण किया है॥ जहाँ कनीयान् अप्रधान होगा तब विग्रह होगा अनुगतः कनीयांसम् अनुकनीयान्। इसमें अप्रधानवाची मानकर इस सूत्र से अन्तोदात्त होगा॥

यहाँ से 'अनोः' की अनुवृत्ति ६।२।१९० तक जायेगी॥

पुरुषश्चान्वादिष्टः ॥६।२।१९०॥

पुरुषः १।१॥ च अ०॥ अन्वादिष्टः १।१॥ *अनु०*—अनोः, उपसर्गात्, अन्तः, उत्तरपदस्य, उदात्तः॥ अनु = पश्चात् आदिष्टः, अन्वादिष्टः, कथितानुकथितः, अन्वाचितोऽप्रधानशिष्टो वा॥ *अर्थः*—अनोः परोऽन्वादिष्टवाची पुरुषशब्दोऽन्तोदात्तो भवति॥ *उदा०*—अन्वादिष्टः पुरुषः अनुपुरुषः॥

भाषार्थः—अनु उपसर्ग से उत्तर [*अन्वादिष्टः*] अन्वादिष्टवाची [*पुरुषः*] पुरुष शब्द को [*च*] भी अन्तोदात्त होता है॥ कथन करने के पश्चात् कुछ और कहा जाये, अथवा उस कथन में गौण कथन हो उसे अन्वादिष्ट कहते हैं, यथा किसी ने कहा कि 'तुम भिक्षा भी करो गौ भी लाओ' यहाँ गौ का लाना पश्चात् कथन अथवा गौण कथन होने से अन्वादिष्ट है॥

अतेरकृत्पदे ॥६।२।१९१॥

अतेः ५।१॥ अकृत्पदे १।२॥ *स०*—न कृत् अकृत, नञ्तत्पुरुषः। अकृत् च पदञ्च अकृत्पदे, इतरेतरद्वन्द्वः॥ *अनु०*—उपसर्गात्, अन्तः, उत्तरपदस्य, उदात्तः॥ *अर्थः*—अतेः परमकृदन्तं पदशब्दश्चोत्तरपदमन्तोदात्तं भवति॥ *उदा०*—अङ्कुशमतिक्रान्तः = अत्यङ्कुशो नागः, अतिकशोऽश्वः। पदशब्दः—अतिपदा शक्वरी॥

भाषार्थः—[*अतेः*] अति उपसर्ग से उत्तर [*अकृत्पदे*] अकृदन्त तथा पद शब्द को अन्तोदात्त होता है॥ उदाहरणों में क्रान्तादि अर्थों में तत्पुरुष समास हुआ है॥

नेरनिधाने ॥६।२।१९२॥

नेः ५।१॥ अनिधाने ७।१॥ *स०*—न निधानमनिधानम्, तस्मिन् नञ्तत्पुरुषः ॥ *अनु०*—उपसर्गात्, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—नेः परमुत्तरपदमन्तोदात्तं भवत्यनिधानेऽर्थे ॥ निधानमप्रकाशता, तदभावोऽनिधानं प्रकाशता ॥ उदा०—निर्गतं मूलं निमूलम्, न्यक्षम्, नितृणम् ॥

भाषार्थः—[नेः] नि उपसर्ग से उत्तर उत्तरपद को अन्तोदात्त होता है, [*अनिधाने*] प्रकाशन अर्थ में ॥ जिसका मूल निकला हुआ है वह निमूल कहाता है, इसी प्रकार बाहर निकले अक्ष और तृण, न्यक्ष नितृण कहाते हैं। यहाँ स्पष्ट अनिधान = प्रकाशन अर्थ है। नि उपसर्ग यहाँ अनिधान अर्थ को कहता है ॥

प्रतेरंश्वादयस्तत्पुरुषे ॥६।२।१९३॥

प्रतेः ५।१॥ अंश्वादयः १।३॥ तत्पुरुषे ७।१॥ *स०*—अंशु आदिर्येषां ते अंश्वादयः, बहुव्रीहिः ॥ *अनु०*—उपसर्गात्, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—प्रतेः परास्तत्पुरुषे समासेऽश्वादयोऽन्तोदात्ता भवन्ति ॥ उदा०—प्रतिगतोऽशुः = प्रत्यंशुः, प्रतिजनः, प्रतिराजा ॥

भाषार्थः—[प्रतेः] प्रति उपसर्ग से उत्तर [*तत्पुरुषे*] तत्पुरुष समास में [*अंश्वादयः*] अंश्वादि गण पठित शब्दों को अन्तोदात्त होता है ॥

यहाँ से '*तत्पुरुषे*' की अनुवृत्ति ६।२।१९६ तक जायेगी ॥

उपाद् द्व्यजजिनमगौरादयः ॥६।२।१९४॥

उपात् ५।१॥ द्व्यजजिनम् १।१॥ अगौरादयः १।३॥ *स०*—द्वौ अचौ यस्मिन् स द्व्यच् बहुव्रीहिः। द्व्यच् च अजिनञ्च द्व्यजजिनम्, समाहारो द्वन्द्वः॥ गौर आदिर्येषां ते गौरादयः, न गौरादयोऽगौरादयः, बहुव्रीहिगर्भनञ्तत्पुरुषः ॥ *अनु०*—तत्पुरुषे, उपसर्गात्, अन्तः उत्तरपदस्य, उदात्तः ॥ *अर्थः*—उपात् परं द्व्यजजिनं च तत्पुरुषे समासेऽन्तोदात्तं भवति, गौरादीन् वर्जयित्वा ॥ उदा०—द्व्यच्—उपगतो देवम् = उपदेवः, उपसोमः, उपेन्द्रः, उपहोडः। अजिन—उपाजिनम् ॥

भाषार्थः—[*उपात्*] उप उपसर्ग से उत्तर [*द्व्यजजिनम्*] दो अच्

वाले शब्दों को तथा अजिन शब्द को तत्पुरुष समास में अन्तोदा होता है, [*अगौरादयः*] गौरादि शब्दों को छोड़कर ॥ गौरादि श द्व्यच् हैं, अतः प्राप्ति थी, निषेध कर दिया । उदाहरणों में *कुगतिप्रादः* (२।२।१८) से तत्पुरुष समास हुआ है ॥

सोरवक्षेपणे ॥६।२।१९५॥

सोः ५।१॥ अवक्षेपणे ७।१॥ *अनु०*—तत्पुरुषे, उपसर्गात्, अन्तः उत्तरपदस्य, उदात्तः, ॥ *अर्थः*—सोः परमुत्तरपदं तत्पुरुषे समासेऽन्तोदात्तं भवति, अवक्षेपणे गम्यमाने ॥ *उदा०*—इह खल्विदानीं सुस्थण्डिले सुस्फिगाभ्यां सुप्रत्यवसितः ॥

भाषार्थः—[*सोः*] सु उपसर्ग से उत्तर उत्तरपद को तत्पुरुष समास में अन्तोदात्त होता है, [*अवक्षेपणे*] निन्दा गम्यमान हो तो ॥ सुस्थण्डिल आदि में *स्वती पूजायाम्* (*भा०*२।२।१८) इस वचन से सु अति का पूजा अर्थ में समास होता है, उदाहरणों में सु अच्छे अर्थ में ही है, किन्तु वाक्यार्थ से निन्दा की प्रतीति होती है, सम्पूर्ण वाक्य का अर्थ है—"यहाँ अब आप अच्छी समृद्धि से अच्छे स्थान में विराजमान दूसरे देश से लौटकर बैठे हैं ।" तात्पर्य यह है कि कोई कायर अनर्थ उपस्थित होने पर भी सुखपूर्वक बैठा रहे उसे इस प्रकार चिढ़ाया जा रहा है, यही यहाँ निन्दा है ॥

विभाषोत्पुच्छे ॥६।२।१९६॥

विभाषा १।१॥ उत्पुच्छे ७।१॥ *अनु०*—तत्पुरुषे, अन्तः, उत्तरपदस्य, उदात्तः ॥ *अर्थः*—तत्पुरुषे समास उत्पुच्छशब्दे विभाषाऽन्त उदात्तो भवति ॥ उत्क्रान्तः पुच्छात् उत्पुच्छः उत्पुच्छः । पुच्छमुदस्यति उत्पुच्छयति, उत्पुच्छयतेरच् उत्पुच्छः, अस्यामपि व्युत्पत्तौ पूर्ववत् स्वरः ॥

भाषार्थः—तत्पुरुष समास में [*उत्पुच्छे*] उत्पुच्छ शब्द को [*विभाषा*] विकल्प से अन्तोदात्तत्व होता है ॥

उदाहरणों में दो प्रकार से व्युत्पत्ति दर्शाई है, सो प्रथम व्युत्पत्ति पक्ष में तो *तत्पुरुषे तुल्यार्थ०* से अव्यय पूर्वपद प्रकृतिस्वरत्व प्राप्त था अन्तोदात्तत्व प्राप्त नहीं था, अप्राप्त अन्तोदात्तत्व विकल्प से विधान कर

दिया। द्वितीय व्युत्पत्ति में 'उत्पुच्छय' धातु से एरच् (३।३।५६) से अच् प्रत्यय होकर उत्पुच्छः बना है, अतः *थाथघञ्०* (६।२।१४३) से नित्य अन्तोदात्तत्व प्राप्त था, उसका विकल्प कह दिया। इस प्रकार सूत्रोक्त 'विभाषा' उभयत्र विभाषा है। पक्ष में अव्यय स्वर से 'उ' उदात्त रहेगा ही॥

यहाँ से '*विभाषा*' की अनुवृत्ति ६।२।१९८ तक जायेगी॥

द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ ॥६।२।१९७॥

द्वित्रिभ्याम् ५।२॥ पाद्दन्मूर्धसु ७।३॥ बहुव्रीहौ ७।१॥ *स०*—द्वित्रि० इत्यत्रेतरेतरद्वन्द्वः। पाद् च दत् च मूर्धा च पाद्दन्मूर्धानः, तेषु··· इतरेतरद्वन्द्वः॥ *अनु०*—विभाषा, अन्तः, उत्तरपदस्य, उदात्तः॥ *अर्थः*—बहुव्रीहौ समासे द्वि, त्रि इत्येताभ्यां पराणि पाद्, दत्, मूर्धन् इत्येतान्युत्तरपदान्यन्तोदात्तानि भवन्ति विकल्पेन॥ *उदा०*—द्वौ पादावस्य द्विपात्, द्विपात्। त्रिपात्, त्रिपात्। द्विदन्, द्विदन्। त्रिदन्, त्रिदन्। द्विमूर्धा, द्विमूर्धा। त्रिमूर्धा, त्रिमूर्धा। द्विमूर्धः, त्रिमूर्धः, द्विमूर्धः, त्रिमूर्धः॥

भाषार्थः—[*द्वित्रिभ्याम्*] द्वि तथा त्रि से उत्तर [*पाद्दन्मूर्धसु*] पाद्, दत्, मूर्धन् इन शब्दों के उत्तरपद रहते [*बहुव्रीहौ*] बहुव्रीहि समास में विकल्प से अन्तोदात्त होता है॥ पाद् शब्द समासान्त अकार लोप (५।४।१३८) किया हुआ सूत्र में निर्दिष्ट है, एवं दन्त शब्द भी समासान्त दत् आदेश (५।४।१४१) किया हुआ निर्दिष्ट है। किन्तु मूर्धन् अकृतसमासान्त निर्दिष्ट है, अतः सामान्य करके मूर्धन् शब्द का दोनों प्रकार से ग्रहण है, एवं पाद् दत् समासान्त ही लिये जायेंगे। द्विमूर्धा, त्रिमूर्धा में समासान्त प्रत्यय नहीं हुआ है, एवं द्विमूर्धः, त्रिमूर्धः में *द्वित्रिभ्यां ष मूर्ध्नः* (५।४।११५) से समासान्त ष प्रत्यय हुआ है। इन दोनों प्रकार के उदाहरणों में प्रकृत सूत्र से विकल्प से अन्तोदात्त होता है। पक्ष में *बहुव्रीहौ प्रकृत्या०* (६।२।१) से पूर्वपद प्रकृतिस्वरत्व ही होता है, अतः *फिषोऽन्त-उदात्तः* (फिट्० १) से द्वि त्रि उदात्त हैं॥

यहाँ से '*बहुव्रीहौ*' की अनुवृत्ति ६।२।१९८ तक जायेगी॥

सक्थं चाक्रान्तात् ॥६।२।१९८॥

सक्थम् १।१॥ च अ० ॥ अक्रान्तात् ५।१॥ स०—क्रशब्दोऽन्तो यस्य स क्रान्तः बहुव्रीहिः। न क्रान्तोऽक्रान्तस्तस्मात् ''नञ्तत्पुरुषः॥ अनु०—बहुव्रीहौ, विभाषा, अन्तः, उत्तरपदस्य, उदात्तः॥ *अर्थः*—अक्रान्तात् परः सक्थशब्दोऽन्तोदात्तो भवति बहुव्रीहौ समासे विकल्पेन ॥ *उदा०*—गौरसक्थः, गौरसक्थः। श्लक्ष्णसक्थः, श्लक्ष्णसक्थः॥

भाषार्थः—[*अक्रान्तात्*] क्र अन्त में नहीं है जिसके ऐसे अक्रान्त शब्द से उत्तर [*सक्थम्*] सक्थ शब्द को [*च*] भी विकल्प से अन्तोदात्त होता है बहुव्रीहि समास में॥ सक्थ शब्द *बहुव्रीहौ सक्थ्यक्ष्णोः०* (५।४।११३) से समासान्त षच् प्रत्ययान्त सूत्र में निर्दिष्ट है, अतः उदाहरणों में समासान्त ही गृहीत होगा॥ गौर शब्द प्रज्ञादित्वात् (५।४।३८) अण् प्रत्ययान्त है, अतः अन्तोदात्त है। श्लक्ष्ण शब्द भी *श्लिषेरच्चोपधायाः* (*उणा०* ३।१९) से क्स्न प्रत्ययान्त होने से अन्तोदात्त है, अतः पक्ष में अन्तोदात्त रहेगा। पक्ष में पूर्वपदप्रकृतिस्वरत्व (६।२।१) होकर यही स्वर रहेंगे॥

यहाँ से '*सक्थम्*' की अनुवृत्ति ६।२।१९९ तक जायेगी॥

परादिश्छन्दसि बहुलम् ॥६।२।१९९॥

परादिः १।१॥ छन्दसि ७।१॥ बहुलम् १।१॥ *स०*—परस्य आदिः परादिः, षष्ठीतत्पुरुषः॥ अनु०—सक्थम्, उत्तरपदस्य, उदात्तः॥ *अर्थः*—छन्दसि विषये उत्तरपदस्य सक्थशब्दस्यादिरुदात्तो भवति बहुलम्॥ परशब्देनात्र सक्थशब्द एव गृह्यते॥ *उदा०*—अञ्जिसक्थम् आलभेत, त्वाष्ट्रौ लोमसक्थौ। बहुलवचनात् पदान्तरे समासान्तरे च भवति, ऋजुबाहुः इति बहुव्रीहिः। वाक्पतिः, चित्पतिरिति षष्ठीसमासौ॥

भाषार्थः—[*छन्दसि*] वेद विषय में उत्तरपद [*परादिः*] पर के = सक्थ शब्द के, आदि को [*बहुलम्*] बहुल करके अन्तोदात्त होता है॥ पर शब्द से यहाँ पूर्व सूत्र निर्दिष्ट सक्थ शब्द का ही ग्रहण है॥ बहुल कहने से यहाँ सक्थ शब्द से अन्य शब्द में भी उत्तरपद के आदि को उदात्त होता है एवं बहुव्रीहि समास में ही सक्थ शब्द को समासान्त

होता है, अतः 'बहुव्रीहौ' की अनुवृत्ति न आने पर भी बहुव्रीहि समास में ही परादि को उदात्त प्राप्त था, बहुल कहने से अन्य समासों में भी हो जाता है ॥

॥ इति द्वितीयः पादः ॥

—:०:—

तृतीयः पादः

[अलुक्प्रकरणम्]

अलुगुत्तरपदे ॥६।३।१॥

अलुक् १।१॥ उत्तरपदे ७।१॥ स०—न लुक् अलुक् नञ्तत्पुरुषः ॥ *अर्थः*—अलुगिति उत्तरपद इति चेत्येतदधिकृतं वेदितव्यम्, यदित ऊर्ध्वमनुक्रमिष्यामोऽलुगुत्तरपद इत्येवं तद् वेदितव्यम् ॥ *उदा०*— वक्ष्यति पञ्चम्याः स्तोकादिभ्यः, स्तोकान्मुक्तः, अल्पान्मुक्तः ॥

भाषार्थः—[अलुगुत्तरपदे] 'अलुक्' तथा 'उत्तरपदे' इन दोनों पदों का अधिकार आगे के सूत्रों में जाता है, अतः यह अधिकार सूत्र है ॥

यहाँ से 'अलुक्' का अधिकार ६।३।२३ तक तथा 'उत्तरपदे' का ६।३।१३८ तक जायेगा ॥

पञ्चम्याः स्तोकादिभ्यः ॥६।३।२॥

पञ्चम्याः ६।१॥ स्तोकादिभ्यः ५।३॥ स०—स्तोक आदिर्येषां ते स्तोकादयः, तेभ्यः......बहुव्रीहिः ॥ *अनु०*—अलुग् उत्तरपदे ॥ *अर्थः*—स्तोकादिभ्यः परस्याः पञ्चम्या अलुग् भवति उत्तरपदे परतः ॥ *उदा०*—स्तोकान्मुक्तः, अल्पान्मुक्तः, अन्तिकादागतः, अभ्याशादागतः, दूरादागतः, विप्रकृष्टादागतः, कृच्छ्रान्मुक्तः ॥

भाषार्थः—[*स्तोकादिभ्यः*] स्तोकादिओं से उत्तर [*पञ्चम्याः*] पञ्चमी विभक्ति का उत्तरपद परे रहते अलुक् अर्थात् लुक् नहीं होता है ॥

वाचंयमपुरन्दरौ १।२॥ च अ०॥ *स०*—वाचंयम० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—मुम् ॥ *अर्थः*—वाचंयम पुरन्दर इत्यत्र मुमागमो निपात्यते ॥ *उदा०*—वाचंयम आस्ते। पुरं दारयतीति पुरंदरः ॥

भाषार्थः—[*वाचंयमपुरन्दरौ*] वाचंयम पुरन्दर इन शब्दों में [*च*] भी मुम् आगम निपातन किया जाता है। वाचंयमः में *वाचि यमो व्रते* (३।२।४०) से खच् तथा पुरन्दरः में *पूःसर्वयोर्दारिसहोः* (३।२।४१) से खच् प्रत्यय होता है ॥

कारे सत्यागदस्य ॥६।३।६९॥

कारे ७।१॥ सत्यागदस्य ६।१॥ *स०*—सत्यञ्च अगदश्च सत्यागदम्,

तस्य ''समाहारद्वन्द्वः ॥ *अनु०*—मुम्, उत्तरपदे ॥ *अर्थः*—कारशब्द उत्तरपदे सत्य, अगद इत्येतयोर्मुमागमो भवति ॥ *उदा०*—सत्यं करोतीति सत्यङ्कारः, अगदङ्कारः ॥

भाषार्थः—[*कारे*] कार शब्द उत्तरपद रहते [*सत्यागदस्य*] सत्य तथा अगद शब्द को मुम् आगम हो जाता है ॥ मुम् के 'म्' को अनुस्वार (८।३।२४) तथा परसवर्ण (८।४।५७) होकर 'ङ्' हो जायेगा ॥

श्येनतिलस्य पाते ञे ॥६।३।७०॥

श्येनतिलस्य ६।१॥ पाते ७।१॥ ञे ७।१॥ *स०*—श्येनश्च तिलश्च श्येनतिलम्, तस्य ''समाहारद्वन्द्वः ॥ *अनु०*—मुम्, उत्तरपदे ॥*अर्थः*—श्येन तिल इत्येतयोः ञे प्रत्यये पातशब्द उत्तरपदे मुमागमो भवति ॥ *उदा०*—श्येनपातोऽस्यां क्रीडायां श्यैनम्पाता मृगया, तैलम्पाता ॥

भाषार्थः—[*श्येनतिलस्य*] श्येन तथा तिल शब्द को [*पाते*] पात शब्द के उत्तरपद रहते तथा [*ञे*] ञ प्रत्यय के परे रहते मुम् आगम होता है ॥ *घञः सास्यां क्रियेति ञः* (४।२।५७) से घञन्त तिलपात एवं श्येनपात शब्दों से ञ प्रत्यय हुआ है, अतः ञ प्रत्यय परे है ही, एवं पात शब्द भी उत्तरपद है । ञ के ञित् होने से आदि को (७।२।११७) वृद्धि हो ही जायेगी ॥

रात्रेः कृति विभाषा ॥६।३।७१॥

रात्रेः ६।१॥ कृति ७।१॥ विभाषा १।१॥ *अनु०*—मुम्, उत्तरपदे ॥ *अर्थः*—कृदन्त उत्तरपदे रात्रिशब्दस्य विभाषा मुमागमो भवति ॥ *उदा०*—रात्रिञ्चरः । रात्रिचरः, रात्रिमटः, रात्र्यटः ॥

भाषार्थः—[*कृति*] कृदन्त उत्तरपद रहते [*रात्रेः*] रात्रि शब्द को [*विभाषा*] विकल्प करके मुम् आगम होता है ॥ चर धातु से रात्रि उपपद रहते चरेष्टः (३।२।१६) से कृत्संज्ञक ट प्रत्यय हुआ है, एवं अट धातु से पचाद्यच् हुआ है, इस प्रकार कृदन्त उत्तरपद उदाहरणों में है ही । रात्र्यटः में यणादेश हो गया है ॥

नलोपो नञः ॥६।३।७२॥

नलोपः १।१॥ नञः ६।१॥ *स०*—नकारस्य लोपः नलोपः षष्ठी-

तत्पुरुषः ॥ अनु०—उत्तरपदे ॥ अर्थः—नञो नकारस्य लोपो भवत्युत्तर-पदे परतः ॥ उदा०—अब्राह्मणः, अवृषलः, असुरापः, असोमपः ॥

भाषार्थः—[*नञः*] नञ् के [*नलोपः*] नकार का लोप हो जाता है, उत्तरपद परे रहते ॥ न् हल् का लोप करने पर 'अ' शेष रहेगा ॥

यहाँ से '*नञः*' की अनुवृत्ति ६।३।७६ तक जायेगी ॥

तस्मान्नुडचि ॥६।३।७३॥

तस्मात् ५।१॥ नुट् १।१॥ अचि ७।१॥ अनु०—नञः, उत्तरपदे ॥ अर्थः—तस्मात् लुप्तनकारात् नञः नुट् आगमो भवति अजादावुत्तरपदे ॥ उदा०—अनजः, अनश्वः ॥

भाषार्थः—[*तस्मात्*] उस लुप्त हुए नकार वाले नञ् से उत्तर [*नुट्*] नुट् का आगम [*अचि*] अजादि शब्द के उत्तरपद रहते होता है ॥ 'तस्मात्' से यहाँ प्रकृत *नलोपो नञः* से कहा हुआ लुप्त नकार वाला नञ् ही निर्दिष्ट है ॥ न+अजः = अ+अजः यहाँ नुट् आगम होकर अनजः अनश्वः बन गया ॥

नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्र-नाकेषु प्रकृत्या ॥६।३।७४॥

नभ्राण्न''केषु ७।३॥ प्रकृत्या ३।१॥ स०—नभ्राण्न० इत्यत्रेतरेतर-द्वन्द्वः ॥ *अनु०*—नञः ॥ अर्थः—नभ्राट्, नपात्, नवेदा, नासत्या, नमुचि, नकुल, नख, नपुंसक, नक्षत्र, नक्र, नाक इत्येतेषु नञ् प्रकृत्या भवति ॥ *उदा०*—न भ्राजते = नभ्राट् । न पातीति नपात् । न वेत्तीति नवेदाः । सत्सु साधवः सत्याः, न सत्या असत्याः, न असत्याः नासत्याः । न मुञ्चतीति नमुचिः । नास्य कुलमस्तीति नकुलः । नास्य खमस्तीति नखम् । न स्त्री न पुमान् = नपुंसकम् । न क्षरति क्षीयते इति वा नक्षत्रम् । न क्रामतीति नक्रः । नास्मिन् अकमिति नाकम् ॥

भाषार्थः—[*नभ्राण्न''नाकेषु*] नभ्राट्, नपात्, नवेदा, नासत्या, नमुचि, नकुल, नख, नपुंसक, नक्षत्र, नक्र, नाक इन शब्दों में जो नञ् उसे [*प्रकृत्या*] प्रकृतिभाव हो जाता है, अर्थात् *नलोपो नञः*, *तस्मान्नुडचि* सूत्रों की प्रवृत्ति नहीं होती ॥ नभ्राट् में भ्राज् धातु से *भ्राजभास०* (३।२।१७७) से क्विप् एवं *व्रश्चभ्रस्ज०* (८।२।३६) से षत्व जश्त्व चर्त्व

होकर टकार हुआ। नपात् में पात् शत्रन्त है। नवेदाः में विद् धातु औणादिक असुन् प्रत्ययान्त है। जो सज्जनों में असाधु नहीं हैं वे नासत्याः कहे जायेंगे। नमुचिः यहाँ औणादिक (उणा० ४।१२०) 'कि' प्रत्यय हुआ है। नपुंसकम् यहाँ स्त्रीपुंस को पुंसक भाव निपातन से होता है। नक्रः यहाँ क्रम धातु से ड प्रत्यय निपातन से होता है। टि भाग का लोप होकर 'न क्र् अ = नक्र' बन गया। कम् सुख को कहते हैं, अतः अकम् दुःख होगा, पुनः नञ् समास करने पर अकम् का विपरीत नाकम् स्वर्ग कहा जायेगा॥

यहाँ से '*प्रकृत्या*' की अनुवृत्ति ६।३।७६ तक जायेगी॥

एकादिश्चैकस्य चादुक् ॥६।३।७५॥

एकादिः १।१॥ च अ०॥ एकस्य ६।१॥ च अ०॥ आदुक् १।१॥ *स०*—एक आदिर्यस्य स एकादिः, बहुव्रीहिः॥ *अनु०*—प्रकृत्या, नञः॥ *अर्थः*—एकादिर्नञ् प्रकृत्या भवति, एकशब्दस्य च आदुक् आगमो भवति॥ *उदा०*—एकेन न विंशतिः एकान्नविंशतिः, एकादूनविंशतिः। एकान्नत्रिंशत्, एकादूनत्रिंशत्॥

भाषार्थः—[*एकादिः*] एक है आदि में जिसके ऐसे नञ् को [च] भी प्रकृतिभाव होता है [च] तथा [*एकस्य*] एक शब्द को [*आदुक्*] आदुक् का आगम होता है॥ विंशति शब्द से पहले नञ् समास होता है, पश्चात् एक शब्द के साथ तृतीया तत्पुरुष समास होता है। 'एक आदुक् न विंशति' यहाँ प्रकृतिभाव होकर तथा द् को *यरोऽनुनासिके०* (८।४।४४) से अनुनासिक आदेश होकर एकान्नविंशतिः बन गया। पक्ष में जब अनुनासिक नहीं हुआ तो एकादूनविंशतिः ही रहा॥

नगोऽप्राणिष्वन्यतरस्याम् ॥६।३।७६॥

नगः १।१॥ अप्राणिषु ७।३॥ अन्यतरस्याम् ७।१॥ *स०*—न प्राणिनो ऽप्राणिनस्तेषु ''' नञ्तत्पुरुषः॥ *अनु०*—प्रकृत्या, नञः, उत्तरपदे॥ *अर्थः*—अप्राणिषु वर्त्तमानो यो नगशब्दस्तत्र नञ् प्रकृत्या विकल्पेन भवति॥ *उदा०*—न गच्छन्तीति = नगाः वृक्षाः, अगाः वृक्षाः, नगाः पर्वताः अगाः पर्वताः॥

भाषार्थः—[*अप्राणिषु*] प्राणि भिन्न अर्थ में वर्त्तमान जो [*नगः*]

नग शब्द उसके नञ् को प्रकृतिभाव [*अन्यतरस्याम्*] विकल्प करके होता है ॥ *डप्रकरणे अन्येष्वपि०* (*वा०* ३।२।४८) इस वार्त्तिक से गम धातु से ड प्रत्यय होकर नगः बना है ॥

सहस्य सः संज्ञायाम् ॥६।३।७७॥

सहस्य ६।१॥ सः १।१॥ संज्ञायाम् ७।१॥ *अनु०*—उत्तरपदे ॥ *अर्थः*—सहशब्दस्य स इत्ययमादेशो भवति संज्ञायां विषये ॥ *उदा०*—सह अश्वत्थेन = साश्वत्थम्, सपलाशम्, सशिंशपम् ॥

भाषार्थः—[*सहस्य*] सह शब्द को [*सः*] स आदेश [*संज्ञायाम्*] संज्ञा विषय में होता है ॥ *तेन सहेति तुल्ययोगे* (२।२।२८) से उदाहरणों में बहुव्रीहि समास हुआ है ॥

यहाँ से '*सहस्य*' की अनुवृत्ति ६।३।८२ तक तथा '*सः*' की अनुवृत्ति ६।३।८८ तक जायेगी ॥

ग्रन्थान्ताधिके च ॥६।३।७८॥

ग्रन्थान्ताधिके ७।१॥ च अ० ॥ *स०*--ग्रन्थस्यान्तः ग्रन्थान्तः, षष्ठीतत्पुरुषः। ग्रन्थान्तश्च अधिकञ्च ग्रन्थान्ताधिकं, तस्मिन्......समाहारद्वन्द्वः ॥ *अनु०*—सहस्य, सः उत्तरपदे ॥ *अर्थः*—ग्रन्थान्तेऽधिके च वर्त्तमानस्य सहशब्दस्य स इत्ययमादेशो भवति ॥ *उदा०*—सकलं ज्योतिषमधीते, समुहूर्त्तम्। अधिके—सद्रोणा खारी, समाषः कार्षापणः, सकाकिणीको माषः ॥

भाषार्थः—[*ग्रन्थान्ताधिके*] ग्रन्थ के अन्त एवं अधिक अर्थ में वर्त्तमान सह शब्द को [*च*] भी स आदेश होता है ॥ कला काल विशेष का नाम है। तत्सहचरित जो ग्रन्थ वह कलया सह वर्त्तते सकलम् (कला पर्यन्त) कहा जायेगा। इसी प्रकार समुहूर्त्तम् में जानें। अर्थात् ग्रन्थ में जहां कला वा मुहूर्त्त का वर्णन है वहां तक ग्रन्थ पढ़ा। सद्रोणा खारी का अर्थ है, द्रोण से अधिक खारी। सर्वत्र पूर्ववत् बहुव्रीहि समास है ॥

द्वितीये चानुपाख्ये ॥६।३।७९॥

द्वितीये ७।१॥ च अ० ॥ अनुपाख्ये ७।१॥ *अनु०*—सहस्य सः, उत्तरपदे ॥ द्वयोः सहयुक्तयोरप्रधानो यः स द्वितीयः। उपाख्यायते

प्रत्यक्षत उपलभ्यते यः स उपाख्यः। उपाख्यादन्योऽनुपाख्यः, अनुमेय इत्यर्थः ॥ *अर्थः*—अनुमेये द्वितीये च सहस्य स इत्ययमादेशो भवति ॥ *उदा०*—साग्निः कपोतः, सपिशाचा वात्या, सराक्षसीका शाला ॥

भाषार्थः—दो में जो अप्रधान हो वह यहाँ द्वितीय शब्द से कहा गया है क्योंकि प्रधान तथा अप्रधान दोनों के होने पर अप्रधान को ही 'द्वितीय' कहा जाता है। प्रत्यक्ष उपलभ्यमान को उपाख्य तथा उससे अन्य अर्थात् अनुमेय (अनुमान किया जाने योग्य) को अनुपाख्य कहेंगे ॥ [*द्वितीये*] अप्रधान [*अनुपाख्ये*] अनुमेय को कहने में [च] भी सह को स आदेश हो जाता है॥ साग्निः आदि में पूर्ववत् बहुव्रीहि समास है। कपोत आग खाता है, ऐसी लौकिक प्रसिद्धि है, अतः जहाँ २ कपोत है, वहाँ २ आग भी होगी ऐसा अनुपाख्य अनुमेय हुआ। जहाँ २ आग है वहाँ २ कपोत अवश्य होगा, ऐसा अनुमान नहीं हो सकता, किन्तु जहाँ २ कपोत है वहाँ २ आग होगी ऐसा अनुमान होता है, इससे कपोत की प्रधानता सिद्ध होती है, तथा अग्नि की अप्रधानता। इस प्रकार अग्नि अनुपाख्य एवं द्वितीय = अप्रधान दोनों ही है, सो सह को स भाव हो गया। इसी प्रकार वात्या[1] (आँधी) से पिशाच अनुमेय एवं द्वितीय = अप्रधान भी है अतः सपिशाचा, सराक्षसीका बन गया ॥

अव्ययीभावे चाकाले ॥६।३।८०॥

अव्ययीभावे ७।१॥ च अ० ॥ अकाले ७।१॥ *स०*—न कालोऽकालस्तस्मिन्"""नञ्तत्पुरुषः ॥ *अनु०*—सहस्य सः, उत्तरपदे ॥ *अर्थः*—अव्ययीभावे च समासेऽकालवाचिन्युत्तरपदे सहस्य स इत्ययमादेशो भवति ॥ *उदा०*—सचक्रं धेहि, सधुरं प्राज ॥

---

१. कपोत का मांस अत्युष्ण होता है। पक्षाघात (लकवा मारना) सदृश वात प्रधान रोगों में मांसाशियों को कपोतमांस पथ्यरूप में दिया जाता है। उससे पक्षाघात रोग में सद्यः लाभ होता है। अत एव लोक में प्रसिद्धि है कि कपोत अग्नि खाता है। इसी प्रकार वात्या (= बबूला) आदि में फँस जाने के कारण निर्बल प्रकृति के पुरुष को कभी कभी उन्माद रोग हो जाता है इसी से लोक में प्रसिद्धि है वात्या (बबूला) में पिशाच का वास होता है। तद्वत् सराक्षसीका शाला भी मलिन शाला को कहेंगे ॥

भाषार्थः—[*अव्ययीभावे*] अव्ययीभाव समास में [*च*] भी [*अकाले*] अकालवाची शब्दों के उत्तरपद रहते सह को स आदेश होता है। सचक्रं सधुरं में *अव्ययं विभक्तिसमीप०* (२।१।६) से अव्ययीभाव समास हुआ है। सधुरं में *ऋक्पूरब्धूः०* (५।४।७४) से समासान्त अकार प्रत्यय हुआ है ॥

वोपसर्जनस्य ॥६।३।८१॥

वा अ० ॥ उपसर्जनस्य ६।१॥ *अनु०*—सहस्य, सः ॥ *अर्थः*—यस्य समासस्य सर्वेऽवयवाः उपसर्जनीभूतास्तदवयवस्य सहशब्दस्य वा स इत्ययमादेशो भवति ॥ *उदा०*—सपुत्रः, सहपुत्रः, सच्छात्रः, सहच्छात्रः ॥

भाषार्थः—जिस समास के सारे अवयव [*उपसर्जनस्य*] उपसर्जन हैं, तदवयव = उसके अवयव सह शब्द को [*वा*] विकल्प से 'स' आदेश होता है ॥ यहाँ 'उपसर्जनस्य' पद सह शब्द का विशेषण न होकर पूरे समास के पदों का विशेषण है, अतः 'जिसके सारे अवयव उपसर्जन हैं' ऐसा अर्थ होगा। इस प्रकार बहुव्रीहि समास में ही समास के सारे पद उपसर्जन होते हैं, अतः यह विधि बहुव्रीहि समास में ही होगी ॥

प्रकृत्याऽऽशिषि ॥६।३।८२॥

प्रकृत्या ३।१॥ आशिषि ७।१॥ *अनु०*—सहस्य ॥ *अर्थः*—आशिषि विषये सहशब्दः प्रकृत्या भवति ॥ *उदा०*—स्वस्ति देवदत्ताय सहपुत्राय सहच्छात्राय सहामात्याय ॥

भाषार्थः—[*आशिषि*] आशीर्वाद विषय में सह शब्द को [*प्रकृत्या*] प्रकृतिभाव हो जाता है ॥ पूर्व सूत्र से प्राप्ति थी यहाँ प्रकृतिभाव कहने से आशीर्वाद विषय में स आदेश नहीं हुआ ॥

समानस्य छन्दस्यमूर्द्धप्रभृत्युदर्केषु ॥६।३।८३॥

समानस्य ६।१॥ छन्दसि ७।१॥ अमूर्द्धप्रभृत्युदर्केषु ७।३॥ *स०*—मूर्द्धा च प्रभृतिश्च उदर्कश्च मूर्धप्रभृत्युदर्काः, इतरेतरद्वन्द्वः। न मूर्धप्रभृत्युदर्काः अमूर्द्धप्रभृत्युदर्कास्तेषु .... नञ्तत्पुरुषः ॥ *अनु०*—सः, उत्तरपदे ॥ *अर्थः*—छन्दसि विषये समानशब्दस्य 'स' इत्ययमादेशो भवति

मूर्धन्, प्रभृति, उदर्क इत्येतान्युत्तरपदानि वर्जयित्वा ॥ *उदा०*—अनुभ्राता सगर्भ्यः । अनुसखा सयूथ्यः । यो नः सनुत्यः ॥

भाषार्थः—[*छन्दसि*] वेद विषय में [*समानस्य*] समान शब्द को 'स' आदेश हो जाता है [*अमूर्धप्रभृत्युदर्केषु*] मूर्धन्, प्रभृति, उदर्क उत्तरपद में न हों तो ॥ समानो गर्भः = सगर्भः, तत्र भवः सगर्भ्यः, सयूथ्यः, सनुत्यः । यहाँ *सगर्भसयूथ०* (४।४।११४) से यत् प्रत्यय हुआ है, एवं सर्वत्र *पूर्वापरप्रथम०* (२।१।५०) से समास भी जानें ॥

यहाँ से '*समानस्य*' की अनुवृत्ति ६।३।८८ तक जायेगी ॥

ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचन-बन्धुषु ॥६।३।८४॥

ज्योतिर्ज·····बन्धुषु ७।३॥ *स०*—ज्योतिश्च, जनपदश्च रात्रिश्च नाभिश्च नाम च गोत्रञ्च रूपञ्च स्थानञ्च वर्णश्च वयश्च वचनञ्च बन्धुश्च ज्योतिर्ज·····बन्धवस्तेषु·····इतरेतरद्वन्द्वः ॥ *अनु०*—समानस्य, सः, उत्तरपदे ॥ *अर्थः*—ज्योतिस्, जनपद, रात्रि, नाभि, नाम, गोत्र, रूप, स्थान, वर्ण, वयस्, वचन, बन्धु इत्येतेषूत्तरपदेषु समानस्य स इत्ययमादेशो भवति ॥ *उदा०*—समानं ज्योतिरस्य = सज्योतिः, सजनपदः, सरात्रिः, सनाभिः, सनामा, सगोत्रः, सरूपः, सस्थानः, सवर्णः, सवयाः, सवचनः, सबन्धुः ॥

भाषार्थः—[*ज्योतिर्ज·····बन्धुषु*] ज्योतिस्, जनपद, रात्रि, नाभि, नाम, गोत्र, रूप, स्थान, वर्ण, वयस्, वचन, बन्धु इन शब्दों के उत्तरपद रहते समान को स आदेश हो जाता है ॥ सनामा यहाँ *सर्वनामस्थाने०* (६।४।८) से तथा सवयाः यहाँ *अत्वसन्तस्य०* (६।४।१४) से दीर्घ हुआ है ॥

चरणे ब्रह्मचारिणि ॥६।३।८५॥

चरणे ७।१॥ ब्रह्मचारिणि ७।१॥ *अनु०*—समानस्य, सः, उत्तरपदे ॥ *अर्थः*—ब्रह्मचारिण्युत्तरपदे चरणे गम्यमाने समानस्य स इत्ययमादेशो भवति ॥ *उदा०*—समानो ब्रह्मचारी सब्रह्मचारी । समाने ब्रह्मणि व्रतचारी = सब्रह्मचारी ॥

भाषार्थः—[*चरणे*] चरण गम्यमान[1] हो तो [*ब्रह्मचारिणि*] ब्रह्मचा उत्तरपद रहते समान शब्द को स आदेश हो जाता है ॥ ब्रह्म वेद कहते हैं, उसके अध्ययन के लिये जो व्रत वह भी ब्रह्म कहाता है, उ व्रत में जो चले वह ब्रह्मचारी होगा। *व्रते* (३।२।८०) से णिनि प्रत्य हुआ है। इस प्रकार समान ब्रह्म (वेद) में जो व्रत करे वह सब्रह्मचा होगा ॥

तीर्थे ये ॥६।३।८६॥

तीर्थे ७।१॥ ये ७।१॥ *अनु०*—समानस्य, सः, उत्तरपदे ॥ *अर्थः*—यप्रत्यये परतस्तीर्थशब्द उत्तरपदे समानस्य स इत्ययमादेशो भवति। *उदा०*—सतीर्थ्यः ॥

भाषार्थः—[*तीर्थे*] तीर्थ शब्द उत्तरपद में हो तो [*ये*] य प्रत्यय परे रहते समान शब्द को स आदेश होता है ॥ समान का तीर्थ शब्द के साथ कर्मधारय समास होकर *समानतीर्थे वासी* (४।४।१०७) से यत् प्रत्यय होता है, पश्चात् समान को स आदेश हो ही जायेगा ॥

यहाँ से 'ये' की अनुवृत्ति ६।३।८७ तक जायेगी ॥

---

१. ब्रह्म नाम वेद का है। यदि यहाँ ब्रह्म शब्द से प्रधान ऋग्वेदादि चार वेदों का ही ग्रहण माना जाए तो ऋग्वेद की समस्त शाखाओं के अध्येता परस्पर सब्रह्मचारी होंगे, पर यह इष्ट नहीं है। इसी प्रकार ब्रह्म से वेद की तत् तत् शाखा का ही ग्रहण किया जाए तो केवल उस उस शाखा के अध्येता ही परस्पर सब्रह्मचारी होंगे, परन्तु इतने ही अर्थ में सब्रह्मचारी पद प्रयुक्त नहीं होता। अतः सूत्रकार ने "चरणे" विशेष पद पढ़ा है। एक मूल शाखा की अवान्तर शाखाओं का समूह चरण कहाता है। जैसे ऋग्वेद की शाकल आदि मुख्य पाँच शाखाएँ हुईं। उनकी फिर अवान्तर शाखाएँ हुईं, वे सब अवान्तर शाखाएँ शाकल आदि मुख्य चरण शब्द से व्यवहृत होती हैं। इसी प्रकार वाजसनेय मुख्य विभाग की १५ माध्यन्दिन काण्व आदि अवान्तर शाखाएँ हुईं, ये सभी वाजसनेय चरण नाम से व्यवहृत होती हैं। इसी प्रकार तैत्तिरीय मैत्रायणी काठक आदि भी चरण शब्द हैं न कि शाखामात्र। इस प्रकार वाजसनेय चरण अन्तर्गत किन्हीं भी भिन्न भिन्न शाखाओं के अध्येता भी एक चरणान्तर्गत होने से परस्पर सब्रह्मचारी कहाते हैं ॥

विभाषोदरे ॥६।३।८७॥

विभाषा १।१॥ उदरे ७।१॥ *अनु०*—ये, समानस्य, सः, उत्तरपदे ॥ *अर्थः*—उदरशब्द उत्तरपदे यप्रत्यये परतः समानशब्दस्य विभाषा स इत्ययमादेशो भवति ॥ *उदा०*—सोदर्यः, समानोदर्यः ॥

भाषार्थः—[*उदरे*] उदर शब्द उत्तरपद रहते य प्रत्यय परे हो तो समान शब्द को स आदेश [*विभाषा*] विकल्प करके होता है ॥ समानोदर्यः में *समानोदरे शयित ओ चोदात्तः* (४।४।१०८) से यत् प्रत्यय तथा सोदर्यः में *सोदराद्यः* (४।४।१०९) से य प्रत्यय हुआ है ॥

दृग्दृशवतुषु ॥६।३।८८॥

दृग्दृशवतुषु ७।३॥ *स०*—दृक्० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—समानस्य, सः, उत्तरपदे ॥ *अर्थः*—दृक्, दृश, वतु इत्येतेषूत्तरपदेषु समानस्य स इत्ययमादेशो भवति ॥ *उदा०*—सदृक्, सदृशः ॥

भाषार्थः—[*दृग्दृशवतुषु*] दृक्, दृश, वतु इनके उत्तरपद रहते समान शब्द को स आदेश हो जाता है ॥ *समानान्ययोश्चेति वक्तव्यम्* (वा० ३।२।६०) इस वार्त्तिक से समान उपपद रहते भी किन् तथा कञ् प्रत्यय होता है, अतः सदृक्, सदृशः बन गया। वतुप् प्रत्यय *यत्तदेतेभ्यः परिमाणे०* (५।२।३९) से यत् तद् एवं एतद् से ही होता है, अतः समान शब्द से उत्तर वतुप् सम्भव न होने से यहाँ वतुप् परे का उदाहरण नहीं दिया है। इस प्रकार वतुप् ग्रहण उत्तरार्थ है ॥

यहाँ से '*दृग्दृशवतुषु*' की अनुवृत्ति ६।३।९० तक जायेगी ॥

इदङ्किमोरीश्की ॥६।३।८९॥

इदङ्किमोः ६।२॥ ईश्की लुप्तप्रथमान्तनिर्देशः ॥ *स०*— इदम् च किम् च इदम्किमौ, तयोः ''इतरेतरद्वन्द्वः। ईश्० इत्यत्रापि इतरेतरद्वन्द्वः ॥ *अनु०*—दृग्दृशवतुषु, उत्तरपदे ॥ *अर्थः*—इदम्, किम् इत्येतयोः ईश्, की इत्येतौ यथासंख्यमादेशौ भवतः दृग्दृशवतुषु परतः ॥ *उदा०*—ईदृक्, ईदृशः, इयान्। कीदृक्, कीदृशः, कियान् ॥

भाषार्थः—[*इदंकिमोः*] इदम् तथा किम् को यथासंख्य करके [*ईश्की*] ईश् तथा की आदेश हो जाते हैं, दृग् दृश तथा वतुप् परे

रहते ॥ ईदृक् ईदृशः कीदृक् कीदृशः में कञ् तथा क्विन् प्रत्यय पूर्व सूत्रानुसार जानें । इयान् कियान् की सिद्धि भाग २ परि० ५।२।४० पृ० ५४८ में देखें ॥

आ सर्वनाम्नः ॥६।३।९०॥

आ १।१॥ सर्वनाम्नः ६।१॥ *अनु०*—दृग्दृशवतुषु, उत्तरपदे ॥ *अर्थः*—सर्वनाम्नः आकारादेशो भवति दृग्दृशवतुषु परतः ॥ *उदा०*—तादृक्, तादृशः, तावान् । यादृक्, यादृशः, यावान् ॥

भाषार्थः-[*सर्वनाम्नः*] सर्वनाम संज्ञक शब्दों को [*आ*] आकारादेश होता है, दृग् दृश तथा वतुप् परे रहते ॥ *अलोऽन्त्यस्य* (१।१।५१) से तद् यद् के अन्तिम अल् को आकारादेश होता है । पूर्ववत् कञ्, क्विन् प्रत्यय होंगे ॥

यहाँ से '*सर्वनाम्नः*' की अनुवृत्ति ६।३।९१ तक जायेगी ॥

विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये ॥६।३।९१॥

विष्वग्देवयोः ६।२॥ च अ०॥ टेः ६।१॥ अद्रि लुप्तप्रथमान्तनिर्देशः ॥ अञ्चतौ ७।१॥ वप्रत्यये ७।१॥ *स०*— विष्वक्० इत्यत्रेतरेतरद्वन्द्वः । वः प्रत्ययो यस्मात् स वप्रत्ययस्तस्मिन्''' बहुव्रीहिः ॥ *अनु०*—सर्वनाम्नः, उत्तरपदे ॥ *अर्थः*—विष्वक् देव इत्येतयोः सर्वनाम्नश्च टेः अद्रीत्ययमादेशो भवति, अञ्चतौ वप्रत्ययान्त उत्तरपदे ॥ *उदा०*—विष्वगञ्चतीति विष्वद्र्यङ्, देवद्र्यङ् । सर्वनाम्नः—तद्र्यङ्, यद्र्यङ् ॥

भाषार्थः—[*विष्वग्देवयोः*] विष्वग् एवं देव शब्दों के [*च*] तथा सर्वनाम शब्दों के [*टेः*] टि को [*अद्रि*] अद्रि आदेश होता है, [*वप्रत्यये*] वप्रत्ययान्त [*अञ्चतौ*] अञ्चु धातु के परे रहते ॥ क्विप्, क्विन् का जो 'व' उसी का यहाँ वप्रत्यय से अभिप्राय है ॥ अञ्चु धातु से *ऋत्विग्दधृक्०* (३।२।५९) से क्विन् प्रत्यय होकर 'अङ्' बना है, इसकी सिद्धि भाग १ परि० ३।२।५९ में देखें । अब इस वप्रत्ययान्त अञ्चु के परे रहते विष्वक् के टि भाग 'अक्' को तथा देव के टि भाग 'अ' को 'अद्रि' आदेश होकर 'विष्व् अद्रि अङ् तथा देव् अद्रि अङ्' रहा । यणादेश होकर विष्वद्र्यङ् देवद्र्यङ् बन गया । तद् यद् से भी इसी प्रकार तद्र्यङ्, यद्र्यङ् की सिद्धि जानें ॥

यहाँ से '*अञ्चतौ वप्रत्यये*' की अनुवृत्ति ६।३।९४ तक जायेगी ॥

समः समि ॥६।३।९२॥

समः ६।१॥ समि लुप्तप्रथमान्तनिर्देशः ॥ *अनु०*—अञ्चतौ वप्रत्यये, उत्तरपदे ॥ *अर्थः*—सम् इत्येतस्य समि इत्ययमादेशो भवति वप्रत्ययान्तेऽञ्चता वुत्तरपदे ॥ *उदा०*—सम्यङ्, सम्यञ्चौ, सम्यञ्चः ॥

भाषार्थः—[*समः*] सम् को [*समि*] समि आदेश होता है, वप्रत्ययान्त अञ्चु धातु के उत्तरपद रहते ॥ पूर्ववत् सिद्धि जानें ॥

तिरसस्तिर्यलोपे ॥६।३।९३॥

तिरसः ६।१॥ तिरि लुप्तप्रथमान्तनिर्देशः ॥ अलोपे ७।१॥ *स०*—अलोप इत्यत्र नञ्तत्पुरुषः ॥ *अनु०*—अञ्चतौ वप्रत्यये, उत्तरपदे ॥ *अर्थः*—तिरस् इत्येतस्य तिरि इत्ययमादेशो भवति वप्रत्ययान्तेऽञ्चतौ परतोऽलोपे सति ॥ *उदा०*—तिर्यङ्, तिर्यञ्चौ, तिर्यञ्चः ॥

भाषार्थः—[*तिरसः*] तिरस् को [*तिरि*] तिरि आदेश वप्रत्ययान्त अञ्चु के उत्तरपद रहते होता है, यदि इसका = अञ्चु का [*अलोपे*] लोप न हुआ हो तो ॥ तिरश्चा इत्यादि में अञ्चु के 'अ' का लोप *अचः* (६।४।१३८) से होता है, अतः 'अलोपे' कहकर इसी विषय का प्रतिषेध किया है ॥

सहस्य सध्रिः ॥६।३।९४॥

सहस्य ६।१॥ सध्रिः १।१॥ *अनु०*—अञ्चतौ वप्रत्यये, उत्तरपदे ॥ *अर्थः*—सहस्य सध्रिरित्ययमादेशो भवति वप्रत्ययान्तेऽञ्चतावुत्तरपदे ॥ *उदा०*—सध्र्यङ्, सध्र्यञ्चौ, सध्र्यञ्चः, सध्रीचः॥

भाषार्थः—[*सहस्य*] सह शब्द को [*सध्रिः*] सध्रि आदेश वप्रत्ययान्त अञ्चु के उत्तरपद रहते होता है ॥ सध्रीचः में अचः (६।४।१३८) से अञ्चु के अ का लोप तथा चौ (६।३।१३६) से पूर्वपद को दीर्घ हुआ है ॥

यहाँ से '*सहस्य*' की अनुवृत्ति ६।३।९५ तक जायेगी ॥

सध मादस्थयोश्छन्दसि ॥६।३।९५॥

सध लुप्तप्रथमान्तनिर्देशः ॥ मादस्थयोः ७।२॥ छन्दसि ७।१॥ *स०*—माद० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—सहस्य, उत्तरपदे ॥ *अर्थः*—माद स्थ इत्येतयोरुत्तरपदयोश्छन्दसि विषये सहस्य सध इत्ययमादेशो भवति ॥ *उदा०*—सधमादो द्युम्न्य एकास्ताः । सधस्थाः ॥

भाषार्थः—[*मादस्थयोः*] माद तथा स्थ उत्तरपद रहते [*छन्दसि*] वेद विषय में सह शब्द को [*सध*] सध आदेश होता है ॥

द्व्यन्तरुपसर्गेभ्योऽप ईत् ॥६।३।९६॥

द्व्यन्तरुपसर्गेभ्यः ५।३॥ अपः ६।१॥ ईत् १।१॥ *स०*—द्विश्च[1] अन्तश्च उपसर्गाश्च द्व्यन्तरुपसर्गास्तेभ्यः' 'इतरेतरद्वन्द्वः ॥ *अनु०*–उत्तरपदे ॥ *अर्थः*–द्वि अन्तर् इत्येताभ्यामुपसर्गाच्चोत्तरस्य 'अप्' इत्येतस्य ईकारादेशो भवति ॥ *उदा०*—द्वीपम्, अन्तरीपम् । उपसर्गात्—नीपम्, वीपम्, समीपम् ॥

भाषार्थः—[*द्व्यन्तरुपसर्गेभ्यः*] द्वि अन्तर् तथा उपसर्ग से उत्तर [*अपः*] अप् शब्द को [*ईत्*] ईकारादेश हो जाता है ॥ *आदेः परस्य* (१।१।५३) से अप् के अकार को ई होता है। सिद्धियाँ भाग १ परि० १।१।५३ पृ० ७२७ में देखें ॥

यहाँ से '*अपः*' की अनुवृत्ति ६।३।९७ तक जायेगी ॥

ऊदनोर्देशे ॥६।३।९७॥

ऊत् १।१॥ अनोः ५।१॥ देशे ७।१॥ *अनु०*—अपः, उत्तरपदे ॥ *अर्थः*—अनोः उत्तरस्य अप् इत्येतस्य ऊकारादेशो भवति देशे वाच्ये ॥ *उदा०*—अनुगता आपोऽस्मिन् = अनूपो देशः ॥

भाषार्थः—[*अनोः*] अनु से उत्तर अप् शब्द को [*ऊत्*] ऊकारादेश होता है [*देशे*] देश को कहने में ॥ पूर्ववत् अप् के अ को ऊकार होता है ॥

---

१. शब्दस्वरूपापेक्षोऽयं प्रयोगः ।

अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु ॥६।३।९८॥

अषष्ठ्यतृतीयास्थस्य ६।१॥ अन्यस्य ६।१॥ दुक् १।१॥ आशी····गच्छेषु ७।३॥ स०—न षष्ठी अषष्ठी, न तृतीया अतृतीया, नञ्तत्पुरुषः। अषष्ठी च अतृतीया च अषष्ठ्यतृतीये, तयोः तिष्ठतीति अषष्ठ्यतृतीयास्थः, तस्य·····इतेरतरद्वन्द्वगर्भतत्पुरुषः। आशीरा० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—उत्तरपदे ॥ *अर्थः*—आशिस्, आशा, आस्था, आस्थित, उत्सुक, ऊति, कारक, राग, छ इत्येतेषु परतः अषष्ठीस्थस्य अतृतीयास्थस्य चान्यशब्दस्य 'दुक्' आगमो भवति ॥ *उदा०*—अन्या आशीः = अन्यदाशीः। अन्या आशा = अन्यदाशा। अन्या आस्था = अन्यदास्था। अन्य— आस्थितः = अन्यदास्थितः। अन्य उत्सुकः = अन्यदुत्सुकः। अन्या ऊतिः = अन्यदूतिः। अन्यः कारकः = अन्यत्कारकः। अन्यो रागः = अन्यद्रागः। अन्यस्मिन् भवः = अन्यदीयः ॥

भाषार्थः—[*आशी··गच्छेषु*] आशिस्, आशा, आस्था, आस्थित, उत्सुक, ऊति, कारक, राग, छ इनके परे रहते [*अषष्ठ्यतृतीयास्थस्य*] अषष्ठी स्थित तथा अतृतीयास्थित [*अन्यस्य*] अन्य शब्द को [*दुक्*] दुक् आगम होता है ॥ अन्य दुक् आशीः = अन्यदाशीः। इसी प्रकार सबमें जानें। अन्यदीयः यहाँ *गहादिभ्यश्च* (४।२।१३७) से छ प्रत्यय हुआ है ॥

यहाँ से '*अषष्ठ्यतृतीयास्थस्य अन्यस्य* दुक्' की अनुवृत्ति ६।३।९९ तक जायेगी ॥

अर्थे विभाषा ॥६।३।९९॥

अर्थे ७।१॥ विभाषा १।१॥ *अनु०*—अषष्ठ्यतृतीयास्थस्य अन्यस्य दुक्, उत्तरपदे ॥ *अर्थः*—अर्थशब्द उत्तरपदेऽषष्ठीस्थस्यातृतीयास्थस्यान्यस्य विभाषा दुगागमो भवति ॥ *उदा०*—अन्यस्मै इदम् = अन्यदर्थम्। अन्यार्थम् ॥

भाषार्थः—[*अर्थे*] अर्थ शब्द उत्तरपद में हो तो अषष्ठीस्थ तथा अतृतीयास्थ अन्य शब्द को [*विभाषा*] विकल्प करके दुक् आगम होता है ॥

कोः कत्तत्पुरुषेऽचि ॥६।३।१००॥

कोः ६।१॥ कत् १।१॥ तत्पुरुषे ७।१॥ अचि ७।१॥ अनु०—उत्तरपदे ॥ *अर्थः*—अजादावुत्तरपदे तत्पुरुषे समासे कु इत्येतस्य कदित्ययमादेशो भवति ॥ *उदा०*—कुत्सितोऽजः = कदजः, कदश्वः कदुष्ट्रः, कदन्नम् ॥

भाषार्थः—[*कोः*] कु को [*तत्पुरुषे*] तत्पुरुष समास में [*अचि*] अजादि शब्द उत्तरपद हो तो [*कत्*] कत् आदेश होता है ॥ *कुगतिप्रादयः* (२।२।१८) से कदजः आदि में समास हुआ है । *झलां जशोऽन्ते* (८।२।३९) से जश्त्व होकर त् को द् हो ही जायेगा ॥

यहाँ से '*कोः*' की अनुवृत्ति ६।३।१०७ तक तथा '*कत्*' की ६।३।१०२ तक जायेगी ॥

रथवदयोश्च ॥६।३।१०१॥

रथवदयोः ७।२॥ च अ० ॥ *स०*—रथ० इत्यत्रेतरेतरद्वन्द्वः ॥ अनु०—कोः, कत्, उत्तरपदे ॥ *अर्थः*—रथ वद इत्येतयोश्चोत्तरपदयोः कोः कदित्ययमादेशो भवति ॥ *उदा०*—कद्रथः, कद्वदः ॥

भाषार्थः—[*रथवदयोः*] रथ तथा वद शब्द उत्तरपद में हो तो [*च*] भी कु को कत् आदेश होता है ॥

तृणे च जातौ ॥६।३।१०२॥

तृणे ७।१॥ च अ० ॥ जातौ ७।१॥ अनु०—कोः, कत्, उत्तरपदे ॥ *अर्थः*—तृणशब्द उत्तरपदे कोः कदादेशो भवति जातावभिधेयायाम् ॥ *उदा०*— कत्तृणा नाम जातिः ॥

भाषार्थः—[*तृणे*] तृण शब्द उत्तरपद में हो तो [*च*] भी कु को कत् आदेश होता है [*जातौ*] जाति अभिधेय होने पर ॥

का पथ्यक्षयोः ॥६।३।१०३॥

का १।१॥ पथ्यक्षयोः ७।२॥ *स०*—पथ्य० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—कोः, उत्तरपदे ॥ *अर्थः*—पथिन् अक्ष इत्येतयोरुत्तरपदयोः कोः

का इत्ययमादेशो भवति ॥ उदा०—कुत्सितः पन्थाः = कापथः, कुत्सिते-अक्षिणी अस्य = काक्षः ॥

भाषार्थः—[*पथ्यक्ष्योः*] पथिन् तथा अक्ष शब्द उत्तरपद हो तो कु शब्द को [*का*] का आदेश होता है ॥ कापथः में *ऋक्पूरब्धूः०* (५।४।७४) से समासान्त 'अ' प्रत्यय तथा काक्षः में *बहुव्रीहौ सक्थ्यक्ष्णोः०* (५।४।११३) से समासान्त षच् प्रत्यय हुआ है। का पथिन् अ = *नस्तद्धिते* (६।४।१४४) से टि भाग का लोप होकर कापथः काक्षः बन गया ॥

यहाँ से '*का*' की अनुवृत्ति ६।३।१०७ तक जायेगी ॥

ईषदर्थे ॥६।३।१०४॥

ईषदर्थे ७।१॥ *स०*—ईषदः अर्थः ईषदर्थस्तस्मिन् ''षष्ठीतत्पुरुषः ॥ *अनु०*—का, कोः, उत्तरपदे ॥ *अर्थः*—ईषदर्थे वर्त्तमानस्य कोः का इत्ययमादेशो भवति ॥ *उदा०*—ईषन्मधुरम् = कामधुरम्, कालवणम् ॥

भाषार्थः—[*ईषदर्थे*] ईषत् (थोड़ा) के अर्थ में वर्त्तमान कु शब्द को 'का' आदेश हो जाता है ॥ पूर्ववत् *कुगतिप्रादयः* (२।२।१८) से तत्पुरुष समास उदाहरणों में जानें ॥

विभाषा पुरुषे ॥६।३।१०५॥

विभाषा १।१॥ पुरुषे ७।१॥ *अनु०*— का, कोः, उत्तरपदे ॥ *अर्थः*—पुरुषशब्द उत्तरपदे कोः का इत्ययमादेशो विकल्पेन भवति ॥ *उदा०*—कापुरुषः, कुपुरुषः ॥

भाषार्थः—[*पुरुषे*] पुरुष शब्द उत्तरपद हो तो [*विभाषा*] विकल्प से कु शब्द को 'का' आदेश हो जाता है ॥ जब का आदेश नहीं होगा तो कु ही रहेगा ॥ यहाँ भी तत्पुरुष समास पूर्ववत् जानें ॥

यहाँ से '*विभाषा*' की अनुवृत्ति ६।३।१०७ तक जायेगी ॥

कवं चोष्णे ॥६।३।१०६॥

कवम् १।१॥ च अ०॥ उष्णे ७।१॥ *अनु०*—विभाषा, का, कोः, उत्तरपदे ॥ *अर्थः*—उष्णशब्द उत्तरपदे कोः कवमित्ययमादेशो भवति, का च विकल्पेन ॥ *उदा०*—कवोष्णम्, कोष्णम्, कदुष्णम् ॥

भाषार्थः—[*उष्णे*] उष्ण शब्द उत्तरपद रहते कु शब्द को [*कवम्*] कव आदेश [च] भी होता है, एवं विकल्प से का आदेश भी होता है ॥ 'कव' आदेश होकर कवोष्णम् तथा 'का' होकर कोष्णम् एवं पक्ष में जब 'का' आदेश नहीं हुआ तो अजादि उष्ण शब्द के परे रहते *कोः कत्तत्०* (६।३।१००) से कत् आदेश होकर कदुष्णम् बन गया ॥

यहाँ से 'कवम्' की अनुवृत्ति ६।३।१०७ तक जायेगी ॥

पथि च च्छन्दसि ॥६।३।१०७॥

पथि ७।१॥ च अ०॥ छन्दसि ७।१॥ अनु०—विभाषा, कवम्, का, कोः, उत्तरपदे ॥ *अर्थः*—पथिन् शब्द उत्तरपदे छन्दसि विषये कोः कव, का इत्येतावादेशौ विकल्पेन भवतः ॥ *उदा०*—कवपथः, कापथः, कुपथः ॥

भाषार्थः—[*पथि*] पथिन् शब्द उत्तरपद रहते [च] भी [*छन्दसि*] वेद विषय में कु को 'कव' तथा 'का' आदेश विकल्प करके होते हैं ॥ पक्ष में जब कव एवं का आदेश नहीं होंगे तो कु ही रह कर 'कुपथः' बनेगा ॥

पृषोदरादीनि यथोपदिष्टम् ॥६।३।१०८॥

पृषोदरादीनि १।३॥ यथोपदिष्टम् अ०॥ *स०*—पृषोदर आदिः येषाम् तानि पृषोदरादीनि, बहुव्रीहिः । यानि यानि (शिष्टैः) उपदिष्टानि यथोपदिष्टम्, *यथाऽसादृश्ये* (२।१।७) इति वीप्सायामव्ययीभावः ॥ *अर्थः*—पृषोदरप्रकाराणि शब्दरूपाणि शिष्टैर्यथोच्चारितानि तथैव साधूनि भवन्ति ॥ दिशिरत्रोच्चारणक्रियः, उपदिष्टान्युच्चारितानीत्यर्थः ॥ *उदा०*—पृषद् उदरं यस्य तत् पृषोदरम् । पृषद् उद्वानं यस्य तत् पृषोद्वानम् । उभयत्र तकारलोपः । वारिवाहको बलाहकः । पूर्वपदस्य वारिशब्दस्य 'ब' आदेशः उत्तरपदादेश्च लत्वम् । जीवनस्य मूतः जीमूतः । अत्र वनशब्दस्य लोपः । शवानां शयनं श्मशानम् । अत्र शवशब्दस्य 'श्म' आदेशः, शयनशब्दस्यापि 'शान' आदेशः ॥

भाषार्थः—[*पृषोदरादीनि*] पृषोदर इत्यादि शब्दरूप (शिष्टों के द्वारा) [*यथोपदिष्टम्*] जिस प्रकार उच्चरित हैं वैसे ही साधु माने जाते हैं ॥ अर्थात् जहाँ लोप-आगम-वर्ण विकार-वर्णविपर्यय आदि देखा जाये, किन्तु शास्त्र

द्वारा उसका विधान न हो, ऐसे शब्दों को भी शिष्ट पुरुषों द्वारा उच्चरित होने के कारण साधु समझना चाहिये ॥ शिष्ट कौन होते हैं ? इस विषय में इसी सूत्र के महाभाष्य में कहा है—एतस्मिन्नार्यनिवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद् विद्यायाः पारगास्तत्र भवन्तः शिष्टाः ॥

अर्थात् इस आर्य निवास (आर्यावर्त देश) में रहनेवाले कुम्भीधान्य (जो घर में घड़ाभर ही अन्न रखते हैं) लोभरहित, बिना किसी कारण के अर्थात् निष्काम भाव से जो किसी विद्या में पारङ्गत हैं ऐसे व्यक्ति शिष्ट कहाते हैं ।

धर्मशास्त्रों में शिष्ट का लक्षण षडङ्गवेदवित् किया है ऐसे महाविद्वान् शिष्टपुरुषों द्वारा प्रयुक्त शब्दों के यथार्थ ज्ञान के लिए ही भगवान् पाणिनि ने अष्टाध्यायी बनाई । इसीलिए महाभाष्य में कहा है—*शिष्टपरिज्ञानार्थाऽष्टाध्यायी* (६।३।१०७)[1] ।

उपर्युक्त उदाहरणों में कहां किसका लोप वा आगम आदेश आदि हुआ है यह दर्शा दिया है ॥

संख्याविसायपूर्वस्याह्नस्याहनन्यतरस्याम् ङौ ॥६।३।१०९॥

संख्याविसायपूर्वस्य ६।१॥ अह्नस्य ६।१॥ अहन् १।१॥ अन्यतरस्याम् ७।१॥ ङौ ७।१॥ *स०*—संख्या च विश्च सायश्च संख्याविसायम्, इत्येतत् पूर्वं यस्य स संख्याविसायपूर्वस्तस्य' 'द्वन्द्वगर्भबहुव्रीहिः ॥ *अर्थः*—संख्या, वि, साय इत्येवंपूर्वस्य अह्न शब्दस्य स्थाने अहन् इत्ययमादेशो भवति विकल्पेन, ङौ परतः ॥ *उदा०*—द्वयोरह्नोर्भवः द्व्यह्नः

---

१. आजकल के वैयाकरण महाभाष्यकार के 'शिष्टपरिज्ञानार्था अष्टाध्यायी' नियम को न मानकर ऋषिकृत ग्रन्थों में प्रयुक्त शब्दों की विवेचना भी अष्टाध्यायी के आधार पर करते हैं और जो शब्द अष्टाध्यायी के नियमों से सिद्ध नहीं होते उन्हें आर्ष प्रयोग अर्थात् असाधु प्रयोग मानते हैं । वस्तुतः यह प्रक्रिया शास्त्रविरुद्ध है । आर्ष शब्द सभी साधु हैं उनका साधुत्व इसी सूत्र से समझ लेना चाहिये ।

तस्मिन् द्व्यह्नि द्व्यहनि । त्र्यह्नि त्र्यहनि । व्यपगतमह्नो व्यह्नः तस्मिन् व्यह्नि व्यहनि । सायमह्नः = सायाह्नः । सायाह्नि, सायाहनि ॥ यद् 'अहन्' आदेशो न तदा द्व्यह्ने त्र्यह्ने सायाह्ने इति ॥

भाषार्थः—[*संख्याविसायपूर्वस्य*] संख्या, वि तथा साय पूर्व वाले [*अह्नस्य*] अह्न शब्द को [*अहन्*] अहन् आदेश [*अन्यतरस्याम्*] विकल्प करके होता है [*ङौ*] ङि परे रहते ॥ द्वयोरह्नोर्भवः द्व्यह्नः त्र्यह्नः में *तद्धितार्थोत्तर०* (२।१।५०) से समास, भवार्थ में उत्पन्न औत्सर्गिक अण् का *द्विगोर्लुगनपत्ये* (४।१।८८) से लुक् ५।४।८६ से अह्नादेश होगा, तथा द्व्यह्न त्र्यह्न से पुनः सप्तमी विभक्ति आने पर 'अह्न' को अहन् आदेश, *विभाषा ङिश्योः*(६।४।१३६) से विकल्प से अकार लोप होकर द्व्यह्नि द्व्यहनि बनेगा। सायाह्न में इसी सूत्र के ज्ञापक से एकदेशी समास जानना चाहिए ॥

[*दीर्घप्रकरणम्*]

ढ्रलोपे पूर्वस्य दीर्घोऽणः ॥६।३।११०॥

ढ्रलोपे ७।१॥ पूर्वस्य ६।१॥ दीर्घः १।१॥ अणः ६।१॥ *स०*—ढकारश्च रेफश्च ढ्रौ, तयोर्लोपो यस्मिन् स ढ्रलोपस्तस्मिन्...... द्वन्द्वगर्भनञ्तत्पुरुषः ॥ *अर्थः*—ढ्रलोपे पूर्वस्याणो दीर्घो भवति ॥ *उदा०*—ढलोपे—लीढम्, मीढम्, उपगूढम्, मूढः । रलोपे—नीरक्तम्, अग्नी रथः, इन्दू रथः, पुना रक्तं वासः, प्राता राजक्रयः ॥

भाषार्थः—[*ढ्रलोपे*] ढकार एवं रेफ का लोप हुआ है जिसमें उसके [*पूर्वस्य*] पूर्व [*अणः*] अण् को [*दीर्घः*] दीर्घ होता है ॥ लिह् आस्वादने धातु से क्त होकर *हो ढः* (८।२।३१) *झषस्तथो०* (८।२।४०) *ष्टुना ष्टुः* (८।४।४०) लगकर 'लिढ् ढ' रहा । अब *ढो ढे लोपः* (८।३।१३) से एक ढ् का लोप होने से ढलोप से पूर्व अण् 'इ' को प्रकृत सूत्र से दीर्घ होकर लीढम् बन गया । इसी प्रकार मिह सेचने से मीढम्, गुह् से उपगूढम्, मुह् से मूढः बनेगा। नीरक्तम् यहाँ 'निर् रक्तम्' ऐसी स्थिति में *कुगतिप्रा०* (२।२।१८) से समास तथा निर् के रेफ का *रो रि* (८।३।१४) से लोप हुआ है, अतः प्रकृत सूत्र से दीर्घ हो गया। इसी प्रकार अग्नि सु = अग्निर् रथः, इन्दुर् रथः, सर्वत्र रेफ का लोप होकर दीर्घ हुआ है, ऐसा जानें ॥

यहाँ से '*ढ्रलोपे*' की अनुवृत्ति ६।३।१११ तक '*पूर्वस्य*' की ६।३।११२ तक एवं '*दीर्घः*' की ६।४।१८ तक तथा '*अणः*' की ६।४।२ तक जायेगी ॥

सहिवहोरोदवर्णस्य ॥६।३।१११॥

सहिवहोः ६।२॥ ओत् १।१॥ अवर्णस्य ६।१॥ *स०*—सहिश्च वहश्च सहिवहौ तयोः......इतरेतरद्वन्द्वः । अश्चासौ वर्णश्च, अवर्णस्तस्य...... कर्मधारयस्तत्पुरुषः ॥ *अनु०*—ढ्रलोपे ॥ *अर्थः*—ढ्रलोपे सह् वह् इत्येतयोरवर्णस्यौकार आदेशो भवति ॥ *उदा०*—सोढा, सोढुम्, सोढव्यम् । वोढा, वोढुम्, वोढव्यम् ॥

भाषार्थः—ढकार और रेफ का लोप होने पर [*सहिवहोः*] सह तथा वह् धातु के [*अवर्णस्य*] अवर्ण को [*ओत्*] ओकारादेश होता है ॥ पूर्ववत् लीढम् के समान सिद्धि जानें ॥

साढ्यै साढ्वा साढेति निगमे ॥६।३।११२॥

साढ्यै अ० ॥ साढ्वा अ० ॥ साढा १।१॥ इति अ० ॥ निगमे ७।१॥ *अर्थः*—साढ्यै साढ्वा साढा इति निगमे निपात्यन्ते । साढ्यै इत्यत्र सहेः क्त्वाप्रत्ययः, क्त्वाप्रत्ययस्य ध्यैभावः, ओत्वाभावश्च निपात्यते । साढ्यै समन्तात् । साढ्वा इत्यत्र पूर्ववत् क्त्वाप्रत्यय ओत्वाभावश्च निपात्यते । साढ्वा शत्रून् । साढा इति तृनि[1] रूपमेतत्, ओत्वाभावश्च पूर्ववत् ॥

भाषार्थः—[*साढ्यै साढ्वासाढेति*] साढ्यै साढ्वा तथा साढा ये शब्द [*निगमे*] वेद में निपातन किये जाते हैं ॥ साढ्यै यहाँ क्त्वाप्रत्यय को ध्यैभाव तथा ओत्व जो कि *सहिवहो०* (६।३।१११) से प्राप्त था उसका अभाव निपातन है । साढ्वा में क्त्वा प्रत्यय है ही ओत्वाभाव पूर्ववत् है । साढा यह तृन् का रूप है, यहाँ भी ओत्वाभाव निपातित है । *ढ्रलोपे पूर्वस्य०* (६।३।१०९) से सर्वत्र दीर्घ हो ही जायेगा ॥

---

१. तृचीति काशिका । उभयथाऽपि शक्यमिह विज्ञातुम्, यद्युभयप्रत्ययस्वर उपलभ्येत वेदे ।

संहितायाम् ॥६।३।११३॥

संहितायाम् ७।१॥ *अर्थः*—संहितायामित्यधिकारः, आपादपरिसमाप्तेः ॥ *उदा०*—वक्ष्यति—*द्व्यचोऽतस्तिङः* (६।३।१३४) इति—विद्मा हि, वा सत्पतिं शूर गोनाम् ॥

भाषार्थः—[*संहितायाम्*] संहितायाम् यह अधिकार सूत्र है, पाद की समाप्ति पर्यन्त जायेगा ॥ उदाहरण में विद्मा को दीर्घ हुआ है ॥ संहितायाम् कहने से पदपाठ में तथा अवग्रह में दीर्घत्व नहीं रहेगा, यही प्रयोजन है। इसी प्रकार अन्य सूत्रों में भी 'संहितायाम्' अधिकार का प्रयोजन जान लेना चाहिये ॥

कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य ॥६।३।११४॥

कर्णे ७।१॥ लक्षणस्य ६।१॥ अविष्टा...कस्य ६।१॥ *स०*—अविष्टाष्ट० इत्यत्र पूर्वं द्वन्द्वस्ततो नञ्तत्पुरुषः ॥ *अनु०*—पूर्वस्य दीर्घः, अणः, संहितायाम् ॥ *अर्थः*—विष्ट, अष्टन्, पञ्चन्, मणि, भिन्न, छिन्न, छिद्र, स्रुव, स्वस्तिक इत्येतान् शब्दान् वर्जयित्वा कर्णशब्द उत्तरपदे लक्षणवाचिनोऽणो दीर्घो भवति संहितायां विषये ॥ *उदा०*—दात्राकर्णः, द्विगुणाकर्णः, त्रिगुणाकर्णः, द्व्यङ्गुलाकर्णः, त्र्यङ्गुलाकर्णः ॥

भाषार्थः—[*अविष्टाष्ट...कस्य*] विष्ट, अष्टन, पञ्चन्, मणि, भिन्न, छिन्न, छिद्र, स्रुव, स्वस्तिक इन शब्दों को छोड़कर [*कर्णे*] कर्ण शब्द उत्तरपद रहते [*लक्षणस्य*] लक्षणवाची शब्दों के अण् को दीर्घ होता है संहिता के विषय में ॥ जिससे लक्षित किया जाये वह लक्षण होता है। दात्रमिव दात्रम्। दात्रं कर्णे यस्य स दात्राकर्णः, अर्थात् दरांती का चिह्न जिसके कान पर है, वह दात्राकर्णः है सो दात्र उसका लक्षण है। अतः लक्षणवाची माना जाने से दीर्घ हो गया है। इसी प्रकार अन्य उदाहरणों में भी बहुव्रीहि समासादि सब कुछ जानें ॥

नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ॥६।३।११५॥

नहिवृ...निषु ७।३॥ क्वौ ७।१॥ *स०*—नहि० इत्यत्रेतरेतरद्वन्द्वः ॥

ानु०—पूर्वस्य दीर्घोऽणः, संहितायाम् ॥ *अर्थः*—नहि, वृति, वृषि, व्यधि, चि, सहि, तनि, इत्येतेषु क्विप्प्रत्ययान्तेषूत्तरपदेषु पूर्वस्याणो दीर्घो ावति संहितायां विषये ॥ *उदा०*—नहि—उपानत्, परीणत्। वृति—ीवृत्, उपावृत्। वृषि—प्रावृट्, उपावृट्। व्यधि-मर्माविद्, हृदया-ित्, श्वाविद्। रुचि-नीरुक्, अभीरुक्। सहि-ऋतीषट्। तनि-तरीतत्॥

भाषार्थः—[*नहि*···*तनिषु*] नहि, वृति, वृषि, व्यधि, रुचि, सहि, नि इन [*क्वौ*] क्विप्प्रत्ययान्त शब्दों के उत्तरपद रहते पूर्व अण् को ीर्घ हो जाता है संहिता के विषय में ॥ उपानत् यहाँ नह् धातु के ह् को *हो धः* (८।२।३४) से धत्व हुआ है, पश्चात् जश्त्व (८।२।३८) एवं चर्त्व ८।४।५५) होकर उप नत् प्रकृत सूत्र से दीर्घ होकर उपानत् बना है। परिणह्य-ति परीणत् यहाँ *उपसर्गादसमासे०* (८।४।१४) से णत्व ही विशेष हुआ । *संपदादिभ्यः क्विप्* (वा० ३।३।९४) इस वार्त्तिक से क्विप् हुआ । नीवृत् यहाँ *अन्येभ्योऽपि दृश्यन्ते* (३।२।७५) से क्विप् हुआ है। सी प्रकार अन्य उदाहरणों में भी क्विप् जानें। प्रावृट् यहाँ वृष् धातु ष् को जश्त्व डकार एवं चर्त्व टकार हुआ है। मर्माविद् यहाँ व्यध ातु को *ग्रहिज्या०* (६।१।१६) से संप्रसारण होता है। नीरुक् यहाँ रुच् ातु के च् को क् *चोः कुः* (८।२।३०) से हो जाता है। ऋतीषट् यहाँ हेः *पृतनर्ताभ्यां च* (८।३।१०६) को योगविभाग करके षत्व होता है। रीतत् यहाँ *गमादीनामिति वक्तव्यम्* (वा० ६।४।४०) इस वार्त्तिक से तन ा अनुनासिक का लोप हो जाता है॥

वनगिर्योः संज्ञायां कोटरकिंशुलकादीनाम् ॥६।३।११६॥

वनगिर्योः ७।२॥ संज्ञायाम् ७।१॥ कोटरकिंशुलकादीनाम् ६।३॥ ०—वन० इत्यत्रेतरेतरद्वन्द्वः। कोटरश्च किंशुलकश्च कोटरकिंशुलकौ, ौ आदी येषां ते कोटरकिंशुलकादयस्तेषाम्···द्वन्द्वगर्भबहुव्रीहिः॥ *अनु०*—र्वस्य दीर्घोऽणः, उत्तरपदे, संहितायाम्॥ *अर्थः*—वन गिरि इत्येतयोरुत्तर दयोर्यथासंख्यं कोटरादीनाम् किंशुलकादीनां च दीर्घो भवति, संज्ञायां िषये ॥ *उदा०*—वने कोटरादीनाम्—कोटरावणम्, मिश्रकावणम्, िध्रकावणम्, सारिकावणम्। गिरौ किंशुलकादीनाम्—किंशुलकागिरिः ाञ्जनागिरिः॥

भाषार्थः—[*वनगिर्योः*] वन तथा गिरि शब्द उत्तरपद रहते यथा· संख्य करके [*कोट*···*दीनाम्*] कोटरादि एवं किंशुलकादि गणपठित शब्दों को [*संज्ञायाम्*] संज्ञा विषय में दीर्घ होता है ॥ अर्थात् वन परे रहते कोटरादियों को एवं गिरि परे रहते किंशुलकादियों को दीर्घ हो जाता है ॥ मिश्रकावणम् आदि में वन शब्द के नकार को *वनं पुरगा· मिश्रका०* (८।४।४) से णत्व होता है तथा सर्वत्र षष्ठीसमास है ॥

यहाँ से '*संज्ञायाम्*' की अनुवृत्ति ६।३।११९ तक जायेगी ॥

वले ॥६।३।११७॥

वले ७।१॥ *अनु०*—संज्ञायाम्, पूर्वस्य दीर्घोणः, संहितायाम् ॥ *अर्थः*—वले परतः संज्ञायां विषये पूर्वस्याणो दीर्घो भवति संहितायां विषये ॥ *उदा०*—आसुतीवलः, दन्तावलः, कृषीवलः ॥

भाषार्थः—[*वले*] वल परे रहते पूर्व अण् को दीर्घ हो जाता है ॥ संज्ञा को कहने में ॥ वल से वलच् प्रत्यय लिया गया है, जो कि *रजः-कृष्यासुति०* (५।२।११२) से होता है ॥

मतौ बह्वचोऽनजिरादीनाम् ॥६।३।११८॥

मतौ ७।१॥ बह्वचः ६।१॥ अनजिरादीनाम् ६।३॥ *स०*—बह्वोऽचो यस्मिन् स बह्वच् तस्य···बहुव्रीहिः । अजिर आदिर्येषां ते अजिरादयः, न अजिरादयोऽनजिरादयस्तेषाम्···बहुव्रीहिगर्भनञ्तत्पुरुषः ॥ *अनु०*—संज्ञायाम्, पूर्वस्य दीर्घोणः, संहितायाम् ॥ *अर्थः*—अजिरादिवर्जितस्य बह्वचो मतौ परतोऽणोदीर्घो भवति संज्ञायां विषये ॥ *उदा०*—उदुम्बरावती, मशकावती, वीरणावती, पुष्करावती, अमरावती ॥

भाषार्थः—[*अनजिरादीनाम्*] अजिरादियों को छोड़ कर [*मतौ*] मतुप् परे रहते [*बह्वचः*] बह्वच् शब्दों के अण् को दीर्घ होता है संज्ञा विषय में ॥ उदाहरणों में *नद्यां मतुप्* (४।२।८४) से मतुप् होता है । उदुम्बर मशक आदि शब्द बह्वच् हैं ही ॥

यहाँ से '*मतौ*' की अनुवृत्ति ६।३।११९ तक जायेगी ॥

शरादीनां च ॥६।३।११९॥

शरादीनाम् ६।३॥ च अ० ॥ *स०*—शरा० इत्यत्र बहुव्रीहिः ॥ *अनु०*—

मतौ, संज्ञायाम्, पूर्वस्य, दीर्घोऽणः, संहितायाम् ॥ *अर्थः*—शरादीनां च मतौ दीर्घो भवति, संज्ञायां विषये ॥ *उदा०*—शरावती, वंशावती ॥

भाषार्थः—[*शरादीनाम्*] शरादियों को [च] भी संज्ञा विषय में मतुप् परे रहते दीर्घ होता है ॥ पूर्ववत् मतुप् प्रत्यय होकर *संज्ञायाम्* (८।२।११) से मतुप् के म को वत्व हुआ है ।

इको वहेऽपीलोः ॥६।३।१२०॥

इकः ६।१॥ वहे ७।१॥ अपीलोः ६।१॥ *स०*—अपीलोः इत्यत्र नञ्-तत्पुरुषः ॥ *अनु०*—दीर्घः, उत्तरपदे, संहितायाम् ॥ *अर्थः*—पीलुवर्जितस्य इगन्तस्य पूर्वपदस्य वह उत्तरपदे दीर्घो भवति ॥ *उदा०*—ऋषीवहम्, कपीवहम्, मुनीवहम् ॥

भाषार्थः—[*अपीलोः*] पीलु शब्द को छोड़कर जो [*इकः*] इगन्त पूर्वपद वाले शब्द उनको [*वहे*] 'वह' शब्द के उत्तरपद रहते दीर्घ होता है ॥ वह शब्द पचाद्यजन्त है । ऋषीवहम् आदि में षष्ठीसमास हुआ है ॥

उपसर्गस्य घञ्यमनुष्ये बहुलम् ॥६।३।१२१॥

उपसर्गस्य ६।१॥ घञि ७।१॥ अमनुष्ये ७।१॥ बहुलम् १।१॥ *स०*—अमनुष्य इत्यत्र नञ्तत्पुरुषः ॥ *अनु०*—पूर्वस्य, दीर्घोऽणः, उत्तरपदे, संहितायाम् ॥ *अर्थः*—घञन्त उत्तरपदेऽमनुष्येऽभिधेय उपसर्गस्याणो बहुलं दीर्घो भवति ॥ *उदा०*—वीक्लेदः, वीमार्गः, अपामार्गः । न च भवति बहुलवचनात्—प्रसेवः, प्रसारः ॥

भाषार्थः—[*घञि*] घञन्त उत्तरपद रहते [*अमनुष्ये*] अमनुष्य अभिधेय होने पर [*उपसर्गस्य*] उपसर्ग के अण् को [*बहुलम्*] बहुल करके दीर्घ होता है ॥ वीक्लेदः वीमार्गः यहाँ क्लिद तथा मृजूष् धातु से *अकर्त्तरि च कारके०* (३।३।१९) से घञ् हुआ है । वीमार्गः यहाँ मृज् धातु को *मृजेर्वृद्धिः* (७।२।११४) से वृद्धि एवं *चजोः कु०* (७।३।५२) से कुत्व हुआ है ॥

यहाँ से '*उपसर्गस्य*' की अनुवृत्ति ६।३।१२३ तक जायेगी ॥

इकः काशे ॥६।३।१२२॥

इकः ६।१॥ काशे ७।१॥ *अनु०*—उपसर्गस्य, दीर्घः, उत्तरपदे, संहितायाम् ॥ *अर्थः*—इगन्तस्य उपसर्गस्य काशशब्द उत्तरपदे दीर्घो भवति संहितायां विषये ॥ *उदा०*—नीकाशः, वीकाशः, अनूकाशः ॥

भावार्थः—[*इकः*] इगन्त उपसर्ग को [*काशे*] काश शब्द उत्तरपद रहते दीर्घ होता है संहिता के विषय में ॥ काशृ दीप्तौ धातु से पचाद्यच् करके काश शब्द बना है ॥

यहाँ से 'इकः' की अनुवृत्ति ६।३।१२३ तक जायेगी ॥

दस्ति ॥६।३।१२३॥

दः ६।१॥ ति ७।१॥ *अनु०*—इकः, उपसर्गस्य, दीर्घः, संहितायाम् ॥ *अर्थः*—दा इत्येतस्य यस्तकारादिरादेशस्तस्मिन् परत इगन्तस्योपसर्गस्य दीर्घो भवति ॥ *उदा०*— नीत्तम्, वीत्तम्, परीत्तम् ॥

भावार्थः—[*दः*] दा के स्थान में हुआ जो [*ति*] तकारादि आदेश उस के परे रहते इगन्त उपसर्ग को दीर्घ होता है ॥ नि दा क्त = यहाँ *अच उपसर्गात्तः* (७।४।४७) से दा धातु के अन्त्य अल् (१।१।५१) को तकारादेश होकर नि द् त् त रहा । *खरि च* (८।४।५४) से द् को त् एवं *झरो झरि सवर्णे* (८।४।६४) से एक तकार का लोप तथा प्रकृत सूत्र से दीर्घ होकर नीत्तम् वीत्तम् आदि बना ॥ 'दः' यहाँ स्थानि-आदेश संबन्ध में षष्ठी है, अतः 'दा के स्थान में जो तकारादि आदेश' ऐसा अर्थ किया है ॥

अष्टनः संज्ञायाम् ॥६।३।१२४॥

अष्टनः ६।१॥ संज्ञायाम् ७।१॥ *अनु०*—पूर्वस्य, दीर्घोऽणः, संहितायाम्, उत्तरपदे ॥ *अर्थः*—अष्टन् इत्येतस्य उत्तरपदे परतः संज्ञायां विषये दीर्घो भवति ॥ *उदा०*—अष्टौ वक्राण्यस्य = अष्टावक्रः, अष्टाबन्धुरः, अष्टापदम् ।

भावार्थः—[*अष्टनः*] अष्टन् शब्द को उत्तरपद परे रहते [*संज्ञायाम्*] संज्ञा विषय में दीर्घ होता है ॥ *नलोपः प्राति०* (८।२।७) से नकार लोप हो ही जायेगा ॥

यहाँ से 'अष्टनः' की अनुवृत्ति ६।३।१२५ तक जायेगी ॥

छन्दसि च ॥६।३।१२५॥

छन्दसि ७।१॥ च अ० ॥ *अनु०*—अष्टनः, पूर्वस्य, दीर्घोणः, उत्तरपदे संहितायाम् ॥ *अर्थः*—छन्दसि विषये अष्टन् इत्येतस्य दीर्घो भवति, उत्तरपदे परतः ॥ *उदा०*—आग्नेयमष्टाकपालं निर्वपेत् । अष्टाहिरण्या दक्षिणा । अष्टापदी देवता सुमती ॥

भाषार्थः—[*छन्दसि*] वेद विषय में [*च*] भी अष्टन् शब्द को दीर्घ हो जाता है, उत्तरपद परे रहते ॥ अष्टसु कपालेषु संस्कृतमष्टाकपालम् यहाँ *संस्कृतम्* (४।४।३) से अण् होकर उसका *द्विगोर्लुगनपत्ये* (४।१।८८) से लुक् हुआ है । अष्टौ पादा अस्या अष्टापदी यहाँ *पादस्य लोपो०* (५।४।१३८) से पाद शब्द के अ का लोप हुआ है, तथा *पादोऽन्यतरस्याम्* (४।१।८) से ङीप् हुआ है । अष्टाहिरण्या यहाँ अष्टौ हिरण्यानि परिमाणमस्य इस तद्धितार्थ में समास तथा *तदस्य परिमाणम्* (५।१।५६) से उत्पन्न प्रत्यय का *अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायाम्* (५।१।२८) से लुक् होता है ॥

चितेः कपि ॥६।३।१२६॥

चितेः ६।१॥ कपि ७।१॥ *अनु०*—पूर्वस्य, दीर्घोणः संहितायाम् ॥ *अर्थः*—कपि परतश्चितिशब्दस्य दीर्घो भवति संहितायां विषये॥ *उदा०*—एका चितिरस्य = एकचितीकः, द्विचितीकः, त्रिचितीकः ॥

भाषार्थः—[*कपि*] कप् परे रहते [*चितेः*] चिति शब्द को दीर्घ हो जाता है, संहिता विषय में ॥ *स्त्रियाःपुंवद्०* (६।३।३२) से उदाहरणों में पुंवद्भाव हुआ है, तथा *शेषाद्विभाषा* (५।४।१५४) से कप् प्रत्यय होता है ॥

विश्वस्य वसुराटोः ॥६।३।१२७॥

विश्वस्य ६।१॥ वसुराटोः ७।२॥ *स०*—वसु० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—पूर्वस्य, दीर्घोणः, उत्तरपदे, संहितायाम् ॥ *अर्थः*—विश्व इत्येतस्य वसु, राट् इत्येतयोरुत्तरपदयोः दीर्घो भवति ॥ *उदा०*—विश्वं वसु यस्य स विश्वावसुः । विश्वस्मिन् राजते इति विश्वाराट् ॥

भाषार्थः—[*वसुराटोः*] वसु तथा राट् उत्तरपद रहते [*विश्वस्य*] विश्व शब्द को दीर्घ हो जाता है ॥ विश्वाराट् यहाँ राज् धातु से सत्सूद्विष०

(३।२।६१) से क्विप् हुआ है। सिद्धि (३।२।६१) इसी सूत्र के परिशि
में देखें ॥

यहाँ से '*विश्वस्य*' की अनुवृत्ति ६।३।१२९ तक जायेगी ॥

नरे संज्ञायाम् ॥६।३।१२८॥

नरे ७।१॥ संज्ञायाम् ७।१॥ *अनु०*—विश्वस्य, पूर्वस्य, दीर्घोणः उत्तरपदे, संहितायाम् ॥ *अर्थः*—नरशब्द उत्तरपदे संज्ञायां विषये विश्व शब्दस्य दीर्घो भवति ॥ *उदा०*—विश्वानरो नाम यस्य वैश्वानरिः पुत्रः ।

भाषार्थः—[*नरे*] नर शब्द उत्तरपद रहते [*संज्ञायाम्*] संज्ञा विषय में विश्व शब्द को दीर्घ होता है ॥

मित्रे चर्षौ ॥६।३।१२९॥

मित्रे ७।१॥ च अ०॥ ऋषौ ७।१॥ *अनु०*—विश्वस्य, पूर्वस्य, दीर्घोणः उत्तरपदे, संहितायाम् ॥ *अर्थः*—ऋषावभिधेये मित्रे चोत्तरपदे विश्वस्य दीर्घो भवति ॥ *उदा०*—विश्वामित्रो नाम ऋषिः ॥

भाषार्थः—[*मित्रे*] मित्र शब्द उत्तरपद रहते [*च*] भी [*ऋषौ*] ऋषि अभिधेय होने पर विश्व शब्द को दीर्घ हो जाता है ॥

मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ ॥६।३।१३०॥

मन्त्रे ७।१॥ सोमा.....स्य ६।१॥ मतौ ७।१॥ *स०*—सोम० इत्यत्र समाहारो द्वन्द्वः ॥ *अनु०*—पूर्वस्य, दीर्घोणः, संहितायाम् ॥ *अर्थः*—सोम, अश्व, इन्द्रिय, विश्वदेव्य इत्येतेषां मतुप् प्रत्यये परतो दीर्घो भवति मन्त्रविषये संहितायाम् ॥ *उदा०*—सोमावती, अश्वावती, इन्द्रियावती, विश्वदेव्यावती ॥

भाषार्थः—[*सोमा.....स्य*] सोम, अश्व, इन्द्रिय, विश्वदेव्य इन शब्दों को [*मतौ*] मतुप् प्रत्यय परे रहने पर दीर्घ हो जाता है, [*मन्त्रे*] मन्त्र विषय में ॥ उदाहरणों में *उगितश्च* (४।१।६) से ङीप् होगा ॥

यहाँ से '*मन्त्रे*' की अनुवृत्ति ६।३।१३१ तक जायेगी ॥

ओषधेश्च विभक्तावप्रथमायाम् ॥६।३।१३१॥

ओषधेः ६।१॥ च अ० ॥ विभक्तौ ७।१॥ अप्रथमायाम् ७।१॥ *स०*—

ग्र० इत्यत्र नञ्तत्पुरुषः ।। *अनु०*—मन्त्रे, संहितायाम्, पूर्वस्य, ीर्घोणः ।। *अर्थः*—अप्रथमायां विभक्तौ परत ओषधिशब्दस्य दीर्घो भवति न्त्रविषये ।। *उदा०*—ओषधीभिरपीपतत् । नमः पृथिव्यै नम ओषधीभ्यः ।।

भाषार्थः—मन्त्र विषय में [*अप्रथमायाम्*] प्रथमा भिन्न [*विभक्तौ*] वेभक्ति के परे रहते [*ओषधेः*] ओषधि शब्द को [*च*] भी दीर्घ हो जाता है ।।

ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् ।।६।३।१३२।।

ऋचि ७।१।। तुनु······णाम् ६।३।। *स०*—तुनु० इत्यत्रेतरेतरद्वन्द्वः ।। *अनु०*—संहितायाम्, दीर्घोणः ।। *अर्थः*—ऋचि विषये तु, नु, घ, मक्षु, तङ्, कु, त्र, उरुष्य इत्येतेषां शब्दानां दीर्घो भवति संहितायाम् विषये ।। *उदा०*—आ तू न इन्द्र वृत्रहन् (ऋ० ४।३२।१) । नु—नू करणे घ—उत वा घा स्यालात् (ऋ० १।१०९।२) । मक्षु—मक्षू गोमन्तमीमहे (ऋ० ८।३३।३) तङ्—भरता जातवेदसम् (ऋ० १०।१७६।२) । कु—कूमनः । त्र— अत्रा गौः । उरुष्य—उरुष्या णोऽग्नेः ।।

भाषार्थः—[*तुनु······णाम्*] तु, नु, घ, मक्षु, तङ्, कु, त्र, उरुष्य इन शब्दों को [*ऋचि*] ऋचा विषय में दीर्घ हो जाता है संहिता विषय में ।। लोट् लकार में *लोटो लङ्वत्* (३।४।८५) से लङ्वत् अतिदेश कर के मध्यम-पुरुष बहुवचन 'थ' को *तस्थस्थमिपां तांतंताम:*(३।४।१०१) से जो 'त' आदेश होता है, तथा उसको लङ्वत् होने से ङित् माना जाता है, उस 'थ' का यहाँ 'तङ्' से ग्रहण है ।। अत्रा यह त्रलन्त (५।३।१०) का रूप है। *एतदोऽन्* (५।३।५) से त्रल् प्रत्यय करने पर अन् आदेश हुआ है। उरुष्या यहाँ पहले आत्मन उरुमिच्छति ऐसा विग्रह करके उरु शब्द से *सुप आत्मनः क्यच्* (३।१।८) से क्यच् प्रत्यय किया। पश्चात् *सर्वप्रातिपदिकेभ्यो लालसायासुग्वक्तव्यः* (वा० ७।१।५१) इस वार्त्तिक से सुक् आगम होकर उरु सुक् क्यच् = उरु स् य रहा। *सुषामादिषु च* (८।३।९८) से षत्व होकर लोट् मध्यमपुरुष एकवचन में *अतो हेः* (६।४।१०५) से हि का लुक् एवं दीर्घत्व होकर 'उरुष्या' बना है ।।

यहाँ से '*ऋचि*' की अनुवृत्ति ६।३।१३५ तक जायेगी ।।

इकः सुञि ॥६।३।१३३॥

इकः ६।१॥ सुञि ७।१॥ अनु०—ऋचि, उत्तरपदे, संहितायाम् दीर्घः ॥ अर्थः—इगन्तस्य सुञि परतो ऋग्विषये दीर्घो भवति संहित याम् विषये ॥ उदा०—अभी षु णः सखीनाम् (ऋ० ४।३१।३) । ऊ ऊ षु ण ऊतये ॥

भाषार्थः—[*इकः*] इगन्त शब्द को [*सुञि*] सुञ् परे रहते ऋच विषय में दीर्घ हो जाता है संहिता विषय में ॥ सुञ् यह निपात लिय गया है । *सुञः* (८।३।१०७) से सुञ् के सु को षत्व हुआ है । उससे पू इगन्त 'अभि' एवं 'उ' को प्रकृत सूत्र से दीर्घ हुआ है । न को ण नः धातुस्थो० (८।४।२६) से जानें ॥

द्व्यचोऽतस्तिङः ॥६।३।१३४॥

द्व्यचः ६।१॥ अतः ६।१॥ तिङः ६।१॥ *स०*—द्वौ अचौ यस्मिन् स द्व्यच्, तस्य द्व्यचः, बहुव्रीहिः॥ *अनु०*—ऋचि, उत्तरपदे, संहितायाम् दीर्घः ॥ *अर्थः*—द्व्यचस्तिङन्तस्य अत ऋग्विषये दीर्घो भवति संहिताय विषये ॥ *उदा०*—विद्मा हि त्वा सत्पतिं शूरगोनाम् । विद्मा स तस्य पितरम् ॥

भाषार्थः—[*द्व्यचः*] दो अच् वाले [*तिङः*] तिङन्त के [*अतः*] अकार को ऋचा विषय में दीर्घ होता है संहिता विषय में ॥ विद्म यह लोट् लकार के 'मस्' का रूप है, उसे दीर्घ होकर विद्मा बना है ।

निपातस्य च ॥६।३।१३५॥

निपातस्य ६।१॥ च अ० ॥ *अनु०*—ऋचि, उत्तरपदे, संहितायाम्, दीर्घोऽणः ॥ *अर्थः*—ऋग्विषये निपातस्य च दीर्घो भवति ॥ *उदा०*—एवा ते । अच्छा ते ॥

भाषार्थः—ऋचा विषय में [*निपातस्य*] निपात को [*च*] भी दीर्घ हो जाता है ॥ एव अच्छ चादि गण (१।४।५७) में पठित हैं, अतः निपात हैं ॥

अन्येषामपि दृश्यते ॥६।३।१३६॥

अन्येषाम् ६।३॥ अपि अ० ॥ दृश्यते क्रियापदम् ॥ *अनु०*—दीर्घोणः, उत्तरपदे, संहितायाम् ॥ *अर्थः*—अन्येषामपि दीर्घो दृश्यते ॥ यस्य दीर्घो न विहितः, दृश्यते च प्रयोगे, सः अनेन सूत्रेण शिष्टप्रयोगादनुगन्तव्यः ॥ *उदा०*—केशाकेशि, कचाकचि, नारकः, पूरुषः ॥

भाषार्थः—[*अन्येषाम्*] अन्यों को (शब्दों को) [*अपि*] भी दीर्घ [*दृश्यते*] देखा जाता है, अर्थात् जिनको सूत्रों से दीर्घत्व नहीं कहा किन्तु देखा जाता है, ऐसे शब्दों को भी शिष्ट प्रयोग मान कर साधु समझना चाहिये ॥ कचाकचि, केशाकेशि में *तत्र तेने०* (२।२।२७) से समास तथा इच् *कर्म०* (५।४।१२७) से समासान्त इच् प्रत्यय होता है ॥

चौ ॥६।३।१३७॥

चौ ७।१॥ *अनु०*—पूर्वस्य, दीर्घोणः, उत्तरपदे, संहितायाम् ॥ *अर्थः*—चौ परतः पूर्वस्याणो दीर्घो भवति ॥ चौ इत्यनेन अञ्चतिर्लुप्तनकारो गृह्यते ॥ *उदा०*—दधीचः पश्य, दधीचा, दधीचे, मधूचः पश्य, मधूचा मधूचे ॥

भाषार्थः—[*चौ*] चु परे रहते पूर्व अण् को दीर्घ होता है ॥ चु से यहाँ नकार लोप की हुई अञ्चु धातु का ग्रहण है ॥ *अनिदितां०* (६।४।२४) से अञ्च् के नकार का लोप एवं *अचः* (६।४।१३८) से अकार लोप होकर अञ्चु का च् शेष रहता है। क्विन् प्रत्यय *ऋत्विग्दधृ०* (३।२।५६) से होता ही है। सो 'दधि च् शस्' = दीर्घ होकर दधीचः बन गया। इसी प्रकार मधूचः आदि में जानें ॥

संप्रसारणस्य ॥६।३।१३८॥

संप्रसारणस्य ६।१॥ *अनु०*—पूर्वस्य, दीर्घोणः, उत्तरपदे, संहितायाम् ॥ *अर्थः*—संप्रसारणान्तस्य पूर्वपदस्याण उत्तरपदे परतो दीर्घो भवति ॥ *उदा०*—कारीषगन्धीपुत्रः, कारीषगन्धीपतिः, कौमुदगन्धीपुत्रः, कौमुदगन्धीपतिः ॥

भाषार्थः—[*संप्रसारणस्य*] सम्प्रसारणान्त पूर्वपद के अण् को उत्तरपद परे रहते दीर्घ होता है ॥ कारीषगन्ध्या की सिद्धि भाग २ परि० ४।१।७४ पृ०

५४१ में की गई है, अतः उसे वहीं समझ लें। आगे कारीषगन्ध्याया पुत्रः, कारीषगन्ध्यायाः पतिः विग्रह करके कारीषगन्धीपुत्रः आदि बना है जिसकी सिद्धि *ष्यङः सम्प्रसारणं०* (६।१।१३) में स्पष्ट रूप से देखें कारीषगन्धि आदि शब्द सम्प्रसारणान्त हैं, अतः पुत्र पति शब्द उत्तरपद रहते प्रकृत सूत्र से दीर्घ हो गया है ॥

यहाँ से '*सम्प्रसारणस्य*' की अनुवृत्ति ६।४।२ तक जायेगी ॥

॥ *इति तृतीयः पादः* ॥

—:०:—

चतुर्थः पादः

अङ्गस्य ॥६।४।१॥

अङ्गस्य ६।१॥ *अर्थः*—अधिकारोऽयम् आसप्तमाध्यायपरिसमाप्तेः। यदित ऊर्ध्वमनुक्रमिष्यामोऽङ्गस्य इत्येवं तद्वेदितव्यम् ॥ *उदा०*—वक्ष्यति—*हलः*। हूतः, जीनः, संवीतः ॥

भाषार्थः—[*अङ्गस्य*] 'अङ्गस्य' यह अधिकार सूत्र है। सप्तमाध्याय की समाप्ति (७।४।९७) पर्यन्त इसका अधिकार जायेगा सो आगे के सभी सूत्रों में यह बैठता जायेगा ॥ 'अङ्गस्य' में सम्बन्ध सामान्य में षष्ठी है ॥ *यस्मात् प्रत्ययविधि०* (१।४।१३) से अङ्गसंज्ञा होती है। हूतः संवीतः की सिद्धि सूत्र ६।१।१५ में तथा जीनः की परि० ६।१।१६ में देखें ॥

हलः ॥६।४।२॥

हलः ५।१॥ *अनु०*—अङ्गस्य, सम्प्रसारणस्य, दीर्घः, अणः ॥ *अर्थः*—अङ्गावयवाद् हलः परं यत् सम्प्रसारणम् अण् तदन्तस्याङ्गस्य दीर्घो भवति ॥ *उदा०*—हूतः, जीनः, संवीतः ॥

भाषार्थः—अङ्ग का अवयव जो [*हलः*] हल् उससे उत्तर जो सम्प्रसारण अण् तदन्त अङ्ग को दीर्घ होता है ॥ अर्थ करने में दो बार अङ्ग ग्रहण 'अङ्ग' शब्द की आवृत्ति करके किया है ॥ ह्वेञ् से 'हु त' बन जाने पर अङ्ग जो 'हु' उसका हल् अवयव 'ह्' है, उस ह् से उत्तर 'उ' सम्प्रसारण संज्ञक है, अतः तदन्त 'हु' अङ्ग को दीर्घ हो गया। इसी प्रकार अन्य उदाहरणों में सूत्रार्थ घटा लें ॥

'अणः' की अनुवृत्ति ६।३।१०६ से यहाँ तक आने पर भी उपयोगिता की दृष्टि से अर्थ में यहीं विशेषरूप से प्रदर्शित की है जो कि द्वितीया-वृत्ति में समझ आ जायेगी ॥

नामि ॥६।४।३॥

नामि ७।१॥ अनु०—अङ्गस्य, दीर्घः ॥ *अर्थः*—नामि परतोऽङ्गस्य दीर्घो भवति ॥ उदा०—अग्नीनाम्, वायूनाम्, कर्तॄणाम् ॥

भाषार्थः—[*नामि*] नाम् परे रहते अङ्ग को दीर्घ हो जाता है॥ नाम् से नुट् आगम किया हुआ षष्ठी बहुवचन का आम् अभिप्रेत है। *ह्रस्वनद्यापो नुट्* (७।१।५४) से नुट् आगम होता है ॥

यहाँ से '*नामि*' की अनुवृत्ति ६।४।७ तक जायेगी ॥

न तिसृचतसृ ॥६।४।४॥

न अ० ॥ तिसृचतसृ लुप्तषष्ठ्यन्तनिर्देशः ॥ (*सुपां सुलुक्*० ७।१।३९ इत्यनेन) ॥ *स०*—तिसृ० इत्यत्रेतरेतरद्वन्द्वः ॥ अनु०—नामि, अङ्गस्य, दीर्घः ॥ *अर्थः*—तिसृ, चतसृ इत्येतयोर्नामि परतो दीर्घो न भवति ॥ उदा०—तिसृणाम्, चतसृणाम् ॥

भाषार्थः—[*तिसृचतसृ*] तिसृ, चतसृ अङ्ग को नाम् परे रहते दीर्घ [न] नहीं होता ॥ पूर्व सूत्र से प्राप्ति थी प्रतिषेध कर दिया। त्रि तथा चतुर् को स्त्रीलिङ्ग में *त्रिचतुरोः स्त्रियां*० (७।२।९९) से तिसृ चतसृ आदेश होता है, उसी का यहाँ ग्रहण है ॥

यहाँ से '*तिसृचतसृ*' की अनुवृत्ति ६।४।५ तक जायेगी ॥

छन्दस्युभयथा ॥६।४।५॥

छन्दसि ७।१॥ उभयथा अ० ॥ *अनु०*—तिसृचतसृ नामि, अङ्गस्य, दीर्घः ॥ *अर्थः*—छन्दसि विषये तिसृ चतसृ इत्येतयोर्नामि परतः उभयथा दृश्यते, दीर्घश्चादीर्घश्चेत्यर्थः ॥ *उदा०*—तिसृणाम् मध्यन्दिने, तिसॄणाम् मध्यन्दिने । चतसृणाम् मध्यन्दिने, चतसॄणाम् मध्यन्दिने ॥

भाषार्थः—[*छन्दसि*] वेद विषय में तिसृ चतसृ अङ्ग को [*उभयथा*] दोनों प्रकार से अर्थात् दीर्घ एवं अदीर्घ दोनों ही देखा जाता है ॥

यहाँ से '*छन्दस्युभयथा*' की अनुवृत्ति ६।४।६ तक जायेगी ॥

नृ च ॥६।४।६॥

नृ लुप्तषष्ठ्यन्तनिर्देशः ॥ च अ० ॥ *अनु०*—छन्दस्युभयथा, नामि, अङ्गस्य, दीर्घः ॥ *अर्थः*—नृ इत्येतस्य अङ्गस्य नामि परत उभयथा भवति छन्दसि विषये ॥ *उदा०*—त्वं नृणां नृपते, त्वं नॄणां नृपते ॥

भाषार्थः—[*नृ*] नृ अङ्ग को [*च*] भी नाम् परे रहते वेद विषय में दोनों प्रकार से अर्थात् दीर्घ एवं अदीर्घ देखा जाता है ॥

नोपधायाः ॥६।४।७॥

न अविभक्त्यन्तं पदम् ॥ उपधायाः ६।१॥ *अनु०*—नामि, अङ्गस्य, दीर्घः ॥ *अर्थः*—नान्तस्याङ्गस्योपधायाः नामि परतो दीर्घो भवति ॥ *उदा०*—पञ्चानाम्, सप्तानाम्, नवानाम्, दशानाम् ॥

भाषार्थः—[*न*] नकारान्त अङ्ग की [*उपधायाः*] उपधा को नाम् परे रहते दीर्घ होता है ॥ पञ्चन्, सप्तन् आदि नकारान्त अङ्ग हैं, अतः उनकी उपधा (१।१।६४) को दीर्घ हो गया है । *षट्चतुर्भ्यश्च* (७।१।५५) से पञ्चानाम् आदि में आम् को नुट् आगम हुआ है । पञ्चन् नुट् आम् = पञ्चन् नाम् यहाँ *नलोपः०* (८।२।७) से नकार लोप होकर पञ्चानाम् बन गया ॥

यहाँ से '*न*' की अनुवृत्ति ६।४।१० तक तथा '*उपधायाः*' की ६।४।१८ तक जायेगी ॥

सर्वनामस्थाने चासंबुद्धौ ॥६।४।८॥

सर्वनामस्थाने ७।१॥ च अ० ॥ असंबुद्धौ ७।१॥ *स०*—असंबुद्धावित्यत्र नञ्तत्पुरुषः ॥ *अनु०*—नोपधायाः, नामि, अङ्गस्य, दीर्घः ॥ *अर्थः*—सम्बुद्धिभिन्ने सर्वनामस्थाने च परतो नान्तस्याङ्गस्योपधायाः दीर्घो भवति ॥ *उदा०*—राजा, राजानौ, राजानः, राजानम्, राजानौ। सामानि तिष्ठन्ति, सामानि पश्य ॥

भाषार्थः—[*असम्बुद्धौ*] सम्बुद्धिभिन्न [*सर्वनामस्थाने*] सर्वनामस्थान विभक्ति परे रहते [*च*] नान्त अङ्ग की उपधा को दीर्घ हो जाता है ॥ सब सिद्धियाँ भाग १ परि० १।१।४२ पृ० ७११ में देखें। सामानि यहाँ 'शि' की *शि सर्व०* (१।१।४१) से सर्वनामस्थान संज्ञा है ॥

यहाँ से '*सर्वनामस्थाने*' की अनुवृत्ति ६।४।११ तक तथा '*असम्बुद्धौ*' की ६।४।१४ तक जायेगी ॥

वा षपूर्वस्य निगमे ॥६।४।९॥

वा अ०॥ षपूर्वस्य ६।१॥ निगमे ७।१॥ *स०*—षः पूर्वो यस्मात् स षपूर्वस्तस्य ... बहुव्रीहिः ॥ *अनु०*—सर्वनामस्थाने, असम्बुद्धौ, नोपधायाः, अङ्गस्य, दीर्घः ॥ *अर्थः*—निगमविषये नोपधायाः षपूर्वस्याऽसंबुद्धौ सर्वनामस्थाने परतो वा दीर्घो भवति ॥ *उदा०*—स तक्षाणं तिष्ठन्तमब्रवीत् (मै०सं० २।४।१, काठ० १२।१०)। स तक्षणं तिष्ठन्तमब्रवीत्। ऋभुक्षाणमिन्द्रम्। ऋभुक्षणमिन्द्रम् ॥

भाषार्थः—[*निगमे*] वेद विषय में नकारान्त अङ्ग के उपधाभूत [*षपूर्वस्य*] षकार है पूर्व में जिससे ऐसे अच् को सम्बुद्धिभिन्न सर्वनामस्थान के परे रहते [*वा*] विकल्प से दीर्घ होता है॥ तक्षन्, ऋभुक्षिन् शब्दों में 'क्ष' के 'अ' को विकल्प से दीर्घ हुआ है, क्योंकि इस अकार से पूर्व ष् है, एवं नकार की उपधा है। ऋभुक्षिन् में पहले *इतोत्सर्वना०* (७।१।८६) से इकार को अत्व होकर पश्चात् अ को दीर्घ हुआ है ॥

सान्तमहतः संयोगस्य ॥६।४।१०॥

सान्त लुप्तषष्ठ्यन्तनिर्देशः ॥ महतः ६।१॥ संयोगस्य ६।१॥ *स०*—सोऽन्ते यस्य स सान्तस्तस्य ... बहुव्रीहिः ॥ *अनु०*—सर्वनामस्थानेऽ-

सम्बुद्धौ, नोपधायाः, अङ्गस्य, दीर्घः ॥ *अर्थः*—सकारान्तस्य संयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घो भवति असंबुद्धौ सर्वनामस्थाने परतः ॥ उदा०—श्रेयान्, श्रेयांसौ, श्रेयांसः । श्रेयांसि, पयांसि, यशांसि । महतः-महान्, महान्तौ, महान्तः ॥

भाषार्थः—[*सान्त*] सकारान्त [*संयोगस्य*] संयोग का और [*महतः*] महत् शब्द का जो नकार उसकी उपधा को दीर्घ होता है, संबुद्धि भिन्न सर्वनामस्थान विभक्ति के परे रहने पर ॥ पयांसि यशांसि की सिद्धि भाग १ परि १।१।४६ पृ० ७१७ में देखें । श्रेयान् महान् आदि में सकार तकार का लोप *संयोगान्तस्य०* (८।२।२३) से होगा ॥

अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् ॥६।४।११॥

अप्तृन्तृच्‌ ''' णाम् ६।३॥ *स०*—अप्तृन्० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—सर्वनामस्थानेऽसम्बुद्धौ, उपधायाः, अङ्गस्य, दीर्घः ॥ *अर्थः*—अप्, तृन्, तृच्, स्वसृ, नप्तृ, नेष्टृ, त्वष्टृ, क्षत्तृ, होतृ, पोतृ, प्रशास्तृ इत्येतेषामङ्गानामुपधायाः सम्बुद्धिभिन्ने सर्वनामस्थाने परतो दीर्घो भवति ॥ उदा०—अप्-आपः । तृन्-कर्त्ता, कर्त्तारौ, कर्त्तारः, कर्त्तारम्, कर्त्तारौ । तृच्-कर्त्ता कर्त्तारौ सर्वमग्रे पूर्ववत् । स्वसृ—स्वसा, स्वसारौ । नप्तृ—नप्ता, नप्तारौ । नेष्टृ—नेष्टा, नेष्टारौ । त्वष्टृ—त्वष्टा, त्वष्टारौ । क्षत्तृ-क्षत्ता, क्षत्तारौ । होतृ—होता, होतारौ । पोतृ—पोता, पोतारौ । प्रशास्तृ—प्रशास्ता, प्रशास्तारौ ॥

भाषार्थः—[*अप्तृ ''' तॄणाम्*] अप्, तृन्, तृच् प्रत्ययान्त, स्वसृ, नप्तृ, नेष्टृ, त्वष्टृ, क्षत्तृ, होतृ, पोतृ, प्रशास्तृ इन अङ्गों की उपधा को दीर्घ होता है, सम्बुद्धिभिन्न सर्वनामस्थान परे रहते ॥ तृन् तथा तृच् प्रत्ययों में रूप की दृष्टि से कोई भेद नहीं स्वर का भेद है ॥ भाग १ परि० १।१।२ के चेता नेता के समान सिद्धियाँ जानें ॥

इन्हन्पूषार्यम्णां शौ ॥६।४।१२॥

इन्हन्पूषार्यम्णाम् ६।३॥ शौ ७।१॥ *स०*—इन्ह० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—उपधायाः, अङ्गस्य, दीर्घः ॥ *अर्थः*—इन्, हन्, पूषन्, अर्यमन्

इत्येवमन्तानामङ्गानामुपधायाः शौ परतो दीर्घो भवति नान्यत्र ॥ *उदा०*—इन्—बहुदण्डीनि, बहुच्छत्रीणि । हन्—बहुवृत्रहाणि, बहुभ्रूणहाणि । पूषन्—बहुपूषाणि । अर्यमन्—बह्वर्यमाणि ॥

भाषार्थः—[*इन्हन्पूषार्यम्णाम्*] इन्प्रत्ययान्त हन् पूषन् अर्यमन् इन अङ्गों की उपधा को [*शौ*] शि विभक्ति परे रहते ही दीर्घ होता है ॥ दण्डिन् छत्रिन् शब्दों में मत्वर्थक इनि (५।२।११५) प्रत्यय हुआ है । सर्वत्र बहु शब्द के साथ बहुव्रीहि समास हुआ है ॥ सिद्धि भाग १ परि० १।१।४१ के कुण्डानि के समान है । णत्व भी ८।४।२ से तथा बहुवृत्रहाणि में ८।४।१२ से हो जायेगा ॥

यहाँ से *इन्हन्पूषार्यम्णाम्*' की अनुवृत्ति ६।४।१३ तक जायेगी ॥

सौ च ॥६।४।१३॥

सौ ७।१॥ च अ०॥ *अनु०*—इन्हन्पूषार्यम्णाम्, असम्बुद्धौ, उपधायाः, अङ्गस्य, दीर्घः ॥ *अर्थः*—सावसम्बुद्धौ परतः इन्हन्पूषार्यम्णामुपधाया दीर्घो भवति ॥ *उदा०*—दण्डी, वृत्रहा, पूषा, अर्यमा ॥

भाषार्थः—सम्बुद्धिभिन्न [*सौ*] सु विभक्ति परे रहते [*च*] भी इन्, हन्, पूषन्, अर्यमन् अङ्गों की उपधा को दीर्घ होता है ॥ *नलोपः०* (८।२।७) से नकार लोप उदाहरणों में हो ही जायेगा ॥

यहाँ से '*सौ*' की अनुवृत्ति ६।४।१४ तक जायेगी ॥

अत्वसन्तस्य चाधातोः ॥६।४।१४॥

अत्वसन्तस्य ६।१॥ च अ० ॥ अधातोः ६।१॥ *स०*—अतुश्च अश्च अत्वसौ तावन्ते यस्य स अत्वसन्तस्तस्य······ द्वन्द्वगर्भबहुव्रीहिः । न धातुरधातुस्तस्य······नञ्तत्पुरुषः ॥ *अनु०*—सौ, असम्बुद्धौ, उपधायाः, अङ्गस्य, दीर्घः ॥ *अर्थः*—धातुभिन्नस्य अत्वन्तस्य असन्तस्य चाङ्गस्योपधायाः सावसम्बुद्धौ परतो दीर्घो भवति ॥ *उदा०*—डवतु—भवान् । क्तवतु—कृतवान् । मतुप्—गोमान्, यवमान् । असन्तस्य—सुपयाः, सुयशाः, सुस्रोताः ॥

भाषार्थः—[*अधातोः*] धातु भिन्न [*अत्वसन्तस्य*] अतु तथा अस्

अन्त वाले अङ्ग की उपधा को [च] भी दीर्घ होता है संबुद्धिभिन्न सु विभक्ति परे रहते। भवान् शब्द में *भातेर्डवतुप्* (उणा० १।६३) से डवतुप् प्रत्यय हुआ है। डवतुप् का अवतु शेष रहेगा, इस प्रकार भवत् शब्द अतु अन्त वाला है। शेष सिद्धि भाग १ परि० १।१।५ के कृतवान् के समान जानें। सुपयस् सुयशस् से सुपयाः सुयशाः आदि बनेंगे॥

अनुनासिकस्य क्विझलोः क्ङिति ॥६।४।१५॥

अनुनासिकस्य ६।१॥ क्विझलोः ७।२॥ क्ङिति ७।१॥ *स०*—क्विझलोः इत्यत्रेतरेतरद्वन्द्वः। कश्च ङश्च क्ङौ, क्ङौ इतौ यस्य स क्ङित् तस्मिन्'''द्वन्द्वगर्भबहुव्रीहिः॥ *अनु०*—उपधायाः, अङ्गस्य, दीर्घः॥ *अर्थः*—अनुनासिकान्तस्याङ्गस्योपधाया दीर्घो भवति क्विप्रत्यये परतो झलादौ च क्ङिति॥ *उदा०*—प्रशान्, प्रतान्। झलादौ किति—शान्तः, शान्तवान्, शान्त्वा, शान्तिः। ङिति—शंशान्तः, तन्तान्तः॥

भाषार्थः—[*अनुनासिकस्य*] अनुनासिकान्त अङ्ग की उपधा को दीर्घ होता है [*क्विझलोः*] क्वि तथा झलादि [*क्ङिति*] कित् ङित् परे रहते॥ प्रशान् प्रतान् में शमु तथा तमु धातु से क्विप् (३।२।७६) प्रत्यय हुआ है एवं *मो नो धातोः* (८।२।६४) से म् को न् होता है। शान्तः शान्तवान् में निष्ठा प्रत्यय एवं शान्तिः में झलादि क्तिन् प्रत्यय हुआ है। शंशान्तः तन्तान्तः यहाँ भी पूर्ववत् यङन्त शमु तथा तमु धातुओं से झलादि ङित् तस् प्रत्यय हुआ है। सिद्धि भाग १ परि० २।४।७४ के पापठीति के समान ही है, केवल यहाँ *नुगतोऽनुनासि०* (७।४।८५) से अभ्यास को नुक् आगम होता है, अतः अभ्यास को दीर्घ नहीं होता, यही विशेष है, तस् परे रहते तो प्रकृत सूत्र से दीर्घ होगा ही॥

यहाँ से '*क्विझलोः*' की अनुवृत्ति ६।४।२१ तक तथा '*क्ङिति*' की ६।४।१९ तक जायेगी॥

अज्झनगमां सनि ॥६।४।१६॥

अज्झनगमाम् ६।३॥ सनि ७।१॥ *स०*—अच् च हनश्च गम् च अज्झनगमः, तेषां'''इतरेतरद्वन्द्वः॥ *अनु०*—झलि, अङ्गस्य, दीर्घः॥ *अर्थः*—अजन्तानामङ्गानां हनिगम्योश्च झलादौ सनि परतो दीर्घो भवति॥

उदा०—अजन्तानाम्—चिचीषति, तुष्टूषति, चिकीर्षति, जिहीर्षति। हन्—जिघांसति। गम्—अधिजिगांसते॥

भाषार्थः—[*अज्झनगमाम्*] अजन्त अङ्ग तथा हन् एवं गम् अङ्ग को झलादि [*सनि*] सन् परे रहने पर दीर्घ होता है॥ चिचीषति आदि की सिद्धि भाग १ परि० १।२।६ पृ० ७६८ में देखें। अधिजिगांसते की सिद्धि भाग १ सूत्र २।४।४८ में देखें। इङादेश जो गमि वह यहाँ लिया गया है। हन् धातु से जिघांसति की सिद्धि में कुछ भी विशेष नहीं है। केवल यहाँ *अभ्यासाच्च* (७।३।५५) से अभ्यास से उत्तर ह् को कुत्व घ् हुआ है। अभ्यास को चुत्व आदि पूर्ववत् हो जायेंगे॥

यहाँ से '*सनि*' की अनुवृत्ति ६।४।१७ तक जायेगी॥

तनोतेर्विभाषा ॥६।४।१७॥

तनोतेः ६।१॥ विभाषा १।१॥ *अनु०*—सनि, झलि, अङ्गस्य, दीर्घः॥ *अर्थः*—तनोतेरङ्गस्य झलादौ सनि परतो विभाषा दीर्घो भवति॥ *उदा०*—तितांसति, तितंसति॥

भाषार्थः—[*तनोतेः*] तन् अङ्ग को झलादि सन् परे रहते [*विभाषा*] विकल्प से दीर्घ होता है॥ सिद्धियाँ पूर्ववत् सन्नन्त की सिद्धियों के समान हैं॥

यहाँ से '*विभाषा*' की अनुवृत्ति ६।४।१८ तक जायेगी॥

क्रमश्च क्त्वि ॥६।४।१८॥

क्रमः ६।१॥ च अ०॥ क्त्वि ७।१॥ *अनु०*—विभाषा, झलि, उपधायाः, अङ्गस्य, दीर्घः॥ *अर्थः*—क्रमेरङ्गस्य उपधाया विभाषा दीर्घो भवति झलादौ क्त्वा प्रत्यये परतः॥ *उदा०*—क्रन्त्वा, क्रान्त्वा॥

भाषार्थः—[*क्रमः*] क्रम अङ्ग की उपधा को [*च*] भी झलादि [*क्त्वि*] क्त्वा प्रत्यय परे रहते विकल्प से दीर्घ होता है॥

च्छ्वोः शूडनुनासिके च ॥६।४।१९॥

च्छ्वोः ६।२॥ शूठ् १।१॥ अनुनासिके ७।१॥ च अ०॥ *स०*—च्छ्श्च वश्च च्छ्वौ तयोः च्छ्वोः, इतरेतरद्वन्द्वः। शश्च ऊठ् च शूठ्,

समाहारो द्वन्द्वः ॥ अनु०—क्विझलोः क्ङिति, अङ्गस्य ॥ *अर्थः*—च्छ्
इत्येतयोः स्थाने यथासंख्यं श् ऊठ् इत्येतौ आदेशौ भवतोऽनुनासिका
प्रत्यये परतः, क्वौ झलादौ च क्ङिति ॥ *उदा०*—अनुनासिके प्रत्यये-
प्रश्नः, विश्नः । वकारस्य ऊठ्—स्योनः । क्वौ छस्य—शब्दप्राट्, गोविट् । वक
रस्य क्वौ—अक्षद्यूः हिरण्यद्यूः । झलादौ किति छस्य—पृष्टः पृष्टवा
पृष्ट्वा । वकारस्य झलादौ किति—द्यूतः, द्यूतवान्, द्यूत्वा ॥

भाषार्थः—[*च्छ्वोः*] च्छ् और व् के स्थान में यथासंख्य करके [*शूठ्*
श् और ऊठ् आदेश होते हैं [*अनुनासिके*] अनुनासिकादि प्रत्यय प
रहते [च] तथा क्वि और झलादि कित् ङित् प्रत्ययों के परे रहते
तुक् सहित जो छकार उसको यहाँ शकारादेश होता है ॥

यहाँ से 'च्छ्वोः *अनुनासिके*' की अनुवृत्ति ६।४।२१ तक तथा 'शूठ
की ६।४।२० तक जायेगी ॥

ज्वरत्वरस्रिव्यविमवामुपधायाश्च ॥६।४।२०॥

ज्वरत्वरस्रिव्यविमवाम् ६।१॥ उपधायाः ६।१॥ च अ० ॥ *स०*—
ज्वर० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—छ्वोः अनुनासिके शूठ्, क्विझलोः
अङ्गस्य ॥ *अर्थः*—ज्वर, त्वर, स्रिवि, अव, मव इत्येतेषामङ्गानां वकारस्
उपधायाश्च स्थाने ऊठ् इत्ययमादेशो भवति क्वौ परतो झलादावनुनासिकादौ
च प्रत्यये परतः ॥ *उदा०*—ज्वर क्वौ—जूः जुरौ, जुरः । झलादौ—जूर्ति
जूर्णः, जूर्णवान् । त्वर—तूः तुरौ, तुरः । तूर्त्तिः तूर्णः, तूर्णवान् । स्रिवि
स्रूः, स्रुवौ, स्रुवः । स्रूतिः, स्रूतः, स्रूतवान् । अव—ऊः, उवौ, उवः
मव—मूः, मुवौ, मुवः । अनुनासिके—अवतेर्मनिन्प्रत्यये—ओम् ॥

भाषार्थः—[*ज्वर···वाम्*] ज्वर, त्वर, स्रिवि, अव, मव इन अङ्गों के
वकार [च] तथा [*उपधायाः*] उपधा के स्थान में ऊठ् आदेश होता है
क्वि तथा झलादि एवं अनुनासिकादि प्रत्ययों के परे रहते ॥

इस सूत्र में काशिका में क्ङिति की अनुवृत्ति भी लाये हैं, जो कि
ठीक नहीं, क्योंकि अक्ङित् स्थल में भी इस सूत्र की प्रवृत्ति देखी जाती
है । यथा—अव धातु से *सितनिगमि०* (*उणा०* १।६९) से तुन् प्रत्यय
करके ओतुः में । 'अनुनासिके' की अनुवृत्ति तो लानी ही चाहिये

क्योंकि अव धातु से *अवतेष्टिलोपश्च* (उणा० १।१४२) से अनुनासिकादि मन् प्रत्यय के परे रहते प्रकृत सूत्र से उपधा एवं वकार को ऊठ् होकर मन् के टि का लोप होकर 'ओम्' शब्द सिद्ध होता है ॥ इस प्रकार अनुनासिकादि का एक उदाहरण ही सुलभ होने से दिखा दिया है, अन्यत्र भी इसी प्रकार हो सकता है ॥

जूः, जुरौ आदि में पूर्ववत् क्विप् प्रत्यय हुआ है। ज्वर् त्वर् (ञित्वरा) की उपधा 'व' का 'अ' है अतः उसको एवं व् को ऊठ् होकर ज् ऊठ् र् = जूर् = जूः बन गया। तूर्णः में इट् निषेध भी पक्ष में रुष्यमत्वर० (७।२।२८) से हुआ है। इसी प्रकार स्रिव् अव् मव् की उपधा क्रमशः इ, अ एवं म का अ है, अतः उपधा एवं वकार के स्थान में ऊठ् होकर स्रूः आदि प्रयोग बन गये। जूर्त्तिः आदि में झलादि क्तिन् आदि प्रत्यय परे हैं ही ॥ सामर्थ्य से यहाँ 'च्छ्वोः शूठ्' की अनुवृत्ति आने पर भी च्छ् एवं श् का सम्बन्ध सूत्रार्थ में नहीं बैठता, वकार एवं ऊठ् का ही लगता है ॥

राल्लोपः ॥६।४।२१॥

रात् ५।१॥ लोपः १।१॥ *अनु०*—छ्वोः, अनुनासिके, क्विझलोः, क्ङिति, अङ्गस्य ॥ *अर्थः*—रेफात् परयोः छ्वोर्लोपो भवति क्वौ झलादौ क्ङिति अनुनासिके च प्रत्यये परतः ॥ *उदा०*—क्वौ—मुर्छा—मूः, मुरौ, मुरः। झलादौ—मूर्त्तः, मूर्त्तवान् मूर्त्तिः। हुर्छा—हूः, हुरौ, हुरः। हूर्णः, हूर्णवान्, हूर्त्तिः। वकारस्य तुर्वी—तूः, तुरौ, तुरः। तूर्णः, तूर्णवान्, तूर्त्तिः। धुर्वी—धूः, धुरौ, धुरः। धूर्णः, धूर्णवान्, धूर्त्तिः ॥

भाषार्थः—[*रात्*] रेफ से उत्तर छकार और वकार का [*लोपः*] लोप हो जाता है कि तथा झलादि कित् ङित् अनुनासिकादि प्रत्ययों के परे रहते ॥ रेफ से उत्तर छकार को तुक् किसी सूत्र से विहित नहीं, अतः असम्भव होने से यहाँ रेफ से उत्तर केवल छकार का ही लोप हाता है न कि तुक् सहित का ॥ मुर्छा हुर्छा = मुर्छ् हुर्छ् धातुओं के छ् का लोप क्विप् परे रहते होकर मुर् हुर् रहा। शेष मूः आदि की सिद्धि भाग १ परि० ३।२।१७७ के धूः के समान जानें ॥ मूर्त्तः मूर्त्तवान् में *रदाभ्यां निष्ठातो०* (८।२।४२) से प्राप्त निष्ठा के नत्व का अभाव *न ध्याख्यापृमूर्च्छि०* (८।२।५७) से होता है। *आदितश्च* (७।२।१६) से

इट् प्रतिषेध तथा *हलि च* (८।२।७७) से दीर्घत्व भी होगा। हूर्णः
वान् भी निष्ठा को नत्व करके इसी प्रकार बनेंगे ॥

असिद्धवदत्राभात् ॥६।४।२२॥

असिद्धवत् अ० ॥ अत्र अ० ॥ आ अ० ॥ भात् ५।१॥ *स०*—न ि
असिद्धः, नञ्तत्पुरुषः ॥ असिद्धेन तुल्यं वर्त्तत इत्यसिद्धवत्। सिद्धशब्द
निष्पन्नवचनः, यथा 'सिद्ध ओदनः' इति ॥ आ भात् इत्यत्राभि
'आङ्' ॥ *अर्थः*—आभात् अर्थाद् भाधिकारपर्यन्तमापादपरिसमा
सिद्धवदित्यधिकारो वेदितव्यः समानाश्रये ॥ आभीयं शास्त्रं निष्पन्न
आभसंशब्दनाद् यदुच्यते तस्मिन् कर्त्तव्ये सिद्धकार्यं = स्वकार्य
करोतीत्यर्थः ॥ सूत्रे 'अत्र' शब्दोपादानं समानाश्रयत्वप्रतिपत्यर्थ
समान एक आश्रयो निमित्तं यस्य तत् समानाश्रयम् ॥ *उदा०*—
शाधि। आगहि, जहि ॥

भाषार्थः—'आभात्' यहाँ आङ् अभिविधि में है, अतः 'आभ
से '*भस्य*' (६।४।१२९) का अधिकार जहाँ तक जाता है, अर्थात् 'पाद
समाप्ति पर्यन्त' ऐसा अर्थ होगा ॥

[*आभात्*] भस्य के अधिकार पर्यन्त अर्थात् इस अध्याय की स
पर्यन्त [*अत्र*] समानाश्रय अर्थात् एक ही निमित्त होने पर आभीय
[*असिद्धवत्*] सिद्ध के समान नहीं होता, अर्थात् आभीय कार्य के
पर भी वह न होने जैसा इस सूत्र से माना जाता है ॥ 'अत्र' का
यहाँ समानाश्रयत्व द्योतन के लिये है। समान = एक ही आश्रय = नि
है जिसका वह समानाश्रय हुआ। द्वितीयावृत्ति में प्रत्युदाहरण से
बात सुस्पष्ट हो जायेगी ॥ 'असिद्धवत्' यह अधिकार पाद की सम
पर्यन्त जानना चाहिये ॥

अस भुवि तथा शासु अनुशिष्टौ धातु के लोट् मध्यम पुरुष के
शाधि रूप हैं, अतः सिप् प्रत्यय आकर एवं सिप् को *सेर्ह्यपिच्च* (३।४।८७
हि आदेश तथा शप् का *अदिप्रभृतिभ्यः०* (२।४।७२) से लुक् होकर
हि, शास् हि रहा। अस् के अ का *श्नसोरल्लोपः* (६।४।१११)
लोप होकर स् हि रहा। *घ्वसोरेद्धावभ्यासलोपश्च०* (६।४।११९) से उस
को भी एकार होकर 'ए हि'। इसी प्रकार *शा हौ* (६।४।३५) से श

के स्थान में 'शा' आदेश करने से 'शा हि' रहा। अब यहाँ दोनों स्थलों में *हुझल्भ्यो हेर्धिः* (६।४।१०१) से हि को धि प्राप्त नहीं हो सकता, क्योंकि झल् से उत्तर 'हि' नहीं है, किन्तु जब प्रकृत सूत्र से आभीय कार्य धित्व करने में, आभीय कार्य एत्व (६।४।११९) एवं शा भाव (६।४।३५) असिद्ध अर्थात् अनिष्पन्न के समान माने गये तो *हुझल्भ्यो हेर्धिः* की दृष्टि में 'स् हि, शास् हि' ऐसा रूप ही दिखा, अतः एत्व शाभाव कर लेने पर भी हुझल्भ्यो० से झलन्त से उत्तर 'धि' होकर एधि, शाधि सिद्ध हो गये।। आगहि जहि भी पूर्ववत् ही गम् तथा हन् के लोट् के रूप हैं। गम् के अनुनासिक का लोप *अनुदात्तोपदे०* (६।४।३७) से हुआ है, तथा शप् का *बहुलं छन्दसि* (२।४।७३) से लुक् हो जायेगा। हन् को भी हि परे रहते *हन्तेर्जः* (६।४।३६) से ज आदेश हो जायेगा सो आगहि जहि ऐसे रूप बने, किन्तु यहाँ *अतो हेः* (६।४।१०५) से 'ग' तथा 'ज' अदन्त अङ्ग से उत्तर हि का लुक् भी प्राप्त हुआ जो कि इष्ट नहीं, तब प्रकृत सूत्र से आभीय कार्य *अतो हेः* की दृष्टि में आभीय कार्य अनुनासिक लोप एवं ज भाव असिद्ध हो गये, तो 'आ गम् हि, हन् हि' ऐसा रूप ही *अतो हेः* को दिखा, अब हि का लुक् करने में गम् हन् तो अदन्त हैं नहीं, अतः *अतो हेः* से हि का लुक् भी नहीं हुआ, यही इस सूत्र का प्रयोजन है।।

श्नान्नलोपः ।।६।४।२३।।

श्नात् ५।१।। नलोपः १।१।। *स०*—नकारस्य लोपः नलोपः षष्ठीतत्पुरुषः।। *अर्थः*—श्नादुत्तरस्य नकारस्य लोपो भवति।। श्नादित्यनेन श्नम् उत्सृष्टमकारो गृह्यते।। *उदा०*—अनक्ति, भनक्ति, हिनस्ति।।

भाषार्थः—[*श्नात्*] श्न से उत्तर [*नलोपः*] नकार का लोप हो जाता है।। श्न से यहाँ श्नम् (३।१।७८) का ग्रहण है।। अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु धातु से अनक्ति, भञ्जो आमर्दने से भनक्ति, हिसि हिंसायाम् से हिनस्ति बनता है। हिसि धातु में *इदितो नुम्०* (७।१।५८) से नुम् आगम होकर हिन्स् बना है। शेष कार्य भाग १ परि० १।१।४६ के भिनत्ति की सिद्धि के समान जानें। अ श्नम् ञ् क्ति = अन ञ् क्ति यहाँ प्रकृत सूत्र से श्नम् से उत्तर न् (जो कि ज् के योग से 'ञ्' हो गया है) का लोप होगया। पश्चात् *चोः कुः* (८।२।३०) से ज् को ग्

एवं *खरि च* (८।४।५४) से क् होकर अनक्ति बन गया। भनां हिनस्ति में भी यही प्रक्रिया जानें ॥

यहाँ से '*नलोपः*' की अनुवृत्ति ६।४।३३ तक जायेगी ॥

अनिदितां हल उपधायाः क्ङिति ॥६।४।२४॥

अनिदिताम् ६।३॥ हलः ६।१॥ उपधायाः ६।१॥ क्ङिति ७।१ *स०*—इकार इत् येषां त इदितः, बहुव्रीहिः। न इदितोऽनिदितस्ते '''नञ्तत्पुरुषः। कश्च ङश्च क्ङौ, क्ङौ इतौ यस्य स क्ङित् तस्मिन् द्वन्द्वगर्भबहुव्रीहिः ॥ *अनु०*—नलोपः, अङ्गस्य ॥ *अर्थः*—अनिदित मङ्गानां हलन्तानामुपधाया नकारस्य लोपो भवति किति ङिति च प्रत्य परतः ॥ *उदा०*—किति—स्रस्तः, ध्वस्तः। स्रस्यते, ध्वस्यते। ङिति- सनीस्रस्यते, दनीध्वस्यते ॥

भाषार्थः—[*अनिदिताम्*] इकार जिनका इत् संज्ञक नहीं है, ऐ [*हलः*] हलन्त अङ्ग की [*उपधायाः*] उपधा के नकार का लोप होता है [*क्ङिति*] कित् ङित् प्रत्ययों के परे रहते ॥ स्रन्सु ध्वन्सु धातुएँ अनिदि तथा हलन्त हैं, अतः इनके उपधा नकार का लोप हो गया है। क्त स्रस्तः एवं कर्म में यक् परे रहते स्रस्यते रूप बना है। यङ् परे रह नलोप होकर सनीस्रस्यते रूप बनेगा। इसकी सिद्धि भाग १ परि ३।१।२२ में प्रदर्शित पापच्यते के समान ही है। केवल यहाँ *नीग्वञ्चुस्रन्* ध्वन्सु० (७।४।८४) से अभ्यास को 'नीक्' का आगम होता है य विशेष है। नीक् का 'नी' शेष रहेगा ॥

यहाँ से '*उपधायाः*' की अनुवृत्ति ६।४।३४ तक जायेगी ॥

दंशसञ्जस्वञ्जां शपि ॥६।४।२५॥

दंशसञ्जस्वञ्जाम् ६।३॥ शपि ७।१॥ *स०*—दंश० इत्यत्रेतरेतरद्वन्द्वः *अनु०*—उपधायाः, नलोपः, अङ्गस्य॥ *अर्थः*—दन्श, सञ्ज, ष्वञ्ज इत्येतेष मङ्गानामुपधाया नकारस्य लोपो भवति शपि परतः ॥ *उदा०*—दशति सजति। परिष्वजते ॥

भाषार्थः—[*दंशसञ्जस्वञ्जाम्*] दन्श, सञ्ज, ष्वञ्ज इन अङ्गों की उपध

नकार का लोप होता है [*शपि*] शप् प्रत्यय परे रहते ॥ षञ्ज एवं ष्वञ्ज के ष् को धात्वादेः षः सः (६।१।६२) से स्, पुनः उपसर्ग से उत्तर *उपसर्गात् सुनोति०* (८।३।६५) से षत्व होकर परिष्वजते बनता है ॥

यहाँ से '*शपि*' की अनुवृत्ति ६।४।२६ तक जायेगी ॥

रञ्जेश्च ॥६।४।२६॥

रञ्जेः ६।१॥ च अ०॥ *अनु०*—शपि, उपधायाः, नलोपः, अङ्गस्य ॥ *अर्थः*—रञ्जेश्च उपधाया नकारस्य लोपो भवति शपि परतः ॥ *उदा०*—रजति, रजतः, रजन्ति ॥

भाषार्थः—[*रञ्जेः*] रञ्ज् अङ्ग की उपधा के नकार का [*च*] भी लोप होता है, शप् परे रहते ॥

यहाँ से '*रञ्जेः*' की अनुवृत्ति ६।४।२७ तक जायेगी ॥

घञि च भावकरणयोः ॥६।४।२७॥

घञि ७।१॥ च अ०॥ भावकरणयोः ७।२॥ *स०*—भाव० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—रञ्जेः, उपधायाः, नलोपः, अङ्गस्य ॥ *अर्थः*—भावकरणवाचिनि घञि च परतो रञ्जेरुपधाया नकारस्य लोपो भवति ॥ *उदा०*—भावे-आश्चर्यो रागः, विचित्रो रागः । करणे-रज्यतेऽनेनेति रागः ॥

भाषार्थः—[*भावकरणयोः*] भाववाची तथा करणवाची [*घञि*] घञ् के परे रहते [*च*] भी रञ्ज् धातु की उपधा नकार का लोप होता है ॥ करण में *हलश्च* (३।३।१२१) से घञ् होता है ॥

यहाँ से '*घञि*' की अनुवृत्ति ६।४।२९ तक जायेगी ॥

स्यदो जवे ॥६।४।२८॥

स्यदः १।१॥ जवे ७।१॥ *अनु०*—घञि, उपधायाः, नलोपः ॥ *अर्थः*—जवेऽभिधेये घञि परतः स्यद इति निपात्यते । निपातनेन स्यन्देर्नलोपो वृद्ध्यभावश्च भवति ॥ *उदा०*—गवां स्यदः = गोस्यदः, अश्वस्यदः ॥

भाषार्थः—[*जवे*] जव = वेग अभिधेय हो तो घञ् परे रहते [*स्यदः*] स्यद शब्द निपातन किया जाता है । स्यन्दू धातु के न् का लोप तथा

अत उपधायाः (७।२।११६) से प्राप्त वृद्धि का अभाव यहाँ निपातन से होता है ॥ *भावे* (३।३।१८) से घञ् हो ही जायेगा ॥

अवोदैधौद्मप्रश्रथहिमश्रथाः ॥६।४।२९॥

अवो……श्रथाः १।३॥ स०—अवोदै० इत्यत्रेतरेतरद्वन्द्वः ॥ अनु०—घञि, उपधायाः, नलोपः ॥ *अर्थः*—अवोद, एध, ओद्म, प्रश्रथ, हिमश्रथ इत्येते निपात्यन्ते । अवोद इत्यत्र अवपूर्वस्य उन्देः घञि नलोपो निपात्यते । अवोदः । एध इत्यत्र इन्धेर्घञि नलोपो गुणश्च निपात्यते । एधः । ओद्म इत्यत्र उन्देरौणादिके (उणा० १।१४०) मन्प्रत्यये परतो नलोपो गुणश्च निपात्यते । ओद्मः । प्रश्रथ इत्यत्र प्रपूर्वस्य श्रन्थेर्घञि नलोपो वृद्ध्यभावश्च निपात्यते । प्रश्रथः । हिमश्रथ इत्यत्र हिमपूर्वस्य श्रन्थेर्घञि नलोपो वृद्ध्यभावश्च निपात्यते ॥

भाषार्थः—[*अवो……श्रथाः*] अवोद, एध, ओद्म, प्रश्रथ, हिमश्रथ ये शब्द निपातन किये जाते हैं ॥ अवोद यहाँ अव पूर्वक उन्द धातु के नकार का लोप घञ् परे रहते निपातन किया गया है । एध यहाँ इन्ध धातु के न् का लोप एवं गुण घञ् परे रहते निपातन से किया गया है । *न धातुलोप०* (१।१।४) से गुण का निषेध प्राप्त था, निपातन से प्राप्त करा दिया । ओद्म यहाँ उन्द धातु से *अर्तिस्तुसु०* (*उणा०* १।१४०) इस उणादि सूत्र से बाहुलक से हुये मन् प्रत्यय के परे रहते नलोप एवं गुण निपातन से किया जाता है । प्रश्रथ यहाँ प्रपूर्वक श्रन्थ धातु से घञ् परे रहते नलोप एवं *अत उपधायाः* (७।२।११६) से प्राप्त वृद्धि का अभाव निपातन से होता है । हिमश्रथ यहाँ हिम पूर्वपद रहते श्रन्थ धातु से घञ् परे रहते पूर्ववत् नलोप एवं वृद्ध्यभाव निपातन है ॥

नाञ्चेः पूजायाम् ॥६।४।३०॥

न अ० ॥ अञ्चेः ६।१॥ पूजायाम् ७।१॥ *अनु०*—उपधायाः, नलोपः, अङ्गस्य ॥ *अर्थः*—पूजायामर्थे अञ्चेरङ्गस्योपधायाः नकारस्य लोपो न भवति ॥ *उदा०*—अञ्चिता अस्य गुरवः । अञ्चितमिव शिरो वहति ॥

भाषार्थः—[*पूजायाम्*] पूजा अर्थ में [*अञ्चेः*] अञ्चु अङ्ग की उपधा

नकार का लोप [*न*] नहीं होता है ॥ *अनिदितां हल०* (६।४।२४) से नकार लोप प्राप्त था इस सूत्र से निषेध कर दिया ॥ अञ्चितः यहाँ *मतिबुद्धि०* (३।२।१८८) से क्त प्रत्यय होता है। *अञ्चेः पूजायाम्* (७।२।५३) से इट् आगम भी यहाँ होता है ॥

यहाँ से 'न' की अनुवृत्ति ६।४।३२ तक जायेगी ॥

क्त्वि स्कन्दिस्यन्दोः ॥६।४।३१॥

क्त्वि ७।१॥ स्कन्दिस्यन्दोः ६।२॥ *स०*—स्कन्दि० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—न, उपधायाः, नलोपः, अङ्गस्य ॥ *अर्थः*—स्कन्द, स्यन्द इत्येतयोर्नकारलोपो न भवति क्त्वाप्रत्यये परतः ॥ *उदा०*—स्कन्त्वा, स्यन्त्वा। स्यन्देरूदित्वात् पक्षे इडागमः—स्यन्दित्वा ॥

भाषार्थः—[*स्कन्दिस्यन्दोः*] स्कन्द तथा स्यन्द के नकार का लोप [*क्त्वि*] क्त्वा प्रत्यय परे रहते नहीं होता ॥ पूर्ववत् *अनिदितां हल०* (६।४।२४) से प्राप्ति थी निषेध कर दिया। स्यन्दू धातु ऊदित् है, अतः *स्वरतिसूति०* (७।२।४४) से पक्ष में इट् आगम होकर स्कन्दित्वा रूप भी बनता है। इट् पक्ष में *न क्त्वा सेट्* (१।२।१८) से कित् का प्रतिषेध होने पर अकित् माना जाने से स्वयमेव नलोप का अभाव रहेगा ॥ स्कन्त्वा आदि में *खरि च* (८।४।५४) से द् को चर्त्व होकर *झरो झरि०* (८।४।६४) से एक त् का लोप होता है ॥

यहाँ से '*क्त्वि*' की अनुवृत्ति ६।४।३२ तक जायेगी ॥

जान्तनशां विभाषा ॥६।४।३२॥

जान्तनशाम् ६।३॥ विभाषा १।१ ॥ *स०*—ज अन्ते येषाम् ते जान्ताः, जान्ताश्च नश्च जान्तनशस्तेषाम्...... बहुव्रीहिगर्भेतरेतरद्वन्द्वः ॥ *अनु०*—क्त्वि, न, उपधायाः, नलोपः, अङ्गस्य ॥ *अर्थः*—जान्तानामङ्गानां नशेश्च क्त्वाप्रत्यये परतो विभाषा नकारलोपो न भवति ॥ *उदा०*—रञ्ज्—रङ्क्त्वा, रक्त्वा। भञ्ज्—भङ्क्त्वा, भक्त्वा। नश्—नंष्ट्वा, नष्ट्वा ॥

भाषार्थः—[*जान्तनशाम्*] जकारान्त अङ्ग के तथा नश् के नकार का लोप [*विभाषा*] विकल्प करके नहीं होता, अर्थात् होता है ॥ पूर्ववत् प्राप्ति थी, विकल्प विधान कर दिया ॥ भङ्क्त्वा आदि में ज् को चोः कुः

(८।२।३०) एवं *खरि च* (८।४।५४) से क् होता है। न् को परसवर्णादि होकर ङ् हो ही जायेगा। नश् धातु को क्त्वा परे रहते *मस्जिनशोर्झलि* (७।१।६०) से जो नुम् आगम होता है, उसी का यहाँ विकल्प से लोप होता है। *व्रश्चभ्रस्ज०* (८।२।३६) से श् को ष् एवं ष्टुत्व होकर नंष्ट्वा नष्ट्वा बनता है॥

यहाँ से '*विभाषा*' की अनुवृत्ति ६।४।३३ तक जायेगी॥

भञ्जेश्च चिणि ॥६।४।३३॥

भञ्जेः ६।१॥ च अ०॥ चिणि ७।१॥ *अनु०*—विभाषा, उपधायाः, नलोपः, अङ्गस्य॥ *अर्थः*—चिणि परतो भञ्जेश्च विभाषा नकारलोपो भवति॥ *उदा०*—अभाजि, अभञ्जि॥

भाषार्थः—[*भञ्जेः*] भञ्ज् अङ्ग के नकार का लोप [च] भी विकल्प से होता है [*चिणि*] चिण् प्रत्यय परे रहते॥ चिण् प्रत्यय कित् ङित् नहीं है, अतः नलोप की प्राप्ति ही नहीं थी, अतः यह अप्राप्त विभाषा है॥ *चिण् भावकर्मणोः* (३।१।६६) से चिण् प्रत्यय होता है। अभाजि में *अत उपधायाः* (७।२।११६) से वृद्धि हो जायेगी॥

शास इदङ्हलोः ॥६।४।३४॥

शासः ६।१॥ इत् १।१॥ अङ्हलोः ७।२॥ *स०*—अङ्० इत्यत्रेतरेतरद्वन्द्वः॥ *अनु०*—उपधायाः, अङ्गस्य। क्ङिति इत्यप्यनुवर्त्तते मण्डूकप्लुतगत्या॥ *अर्थः*—शास उपधाया इकारादेशो भवति, अङि परतो हलादौ च क्ङिति॥ *उदा०*—अङ्—अन्वशिषत्, अन्वशिषताम्। हलादौ किति—शिष्टः, शिष्टवान्। ङिति—तौ शिष्टः, वयं शिष्मः॥

भाषार्थः—[*शासः*] शास् अङ्ग की उपधा को [इत्] इकारादेश हो जाता है [*अङ्हलोः*] अङ् तथा हलादि कित् ङित् प्रत्यय परे रहते॥ भाग १ परि० ३।१।५६ पृ० ८८१ में अशिषत् की सिद्धि देखें। यहाँ अनुपूर्वक प्रयोग है। निष्ठा में शिष्टः शिष्टवान् एवं तस् मस् में शिष्टः शिष्मः बने हैं। *सार्वधातुकमपित्* (१।२।४) से तस् मस् ङित् हैं, अतः हलादि ङित् प्रत्यय परे है ही। *शासिवसि०* (८।३।६०) से षत्व एवं ष्टुत्व ही विशेष है। शास् की उपधा 'आ' को सर्वत्र इत्व हुआ है॥

यहाँ से '*शासः*' की अनुवृत्ति ६।४।३५ तक जायेगी ॥

शा हौ ॥६।४।३५॥

शा १।१॥ हौ ७।१॥ अनु०—शासः, अङ्गस्य ॥ *अर्थः*—शासोऽङ्गस्य स्थाने हौ परतः शा इत्ययमादेशो भवति ॥ *उदा०*—अनुशाधि, प्रशाधि ॥

भाषार्थः—शास् अङ्ग के स्थान में [*हौ*] हि परे रहते [*शा*] शा यह आदेश होता है ॥ सिद्धि *असिद्धवदत्राभात्* (६।४।२२) सूत्र में देखें ॥

यहाँ से '*हौ*' की अनुवृत्ति ६।४।३६ तक जायेगी ॥

हन्तेर्जः ॥६।४।३६॥

हन्तेः ६।१॥ जः १।१॥ अनु०—हौ, अङ्गस्य ॥ *अर्थः*—हन्तेरङ्गस्य स्थाने ज इत्ययमादेशो भवति हौ परतः ॥ *उदा०*—जहि शत्रून् ॥

भाषार्थः—[*हन्तेः*] हन् अङ्ग के स्थान में हि परे रहते [*जः*] ज यह आदेश होता है ॥ सिद्धि *असिद्धवद०* सूत्र में ही देखें ॥

अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिक लोपोझलि क्ङिति ॥६।४।३७॥

अनुदा'''दीनाम् ६।३॥ अनुनासिक लुप्तषष्ठ्यन्तनिर्देशः ॥ लोपः १।१॥ झलि ७।१॥ क्ङिति ७।१॥ *स०*—अनुदात्त उपदेशे येषां ते अनुदात्तोपदेशाः, बहुव्रीहिः । तनोतिरादिर्येषां ते तनोत्यादयः, बहुव्रीहिः । अनुदात्तोपदेशाश्च वनतिश्च तनोत्यादयश्च अनुदात्तोपदेशवनतितनोत्यादयस्तेषां'''इतरेतरद्वन्द्वः । क्ङिति इत्यत्र पूर्ववत् समासो ज्ञेयः ॥ *अनु०*—अङ्गस्य ॥ *अर्थः*—उपदेशे अनुदात्तानाम् अनुनासिकान्तानां वनतेः तनोत्यादीनां चाङ्गानां झलादौ क्ङिति प्रत्यये परतोऽनुनासिकस्य लोपो भवति ॥ *उदा०*—अनुदात्तोपदेशानाम्—यम्—यत्वा, यतः, यतवान्, यतिः । रमु–रत्वा, रतः, रतवान्, रतिः । वनतेः—वतिः । तनोत्यादीनाम्—ततः, ततवान्, क्षणु-क्षतः, क्षतवान्, ऋणु-ऋतः, ऋतवान्, । ङिति-अतत, अतथाः ॥

भाषार्थः—[*अनु'''दीनाम्*] उपदेश में जो अनुदात्त अनुनासिकान्त उनके तथा वन एवं तनोत्यादि अङ्गों के [*अनुनासिक*] अनुनासिक का

[*लोपः*] लोप होता है, [*झलि क्ङिति*] झलादि कित् ङित् प्रत्ययों के परे रहते ॥ अनुनासिक का संबन्ध लोप के साथ और अनुदात्तोपदेश के साथ भी लगाना इष्ट है, अतः 'अनुनासिक' पद लुप्तविभक्तिक माना गया है। अनुदात्तोपदेश का विशेषण 'अनुनासिकानाम्' न बनाने पर मुक्त में म लोप प्राप्त होगा ॥ वन धातु से क्तिन् में वतिः रूप बना है। क्तिच् में तो *न क्तिचि दीर्घश्च* (६।४।३९) से अनुनासिक लोप निषेध कहा है अतः क्तिच् का रूप नहीं हो सकता। अतत, अतथाः की सिद्धि भाग १ सूत्र २।४।७८ में देखें। त तथा थास् *सार्वधातुकमपित्* (१।२।४) से ङित् हैं ॥

यहाँ से '*अनुदात्तोपदेशवनतितनोत्यादीनाम्*' की अनुवृत्ति ६।४।३९ तक तथा '*अनुनासिक लोपः*' की ६।४।४० तक जायेगी ॥

वा ल्यपि ॥६।४।३८॥

वा अ०॥ ल्यपि ७।१॥ *अनु०*—अनुदात्तोपदेशवनतितनोत्यादीनाम्, अनुनासिक लोपः, अङ्गस्य ॥ *अर्थः*—अनुदात्तोपदेशवनतितनोत्यादीनामङ्गानां ल्यपि परतो विकल्पेन अनुनासिकलोपो भवति॥ इयं व्यवस्थितविभाषा, तेन मान्तानां विकल्पेन लोपो भवति नान्तानां तु नित्यमेव ॥ *उदा०*—प्रयत्य, प्रयम्य, प्ररत्य, प्ररम्य, प्रणत्य, प्रणम्य, आगत्य, आगम्य, आहत्य, प्रमत्य, प्रवत्य, वितत्य, प्रक्षत्य ॥

भाषार्थः—अनुदात्तोपदेश, वनति तथा तनोत्यादि अङ्गों के अनुनासिक का लोप [*ल्यपि*] ल्यप् परे रहते [*वा*] विकल्प करके होता है ॥ यह व्यवस्थित विभाषा है, अतः मकारान्तों का विकल्प से लोप होता है नकारान्तों का नित्य ही लोप देखा जाता है ॥ सिद्धियां भाग १ परि० १।१।५५ के प्रकृत्य के समान जानें ॥

न क्तिचि दीर्घश्च ॥६।४।३९॥

न अ० ॥ क्तिचि ७।१॥ दीर्घः १।१॥ च अ० ॥ *अनु०*—अनुदात्तोपदेशवनतितनोत्यादीनाम्, अनुनासिक लोपः, अङ्गस्य ॥ *अर्थः*—क्तिचि परतोऽनुदात्तोपदेशवनतितनोत्यादीनामङ्गानामनुनासिक लोपः दीर्घश्च न भवति ॥ *उदा०*—यन्तिः, वन्तिः, तन्तिः ॥

भाषार्थः—[*क्तिचि*] क्तिच् परे रहते अनुदात्तोपदेश, वनति तथा तनोत्यादि अङ्गों के अनुनासिक का लोप [*च*] तथा [*दीर्घः*] दीर्घ [*न*] नहीं होता है ॥ अनुनासिक लोप का प्रतिषेध कर देने पर *अनुनासिकस्य क्विझलोः०* (६।४।१५) से जो दीर्घत्व प्राप्त था उसका भी इस सूत्र से प्रतिषेध कर दिया गया ॥ *क्तिच्क्तौ च संज्ञायाम्* (३।३।१७४) से क्तिच् प्रत्यय होता है ॥

गमः क्वौ ॥६।४।४०॥

गमः ६।१॥ क्वौ ७।१॥ *अनु०*—अनुनासिक लोपः, अङ्गस्य ॥ *अर्थः*—क्वौ परतो गमोऽनुनासिक लोपो भवति ॥ *उदा०*—अङ्गगत्, कलिङ्गगत्, अध्वानं गच्छन्तीति = अध्वगतो हरयः ॥

भाषार्थः—[*क्वौ*] क्वि परे रहते [*गमः*] गम् के अनुनासिक का लोप होता है ॥ झलादि प्रत्यय परे न होने से ६।४।३७ से अनुनासिक लोप प्राप्त नहीं था अतः विधान कर दिया है ॥ उदाहरणों में *क्विप् च* (३।२।७६) से क्विप् प्रत्यय तथा तुक् आगम पूर्ववत् होगा ॥

विड्वनोरनुनासिकस्यात् ॥६।४।४१॥

विड्वनोः ७।२॥ अनुनासिकस्य ६।१॥ आत् १।१॥ *स०*—विड्० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—अङ्गस्य ॥ *अर्थः*—अनुनासिकान्तस्याङ्गस्य विटि वनि च प्रत्यये परत आकारादेशो भवति ॥ *उदा०*—अब्जाः, गोजाः, ऋतजाः, अद्रिजाः, गोषा इन्द्रो नृषा असि, कूपखाः, शतखाः, सहस्रखाः, दधिक्राः, अग्रेगा उन्नेतॄणाम् । वन्—विजावा, अग्रेजावा ॥

भाषार्थः—[*विड्वनोः*] विट् तथा वन् प्रत्यय परे रहते [*अनुनासिकस्य*] अनुनासिकान्त अङ्ग को [*आत्*] आकार आदेश होता है ॥ सिद्धियाँ भाग १ सूत्र ३।२।६७ में देखें । विजावा अग्रेजावा में वनिप् प्रत्यय *अन्येभ्योऽपि दृश्यन्ते* (३।२।७५) से होता है । सिद्धि भी उसी प्रकरण में देखें ॥

यहाँ से '*आत्*' की अनुवृत्ति ६।४।४५ तक जायेगी ॥

के तृच् का रूप है। *न पदान्त०* (१।१।५७) सूत्र के परिशिष्ट में धातु से चिकीर्ष बनाने की प्रक्रिया देखें। यहाँ तृच् आर्धधातुक के रहते 'ष' के 'अ' का *अतो लोपः* (६।४।४८) से लोप हुआ है। यङ् में भि धातु से 'बेभिद्य' रूप बन कर तृच् आर्धधातुक परे रहते *यस्य ह* से [1]यकार का लोप हुआ है, पश्चात् इट् आगमादि होकर बेभिदि रूप बन गया। कारणा हारणा की सिद्धि भाग १ सूत्र ३।३।१०७ में देखें

भ्रस्जो रोपधयो रमन्यतरस्याम् ॥६।४।४७॥

भ्रस्जः ६।१॥ रोपधयोः ६।२॥ रम् १।१॥ अन्यतरस्याम् ७।१॥ *स०* रेफश्च उपधा च रोपधे तयोः''' इतरेतरद्वन्द्वः ॥ *अनु०*—आर्धधातु अङ्गस्य ॥ *अर्थः*—भ्रस्जो रेफस्योपधायाश्च स्थाने रमागमो विकल्प भवति, आर्धधातुके परतः ॥ *उदा०*—भ्रष्टा, भर्ष्टा। भ्रष्टुम्, भर्ष्टुम् भ्रष्टव्यम्, भर्ष्टव्यम्। भ्रज्जनम्, भर्ज्जनम् ॥

भाषार्थः—[*भ्रस्जः*] भ्रस्ज धातु के [*रोपधयोः*] रेफ तथा उप के स्थान में [*रम्*] रम् आगम [*अन्यतरस्याम्*] विकल्प से होता आर्धधातुक परे रहने पर ॥ रेफ एवं उपधा सकार के स्थान में रम् *मि चोऽन्त्यात् परः* (१।१।४६) से अन्त्य अच् अ से परे होकर भ् अ ज् तृच् = भ र् ज् तृ रहा। *व्रश्चभ्रस्ज०* (८।२।३६) से ज् को ष् ष्टुत्व होकर भर्ष्टा बना। पक्ष में जब रम् आगम नहीं हुआ तो *स्कोः संयोगा०* (८।२।२९) से सकार लोप एवं पूर्ववत् षत्व ष्टुत्व हो भ्रष्टा बन गया। भ्रज्जनम् भर्ज्जनम् में स् को *झलां जश् झशि* (८।४।५२) से दकार एवं श्चुत्व होकर 'ज्' हो गया है ॥ रम् के र अकार उच्चारणार्थ रखा है[2] ॥

---

१. वस्तुतः यस्य हलः से अकार सहित 'य' सम्पूर्ण का लोप होता है, य् वर्ण का लोप होता है ये दोनों ही पक्ष माने गये हैं। किन्तु य् लोप करके पु अतो लोपः से लोप करने में प्रक्रिया गौरव होने 'य' समुदाय का ही लोप मान श्रेयस्कर है ॥

२. यहाँ रोपधयोः में षष्ठी विभक्ति होने से रम् आगम रेफ एवं उपधा के स्थ में भी होता है, तथा रम् में मित् होने से अन्त्य अच् भ के अ से परे भी होता है ये दोनों ही व्यवस्था षष्ठीनिर्देश एवं मित्करण इन दोनों बातों का सार्थक्य क के लिये एक ही साथ हो जाती हैं ॥

अतो लोपः ॥६।४।४८॥

अतः ६।१॥ लोपः १।१॥ *अनु०*—आर्धधातुके, अङ्गस्य ॥ *अर्थः*—अकारान्तस्याङ्गस्य आर्धधातुके परतो लोपो भवति ॥ *उदा०*—चिकीर्षिता, चिकीर्षितुम्, चिकीर्षितव्यम्। धिनोति, कृणोति ॥

भाषार्थः—[*अतः*] अकारान्त अङ्ग का आर्धधातुक परे रहते [*लोपः*] लोप हो जाता है ॥ चिकीर्षिता आदि की सिद्धि ६।४।४६ सूत्र में ही देखें। धिनोति कृणोति की सिद्धि भाग १ परि० ३।१।८० में देखें। यहाँ 'उ' आर्धधातुक के परे रहते 'अ' का लोप हुआ है ॥

यहाँ से '*लोपः*' की अनुवृत्ति ६।४।५४ तक जायेगी ॥

यस्य हलः ॥६।४।४९॥

यस्य ६।१॥ हलः ५।१॥ *अनु०*—लोपः, आर्धधातुके ॥ *अर्थः*—हल उत्तरस्य यशब्दस्य आर्धधातुके लोपो भवति ॥ *उदा०*—बेभिदिता, बेभिदितुम्, बेभिदितव्यम् ॥

भाषार्थः—[*हलः*] हल् से उत्तर [*यस्य*] 'य' का लोप होता है आर्धधातुक परे रहते ॥ सिद्धि ६।३।४६ सूत्र में देखें ॥

यहाँ से '*हलः*' की अनुवृत्ति ६।४।५० तक जायेगी ॥

क्यस्य विभाषा ॥६।४।५०॥

क्यस्य ६।१॥ विभाषा १।१॥ *अनु०*—हलः, लोपः, आर्धधातुके ॥ *अर्थः*—हल उत्तरस्य क्यस्य विभाषा लोपो भवति ॥ *उदा०*—समिधमात्मन इच्छति, समिद् इवाचरतीति वा = समिध्यिता, समिधिता। दृषद्यिता, दृषदिता ॥

भाषार्थः—हल् से उत्तर [*क्यस्य*] क्य का [*विभाषा*] विकल्प से आर्धधातुक परे रहते लोप होता है ॥ क्य से सामान्य करके क्यच् क्यङ् का ग्रहण होता है ॥ *सुप आत्मनः०* (३।१।८) से क्यच् एवं *कर्तुः क्यङ्०* (३।१।११) से क्यङ् होता है ॥

णेरनिटि ॥६।४।५१॥

णेः ६।१॥ अनिटि ७।१॥ स०—न इट् यस्मिन्, तदनि तस्मिन् अनिटि, बहुव्रीहिः ॥ अनु०—लोपः, आर्धधातुके, अङ्गस्य अर्थः—अनिडादावार्धधातुके णेर्लोपो भवति ॥ उदा०—अततक्षत अररक्षत्, आटिटत्, आशिशत्। कारणा, हारणा। कारकः, हारकः कार्यते, हार्यते। ज्ञीप्सति ॥

भाषार्थः—[*अनिटि*] अनिडादि आर्धधातुक परे रहते [*णेः*] णि व लोप होता है ॥ अततक्षत्, अररक्षत् की सिद्धि भाग १ परि० १।४ पृ० ८२१ में देखें। आटिटत्, आशिशत् की सिद्धि परि० १।१।५ पृ० ७५२ में देखें। कारणा हारणा की सिद्धि ३।३।१०७ सूत्र में देखें कारकः हारकः में णिच् लोप ही विशेष है। कार्यते हार्यते णिजन्त कर्म के रूप हैं। *अचो ञ्णिति* (७।२।११५) से कृ हृ को वृद्धि हुई है ज्ञीप्सति यहाँ ज्ञा धातु से णिच् एवं *अर्तिह्री०* (७।३।३६) से पुक् आग होकर ज्ञापि धातु बनी। ततः *मारणतोषणनिशामनेषु ज्ञा* (*धातुपाठ भ्वा०* से ज्ञा की मित् संज्ञा होकर *मितां ह्रस्वः* (६।४।९२) से ह्रस्व हो गर पश्चात् सन् प्रत्यय एवं द्वित्वादि होकर 'ज ज्ञप् इ स' रहा। णेरनि से णिलोप एवं *सनीवन्तर्ध०* (७।२।४९) से इट् आगम का अभाव होव 'ज ज्ञप् स' रहा। *आप्ज्ञप्यृधामीत्* (७।४।५५) से ज्ञप् के अ को ईत्व ए *अत्र लोपोऽभ्या०* (७।४।५८) से अभ्यास लोप होकर 'ज्ञीप् स' बना आगे ज्ञीप्सति बन गया ॥

यहाँ से '*णेः*' की अनुवृत्ति ६।४।५७ तक जायेगी ॥

निष्ठायां सेटि ॥६।४।५२॥

निष्ठायाम् ७।१॥ सेटि ७।१॥ स०—इटा सह सेट्, तस्मिन्.... बहुव्रीहिः ॥ *अनु०*—णेः, लोपः ॥ *अर्थः*—सेटि निष्ठायां परतो णेर्लो भवति ॥ उदा०—कारितम्, हारितम्, गणितम्, लक्षितम् ॥

भाषार्थः—[*सेटि*] सेट् [*निष्ठायाम्*] निष्ठा परे रहते णि का लोप जाता है ॥ गण तथा लक्ष धातु चुरादि गण की हैं, अतः *सत्या* *चुरादिभ्यो णिच्* (३।१।२५) से णिच् हो गया ॥

जनिता मन्त्रे ॥६।४।५३॥

जनिता १।१॥ मन्त्रे ७।१॥ *अनु०*—णेः, लोपः ॥ *अर्थः*—मन्त्रविषये इडादौ तृचि परतः 'जनिता' इति निपात्यते ॥ *उदा०*—यो नः पिता जनिता (ऋ० १०।८२।३) ॥

भाषार्थः—[*मन्त्रे*] मन्त्र विषय में इडादि तृच् परे रहते [*जनिता*] जनिता यह निपातन है ॥ *णेरनिटि* (६।४।५१) से अनिट् आर्धधातुक परे रहते ही णिलोप प्राप्त था, इडादि आर्धधातुक में भी हो जाये अतः निपातन किया है ॥ जनिता में जो वृद्धि करके 'जान्' बना था उसे *जनीजृष्०* (धा० पा०) से मित् होकर *मितां ह्रस्वः* (६।४।९२) से ह्रस्व हो गया है ॥

शमिता यज्ञे ॥६।४।५४॥

शमिता १।१॥ यज्ञे ७।१॥ *अनु०*—णेः, लोपः ॥ *अर्थः*—यज्ञकर्मणि इडादौ तृचि परतः 'शमिता' इति निपात्यते ॥ *उदा०*—शृतं हविः शमितः ॥

भाषार्थः—[*यज्ञे*] यज्ञ कर्म में इडादि तृच् परे रहते [*शामता*] 'शमिता' यह निपातन किया जाता है ॥ पूर्ववत् इडादि परे णिलोप प्राप्त नहीं था निपातन कर दिया ॥ 'शमितः' यह तृच्प्रत्ययान्त सम्बुद्ध्यन्त शब्द है । पूर्ववत् ह्रस्वत्व आदि जानें ॥

अयामन्ताल्वाय्येत्न्विष्णुषु ॥६।४।५५॥

अय् १।१॥ आम'''ष्णुषु ७।३॥ *स०*—आम० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—णेः, आर्धधातुके ॥ *अर्थः*—आम्, अन्त, आलु, आय्य, इत्नु, इष्णु इत्येतेषु परतो णेरयादेशो भवति ॥ *उदा०*—आम्—कारयाञ्चकार, हारयाञ्चकार । अन्त–गण्डयन्तः, मण्डयन्तः । आलु–स्पृहयालुः, गृहयालुः । आय्य–स्पृहयाय्यः, गृहयाय्यः । इत्नु— स्तनयित्नुः । इष्णु — पोषयिष्णवः ॥

भाषार्थः—[*आम'''ष्णुषु*] आम्, अन्त, आलु, आय्य, इत्नु, इष्णु इनके परे रहते णि को [*अय्*] अय् आदेश होता है ॥ *णेरनिटि* से णि का लोप प्राप्त था, तदपवाद अय् आदेश कह दिया ॥

यहाँ से '*अय्*' की अनुवृत्ति ६।४।५७ तक जायेगी ॥

ल्यपि लघुपूर्वात् ॥६।४।५६॥

ल्यपि ७।१॥ लघुपूर्वात् ५।१॥ *स०*—लघु पूर्वो यस्मात् स लघुपूर्व-स्तस्मात्...बहुव्रीहिः ॥ *अनु०*—अय्, णेः, आर्धधातुके ॥ *अर्थः*—लघुपूर्वादुत्तरस्य णेः स्थाने ल्यपि परतो अयादेशो भवति ॥ *उदा०*—प्रशमय्य गतः, रुदमय्य गतः, प्रबेभिदय्य गतः, प्रगणय्य गतः ॥

भाषार्थः—[*लघुपूर्वात्*] लघु है पूर्व में जिससे ऐसे वर्ण से उत्तर णि के स्थान में [*ल्यपि*] ल्यप् परे रहते अयादेश हो जाता है ॥ प्रश-मय्य आदि में पूर्ववत् मित् होने से *मितां ह्रस्वः* (६।४।६२) से उपधा को ह्रस्व हो जाता है। 'प्र शम् णि ल्यप्' यहाँ शम् अङ्ग के अन्त में म् वर्ण है, उससे पूर्व 'अ' लघु है, अतः 'लघुपूर्व में है जिस वर्ण से' यह कथन सङ्गत हो जाता है ॥ प्रबेभिदय्य यह यङन्त के णिजन्त का रूप है। *यस्य हलः* (६।४।४९) से यहाँ यङ् के य का लोप हुआ है। प्रग-णय्य गण सङ्ख्याने धातु से बना है। गण धातु चुरादि गण में अदन्त पढ़ी है, अतः पूर्ववत् अकार लोप हो जायेगा ॥

यहाँ से '*ल्यपि*' की अनुवृत्ति ६।४।५९ तक जायेगी ॥

विभाषाऽपः ॥६।४।५७॥

विभाषा १।१॥ आपः ५।१॥ *अनु०*—ल्यपि, अय्, णेः, आर्ध-धातुके ॥ *अर्थः*—ल्यपि परत आप उत्तरस्य णेर्विकल्पेनायादेशो भवति ॥ *उदा०*—प्रापय्य गतः, प्राप्य गतः ॥

भाषार्थः—[*आपः*] आप् से उत्तर ल्यप् परे रहते [*विभाषा*] विकल्प से णि के स्थान में अयादेश होता है ॥ आप्ऌ लम्भने (चुरादि) आप्ऌ व्याप्तौ (स्वादि) इन दोनों धातुओं का यहाँ आप् से ग्रहण है। स्वादि गण की आप्ऌ से *हेतुमति च* (३।१।२६) से णिच् होगा ॥

युप्लुवोर्दीर्घश्छन्दसि ॥६।४।५८॥

युप्लुवोः ६।२॥ दीर्घः १।१॥ छन्दसि ७।१॥ *स०*—युप्लु० इत्यत्रे-तरेतरद्वन्द्वः ॥ *अनु०*—ल्यपि, अङ्गस्य ॥ *अर्थः*—छन्दसि विषये यु प्लु इत्येतयोर्ल्यपि परतो दीर्घो भवति ॥ *उदा०*—दान्त्यनुपूर्वं वियूय। यत्रा नो दक्षिणा परिप्लूय ॥

भाषार्थः—[*छन्दसि*] वेद विषय में [*युप्लुवोः*] यु मिश्रणे तथा प्लुङ् गतौ धातु को [*दीर्घः*] दीर्घ होता है ल्यप् परे रहते ॥

यहाँ से '*दीर्घः*' की अनुवृत्ति ६।४।६१ तक जायेगी ॥

क्षियः ॥६।४।५९॥

क्षियः ६।१॥ *अनु०*—दीर्घः, ल्यपि, अङ्गस्य ॥ *अर्थः*—ल्यपि परतः क्षियश्च दीर्घो भवति ॥ *उदा०*—प्रक्षीय ॥

भाषार्थः—[*क्षियः*] क्षि क्षये अथवा क्षि निवासगत्योः धातु को दीर्घ होता है, ल्यप् परे रहते ॥

यहाँ से '*क्षियः*' की अनुवृत्ति ६।४।६१ तक जायेगी ॥

निष्ठायामण्यदर्थे ॥६।४।६०॥

निष्ठायाम् ७।१॥ अण्यदर्थे ७।१॥ *स०*—ण्यतोऽर्थः ण्यदर्थः, षष्ठीतत्पुरुषः। न ण्यदर्थोऽण्यदर्थस्तस्मिन्''' नञ्तत्पुरुषः॥ *अनु०*—क्षियः, दीर्घः, अङ्गस्य॥ *अर्थः*—ण्यदर्थो भावकर्मणी, ताभ्यामन्यत्र या निष्ठा तस्यां क्षियो दीर्घो भवति ॥ *उदा०*—आक्षीणः, प्रक्षीणः, परिक्षीणः, प्रक्षीणमिदं देवदत्तस्य ॥

भाषार्थः—[*अण्यदर्थे*] ण्यत् के अर्थ से भिन्न अर्थ में वर्त्तमान जो [*निष्ठायाम्*] निष्ठा उसके परे रहते क्षि अङ्ग को दीर्घ हो जाता है ॥ ण्यत् प्रत्यय *कृत्याः* (३।१।९५) से कृत्यसंज्ञक होता है, अतः *तयोरेव कृत्यक्तखलर्थाः* (३।४।७०) से ण्यत् का अर्थ भाव तथा कर्म है, इस प्रकार 'अण्यदर्थे' कहने से 'भाव तथा कर्म से अन्यत्र' ऐसा अर्थ होगा ॥ यहाँ अकर्मक क्षि धातु होने से *गत्यार्थाकर्म०* (३।४।७२) से कर्त्ता में क्त प्रत्यय होता है। प्रक्षीणमिदं यहाँ *क्तोऽधिकरणे०* (३।४।७६) से अधिकरण में क्त हुआ है। निष्ठा को नत्व *क्षियो दीर्घात्* (८।२।४६) से तथा *अट्कुप्वाङ्०* (८।४।२) से णत्व होता है ॥

यहाँ से सम्पूर्ण सूत्र की अनुवृत्ति ६।४।६१ तक जायेगी ॥

वाऽऽक्रोशदैन्ययोः ॥६।४।६१॥

वा० अ०॥ आक्रोशदैन्ययोः ७।२॥ *स०*—आक्रोश० इत्यत्रेतरेतर-

द्वन्द्वः ।। अनु०—निष्ठायामण्यदर्थे, क्षियः, दीर्घः, अङ्गस्य ।। अर्थः—क्षि निष्ठायामण्यदर्थे विकल्पेन दीर्घो भवति, आक्रोशे दैन्ये च गम्यमाने उदा०—आक्रोशे—क्षितायुरेधि, क्षीणायुरेधि । दैन्ये-क्षितकः, क्षीण क्षितोऽयं तपस्वी, क्षीणोऽयं तपस्वी ।।

भाषार्थः—क्षि अङ्ग को अण्यदर्थ निष्ठा के परे रहते [आक्रो दैन्ययोः] आक्रोश तथा दैन्य गम्यमान होने पर [वा] विकल्प से द होता है ।। क्षितायुः = क्षीण उम्र वाला तू एधि=हो जा, यह र आक्रोश है । पूर्ववत् कर्त्ता में क्त जानें । दीर्घ पक्ष में पूर्ववत् णत्व होता है । क्षीणकः आदि में क्षीण बनाकर आगे अनुकम्पायाम् (५।३।७ से 'क' प्रत्यय हुआ है ।।

स्यसिच्सीयुट्तासिषु भावकर्म्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ।।६।४।६२।।

स्य···सिषु ७।३।। भावकर्म्मणोः ७।२।। उपदेशे ७।१।। अज्झ···द ६।३।। वा अ०।। चिण्वत् अ०।। इट् १।१।। च अ०।। स०—स्यश्च सि सीयुट् च तासिश्च स्य···तासयस्तेषु···। भावश्च कर्म च भावकर्म तयो···। अच् च हनश्च ग्रहश्च दृश् च अज्झ···दृशस्तेषाम्···। सर्वत्रे तरद्वन्द्वः ।। चिणीव चिण्वत् तत्र तस्येव (५।१।११५) इति सप्तमीसमथ वतिः ।। अनु०—अङ्गस्य ।। अर्थः—स्य, सिच्, सीयुट्, तासि इत्ये परतो भावकर्मविषयेषु उपदेशेऽजन्तानामङ्गानां हन, ग्रह, दृश इत्येतेषां चिण्वत् कार्यं विकल्पेन भवति, इडागमश्च ।। चिण्वद्भावविधानेन स विधानात् यदा चिण्वत्कार्यं तदैव इडागमः ।। उदा०—स्येऽजन्ताना चायिष्यते, चेष्यते, अचायिष्यत अचेष्यत । दायिष्यते, दास्यते, अ यिष्यत, अदास्यत । शामिष्यते, शमिष्यते, शमयिष्यते, अशामिष्यत, अश ष्यत, अशमयिष्यत । हन्—घानिष्यते, हनिष्यते, अघानिष्यत, अह ष्यत । ग्रह—ग्राहिष्यते, ग्रहीष्यते, अग्राहिष्यत, अग्रहीष्यत । दृश् दर्शिष्यते, द्रक्ष्यते, अदर्शिष्यत, अद्रक्ष्यत । सिचि-अजन्तानाम्—अ यिषाताम्, अचेषाताम्। अदायिषाताम्, अदिषाताम् । अशामिषाता अशमिषाताम्, अशमयिषाताम् । हन्—अघानिषाताम्, अवधिषाता अहसाताम् । ग्रह्—अग्राहिषाताम्, अग्रहीषाताम् । दृश्—अदर्शिषाता

द्दक्षाताम् । सीयुटि-अजन्तानाम्—चायिषीष्ट, चेषीष्ट, दायिषीष्ट, ासीष्ट, शामिषीष्ट, शमिषीष्ट, शमयिषीष्ट । हन्—घानिषीष्ट, वधिषीष्ट । ह—ग्राहिषीष्ट, ग्रहिषीष्ट । दृश्—दर्शिषीष्ट, दृक्षीष्ट । तासावजन्तानाम्—ायिता, चेता, दायिता, दाता, शामिता, शमिता, शमयिता । हन्—ानिता, हन्ता । ग्रह्—ग्राहिता, ग्रहीता । दृश्—दर्शिता, द्रष्टा ॥

भाषार्थः—[*भावकर्मणोः*] भाव तथा कर्म विषयक [*स्य*···*सिषु*] स्य, सिच्, सीयुट् और तास् के परे रहते [*उपदेशे*] उपदेश में [*अज्झ*-··*शाम्*] अजन्त धातुओं तथा हन्, ग्रह् एवं दृश् धातुओं को [*चिण्वत्*] चिण्वत् = चिण् के समान [*वा*] विकल्प से कार्य होता है, [*च*] तथा [इट्] इट् आगम भी होता है ॥ चिण्वत् कार्य के साथ इट् का विधान होने से जिस पक्ष में चिण्वत् कार्य होता है, उसी पक्ष में इट् आगम होता है, ऐसा जानना चाहिये ॥ इट् आगम स्य, सिच्, सीयुट् तास् को होता है, अङ्ग को नहीं ॥ इस सूत्र से जो इट् का आगम होता है वह आभात् प्रकरणान्तर्गत होने से *णेरनिटि* (६।४।५१) की दृष्टि में असिद्ध माना जाने से 'शामिष्यते शमिष्यते' आदि णिजन्त प्रयोगों में णि का लोप हो जाता है । सप्तमाध्यायस्थ इडागम होने पर णिलोप नहीं हो सकता, यथा 'शमयिष्यते' । यह इस णि विधान का वैशिष्ट्य है ॥ सिद्धियाँ परिशिष्ट में देखें ॥

दीङो युडचि क्ङिति ॥६।४।६३॥

दीङः ५।१॥ युट् १।१॥ अचि ७।१॥ क्ङिति ७।१॥ *स०*—'क्ङिति' इत्यस्य विग्रहः पूर्ववज्ज्ञेयः ॥ *अनु०*—अङ्गस्य, आर्धधातुके ॥ *अर्थः*—अजादौ क्ङिति प्रत्यये परतो दीङो युडागमो भवति ॥ *उदा०*—उपदिदीये, उपदिदीयाते, उपदिदीयिरे ॥

भाषार्थः—[*अचि*] अजादि [*क्ङिति*] कित् ङित् प्रत्ययों के परे रहते [*दीङः*] दीङ् धातु से उत्तर [*युट्*] युट् का आगम होता है ॥ परि० १।२।६ पृ० ७६४ के ईधे के समान सिद्धि की प्रक्रिया समझें । यहाँ 'दीङः' में पञ्चमी होने से दीङ् धातु से उत्तर अजादि प्रत्यय को युट् आगम होता है ऐसा जानें ॥

यहाँ से '*अचि*' की अनुवृत्ति ६।४।६४ तक तथा '*क्ङिति*' की ६।४।६८ तक जायेगी ॥

आतो लोप इटि च ॥६।४।६४॥

आतः ६।१॥ लोपः १।१॥ इटि ७।१॥ च अ०॥ अनु०—अचि, क्ङिति, आर्धधातुके, अङ्गस्य ॥ *अर्थः*—आकारान्तस्याङ्गस्य इडादावार्धधातुके क्ङिति चाजादावार्धधातुके परतो लोपो भवति ॥ *उदा०*—इडादावार्धधातुके—पपिथ, तस्थिथ । कित्यजादौ—पपतुः पपुः, तस्थतुः तस्थुः, गोदः, कम्बलदः । ङिति—प्रदा, प्रधा ॥

भाषार्थः—[*इटि*] इडादि आर्धधातुक [*च*] तथा अजादि कित् ङित् आर्धधातुक प्रत्ययों के परे रहते [*आतः*] आकारान्त अङ्ग का [*लोपः*] लोप होता है ॥ इट् का पृथक् ग्रहण अक्ङिदर्थ है ॥ पा तथा स्था धातु से लिट् लकार में सिप् को थल् (३।४।८२) तथा *ऋतो भारद्वाजस्य* (७।२।६३) के नियम से इट् आगम होकर 'प पा इ थ' रहा । प्रकृत सूत्र से अन्त्य आ (१।१।५१) का लोप होकर पपिथ तस्थिथ बन गया । पपतुः पपुः की सिद्धि परि० १।१।५८ पृ० ७४९ में देखें । गोदः कम्बलदः में *आतोऽनुपसर्गे कः* (३।२।३) से क प्रत्यय हुआ है । प्रदा प्रधा में *आतश्चोपसर्गे* (३।३।१०६) से अङ् ङित् प्रत्यय हुआ है । आकार लोप एवं टाप् होकर प्रदा प्रधा बनता है ॥

यहाँ से '*आतः*' की अनुवृत्ति ६।४।६८ तक जायेगी ॥

ईद्यति ॥६।४।६५॥

ईत् १।१॥ यति ७।१॥ *अनु०*—आतः, अङ्गस्य ॥ *अर्थः*—आकारान्तस्याङ्गस्य ईकारादेशो भवति यति परतः ॥ *उदा०*—देयम्, धेयम्, हेयम्, स्थेयम् ॥

भाषार्थः—आकारान्त अङ्ग को [*ईत्*] ईकारादेश होता है [*यति*] यत् प्रत्यय परे रहते ॥ *अचो यत्* (३।१।९७) से यत् प्रत्यय होता है । ३।१।९७ सूत्र के ही परिशिष्ट में गेयम् की सिद्धि के समान यहाँ सिद्धि जानें ॥

यहाँ से 'ईत्' की अनुवृत्ति ६।४।६६ तक जायेगी ॥

घुमास्थागापाजहातिसां हलि ॥६।४।६६॥

घुमा……साम् ६।३॥ हलि ७।१॥ *स०*—घु० इत्यत्रेतरेतरद्वन्द्वः ॥ *अनु०*—ईत्, क्ङिति, आर्धधातुके, अङ्गस्य ॥ *अर्थः*—घुसंज्ञकानामङ्गानां मा, स्था, गा, पा, हा, सा इत्येतेषां च हलादौ क्ङित्यार्धधातुके परत ईकारादेशो भवति ॥ *उदा०*—घु—दीयते, धीयते । देदीयते, देधीयते । मा—मीयते, मेमीयते । स्था—स्थीयते, तेष्ठीयते । गा—गीयते, जेगीयते ।[1] अध्यगीष्ट, अध्यगीषाताम् । पा—पीयते, पेपीयते । हा—हीयते, जेहीयते । सा—अवसीयते, अवसेषीयते ॥

भाषार्थः—[*घुमा……साम्*] घुसंज्ञक मा, स्था, गा, पा, ओहाक् त्यागे तथा षो अन्तकर्मणि इन अङ्गों को [*हलि*] हलादि कित् ङित् आर्धधातुक के परे रहते ईकारादेश होता है ॥ दीयते धीयते यहाँ कर्म में लकार हुआ है । देदीयते यह यङन्त का रूप है । इसी प्रकार मीयते मेमीयते आदि में जानें । अध्यगीष्ट की सिद्धि भाग १ परि० १।२।१ में देखें । जहाति से यहाँ ओहाक् त्यागे का ग्रहण है । षो धातु को *धात्वादेः०* (६।१।६२) से स तथा *आदेच उप०* (६।१।४४) से आत्व होता है । तेष्ठीयते यहाँ *शर्पूर्वाः खयः* (७।४।६१) से अभ्यास का खय् शेष रहता है ॥

यहाँ से '*घुमास्थागापाजहातिसाम्*' की अनुवृत्ति ६।४।६९ तक जायेगी ॥

एर्लिङि ॥६।४।६७॥

एः १।१॥ लिङि ७।१॥ *अनु०*—घुमास्थागापाजहातिसाम्, क्ङिति, आर्धधातुके, अङ्गस्य ॥ *अर्थः*—क्ङित्यार्धधातुके लिङि परतः घुमास्थागापाजहातिसामङ्गानां एकारादेशो भवति ॥ *उदा०*—देयात्, मेयात्, धेयात्, स्थेयात्, गेयात्, पेयात्, अवसेयात् ॥

भाषार्थः—कित् ङित् [*लिङि*] लिङ् आर्धधातुक परे रहते घु, मा, स्था, गा, पा, हा तथा सा इन अङ्गों को [*एः*] एकारादेश हो जाता है ॥

---

१. 'गामादाग्रहणेष्वविशेषः' इति परिभाषया इङादेशोऽपि गृह्यते ।

आशीर्लिङ् ३।४।११६ से आर्धधातुक और *किदाशिषि* (३।४।१०४) से कित् होता है सो उसी के उदाहरण हैं। अन्य कोई विशेष सिद्धि में नहीं है। मेयात् मा माने का रूप है॥ ङित् की अनुवृत्ति होने पर भी असम्भव होने से उसके उदाहरण नहीं बनते॥

